CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Entered 12541

TRIVANDRUM SANSKRIT SERIES

No. LXXXII.

Q 13C

Provincial Museum, LUCKNOW.

THE ARTHASÂSTRA OF KAUTALYA

with the commentary Srîmûla of

MAHÂMAHÔPÂDHYÂYA

T. GAṆAPATI SÁSTRÎ,

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland;
Doctor of Philosophy, University of Tubingen;

Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.

EDITED BY THE COMMENTATOR.

8, 9, 10, 11, 12, 13, 14 & 15 Adhikaranas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

MOTI LAL BANARSI DAS LAHORE. BOOK-SELLERS

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1925.

Inland Price Rs. 8-0-0.] [Foreign Price 16 sh.

[*The copyright in the text and in the first edition of the Commentary in Sanskrit is reserved with the Government of Travancore. All other rights in the commentary are reserved with the author thereof.*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ८२.

कौटलीयम्

अर्थशास्त्रं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
लण्डनपुरस्थराजकीयैष्याखण्डीयविद्यासेवकसमाजपूज्यसभ्यपद्भाजा
पिहेच्. डि. (ट्टविज्ञन्) पदसत्कृतेन
महामहोपाध्यायेन
त. गणपतिशास्त्रिणा
विरचितया श्रीमूलाख्यया व्याख्यया समुपेतं तेनैव
संशोधितम् ।

तृतीयः सम्पुटः—अष्टमादिपञ्चदशान्तान्यधिकरणानि ।

तच्चे
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम् ।

कोल्लम्वाब्दाः ११००, क्रैस्ताब्दाः १९२५.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

INTRODUCTION.

This is the third and the last part of the Arthasāstra. The readings of the Punjab and Mysore editions as compared with those in this, the Trivandrum edition, are given as Appendix No. I. An index of important and difficult words occurring in the work is given as Appendix No. II and the archaic words as No. III.

There are two divisions of प्रलम्भनप्रकरण in औपनिषदिकाधिकरण, known as अद्भुतोत्पादनम् and भैषज्यमन्त्रप्रयोग. The first teaches hunger-remedying yogas which would enable one to observe monthly, paksha and other similar fasts. The second teaches a yoga by which one could see through darkness, five yogas by which it would be possible to walk without being visible to others, as well as those by which cows, birds etc., may be made invisible and several other wonderful yogas of similar nature. Whether these yogas will be really effective is a question to be solved by actual practice which is possible only if the proper ways of applying medicines and mantras are well understood. And a correct knowledge of these ways will have to be acquired from persons who are masters in them. Hence those desirous of practising the yogas should have to seek the assistance of masters possessing practical experience. For our part, we can do nothing but explain the text and believe in the several statements made therein, in accordance with our estimate of the author. But we cannot be expected to show the effects of these yogas just as the commentator of the passage, कारीर्या वृष्टिकामो यजेत, cannot be expected to show the effects of the इष्टि. It is on this ground that we said towards the end of प्रलम्भनाध्याय —

दत्ता टिप्पणिकास्माभिर्भैषज्यस्यैवमल्पशः ।
क्रमस्तु सर्वस्तस्यापि मन्त्रवत् साम्प्रदायिकः ॥

In the इन्द्रियजयप्रकरण, Duryodhana is mentioned along with Rāvaṇa. The same Duryodhana is also mentioned along with Jayatsena, while dealing with gamblers. Again Nala and Dharmaputra who have sustained defeat at the hands of the gamblers are also referred to. It is clear from the above that in this prakarana Kautalya has the Mahabharata itself in his mind. Though the stories in the इन्द्रियजयप्रकरण about Dambhodbhava, Haihayārjuna etc., are all traced in the Mahābhārata, it has to be found out to what Itihāsa the stories of Dāndakya, Karāla etc., belong. The same is also the case with the story of Kātyāyanas &c. indicated by अयमुच्चैः सिञ्चतीं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कात्यायनः प्रवव्राज; कौञ्चोऽपसव्यमिति कणिङ्को भारद्वाजः etc., in the Samayāchārika of the fifth Adhikaraṇa.

We have omitted owing to scribal error to mention the Āmbhīyas while enumerating, in the introduction to the first volume, the names of Āchāryas referred to by Kautalya. We have also omitted to comment on the word, आम्भीय. Āmbhi means Bhīshma and Āmbhīyas are Bhīshma's followers, (*Vide* Sanskrit introduction for details).

That बाहुदन्तीपुत्र is इन्द्र, पिशुन is नारद and वातव्याधि is उद्धव is also explained fully in the Sanskrit introduction.

It is apparent from what Kautalya says that Droṇa and other Āchāryas were also authors of Arthasāstra and that their works were known at the time of Kautalya. This has already been pointed out in the introduction to the second volume. Further, it is a well-known fact that Droṇa and others were well-versed in state-craft. It is therefore possible that they should also have written some works which had existed at the time of Kautalya but which might have subsequently been lost; just as the Vyākaraṇas of Gārgya and others which had existed at the time of Pāṇini were lost afterwards. It should here be remembered that we have shown in the introduction to the first volume that the works of Brihaspati and Viśālāksha referred to by Kautalya existed at the time of Visvarūpāchārya, the commentator of याज्ञवल्क्य-स्मृति. Since it has been proved that there were works written by Brihaspati and Viśālāksha we can very well infer that there were also works written by Drona and others who are mentioned by Kautalya along with Brihaspati and Viśālāksha.

In dealing with the arguments of Dr. Jolly in the introduction to his edition, we had also occasion to examine some views of Dr. Winternitz referred to therein. Now we may examine Dr. Winternitz's article on "Kautaliya Arthasastra" that appeared in the April issue of the "Calcutta Review" for 1924. Therein he tries to establish certain theories in respect of the Arthasastra. But the arguments advanced by him are too weak to support them. We shall take up three of the theories which deserve examination.

1. The author of the Arthasastra is not a contemporary of Chandragupta Maurya, for Megasthenes and Kautalya differ widely in their accounts.

2. It is impossible that one man should have been a specialist in numerous branches of knowledge.

3. The foul measures recommended in the work take away much of its merit.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

We have already done with the first two questions in the introduction to the second part where it has been shown that the author of the Arthasāstra was a contemporary and minister of Chandragupta Maurya and that it is perfectly possible that a single author could be a specialist in several departments of knowledge. In fact, the very attempt to compare and contrast the accounts of Kautalya and Megasthenes is unwarranted. For, one lays down rules for the conduct of government while the other gives expression to his impressions which must necessarily be swayed by feelings of likes and dislikes. It is thus clear that the two accounts may differ from each other.

As to the third question, it is true that the Arthasāstra recommends to a king various steps of deceiving, subjugating, killing his own sons, ministers and other high state officials as well as neighbouring princes, with the help of spies. In the कोशाभिसंहरणप्रकरण of योगवृत्ताधिकरण are described various methods of playing upon the religiosity of the people for the purpose of collecting revenue from them. In the fifth and sixth chapters of the same Adhikaraṇa we are told how a minister should subdue his king and assume all the powers. All these would no doubt discredit the work. Dr. Winternitz thinks that it is quite inconsistent in an author to profess himself to be a follower of Dharma and at the same time advocate unfair methods. But we are however of opinion that even the sage Buddha would not but have given similar advices had he written an Arthaśāstra. Suppose a good king, but weak and helpless, and in imminent danger of attack by a cruel and powerful opponent, approaches a master of the Arthasāstra for advice as to how he should save himself and his kingdom from the enemy, then what will be his counsel? Will it be that he should surrender all his possessions to his enemy or become an anchorite or an ascetic? No. For both the advices would be highly detrimental to him and to his subjects. What he must needs instruct is that he, the king, should resort to such steps as are described above even though verging on vices, which would in the end save him from the danger. And no author of Arthasāstra can be charged with transgressing the limits of morality if, of course, his intention be that the weak and helpless king, by acting up to his advice, should come out victorious and should later on seek to remove, by wise and virtuous rule, the sin resulting from the cruel steps adopted; just as the sinker of a well after digging washes off with the water of the well the dirt that has accumulated in his body while in the course of digging.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Besides, Kautalya specifically states that unrighteous measures should be resorted to only against the bad and not against the good; thus **ओपनिषदिकमधर्मिष्ठेषु प्रयुञ्जीत.**

When momentous state matters requiring large funds have to be attended to, it is the duty of the king to collect funds from the people, for without them the very existence of the state will be in danger. At such times, when the king has naturally to take to unfair measures of collection putting the people to severe hardships, Kautalya places sufficient restraint on him by ruling out that even then only such measures should be adopted as would not wound popular feelings. Has Kautalya strayed away from the path of Dharma, here? When the functions of the state are duly fulfilled with the help of the funds collected, the merits issuing out of them would expiate the sin of unfair collection. Moreover, politics by its very nature is mixed up with deceits; and hence it is that Kālidāsa, though he has adopted to a very great extent the beautiful artha topics from the Arthasāstra in his Kavyas, observes in the words of an opponent (**विवादि**) in **अभिज्ञानशाकुन्तल** that politics is stigmatised with deception; just as a Srotriya Brahmin is guilty of sacrificing animals.

The statement that the **योगवृत्ताधिकरण** teaches ministers and courtiers how to gain and retain a king's favour and to get all power in their own hands, is quite wrong. What is taught in the fifth chapter of this adhikarana is how the officers working in various departments of the state should do their work properly and how when a king gets addicted to evil habits it should be the duty of the ministers to bring him round to sober ways of living by following him as his boon companions. In the sixth chapter of the same adhikarana, after criticising the opinion of Bhāradvāja, viz., when the king is dead, the minister should usurp the throne, putting the heir-apparent to death, Kautalya teaches that, ministers should, at the king's death, install the prince and work, heart and soul, for his well-being. This sense of the two chapters is clear and unmistakeable.

The charge levelled against the Arthaśāstra that it teaches unrighteous methods is thus set aside. The work, therefore, comes to be regarded as equivalent to Dharmasastra in as much as the methods recommended in it render it possible to run the machinery of the state in accordance with

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the principles of Dharma. It follows that the connection claimed by Dr. Winternitz between the Arthaśāstra and the Lokāyata has no ground to stand upon if he takes the word Lokāyata as meaning Atheism. If, however, he means by it Nyāyaśāstra which is included in the आन्वीक्षिकी, then the connection referred to above needs no special mention, as there is no sāstra which is not governed by the Nyāya system.

The answer to the similar doubts is contained in our commentary on the sloka

"धर्ममर्थं च कामं च प्रवर्तयति पाति च ।"

at the concluding portion of the work. It is this:—

In the Arthaśāstra are mentioned various methods of deceiving other people and of killing enemies through secret spies. If so, how can it be said that the work is in accordance with the principles of Dharma? We should here bear in mind that the first and foremost duty of a king is protection of his subjects. Even when a king acts without swerving from the path of righteousness, the virtuous neighbouring princes are likely to get jealous and may begin to harbour inimical feelings and take to unfair ways of preventing him from ruling properly. That being so, it is impossible for a king to get on without being harassed by others or without himself harassing them or again without taking counter measures against opponents. Hence it is legitimate for a king to be well acquainted with all sorts of foul practices so as to enable him to take such measures as would ward off his enemies aiming them at him, And the Arthaśāstra which recommends such practices, conduces, by acting as the means of driving out evils, to the Dharma of protecting a king's subjects.

I think it is not possible for any man even to conceive of the idea of writing a book like the Arthasastra if he does not possess a thorough practical knowledge of the subjects pertaining to it. When such is the fact we would like to know how Dr. Winternitz has stated that the Arthaśāstra was written by a Pandit who has no practical knowledge of politics. His argument, that "endless and pedantic classification and definitions" are common in the work of a Pandit but not of a statesman, has no force at all. For if endless classification found in a śāstra is an indication of its author having no practical knowledge of the subjects, then the classification found in the sāstras like the Vedānta, Mīmāmsa and

CC-0. Agamnigam Digital Preseyation Foundation, Chandigarh

Vyākaraṇa, will also have to be taken as showing that their respective authors Bādarāyaṇa, Jaimini and Pāṇini have also no practical knowledge of the sastras expounded by them. Besides, statesmanship and ability to write a grand work are not opposed to each other. They can very well coexist in a person.

Another scholar doubts Kautalya's authorship of the Arthaśāstra on the ground that it mentions the names of several metals and towns and villages and countries that were unknown during the time of Chandragupta Maurya. We ask what is the source from which he came to learn that they were unknown in India at that time? It could not be that there is ocular proof of it, which is impossible for obvious reasons. Nor could it be from the writings of ancient authors, as no work stating that they were unknown in India has so far been forthcoming. It must therefore be a mere conjecture based on imaginative reasoning. And this conjecture can be accepted only if it does not clash with a stronger counter-evidence. It is explicitly stated in the Arthasāstra at the beginning, in the middle and at the end, that it was written by Kautalya *alias* Chanakya or Vishnugupta, the minister of Chandragupta Maurya; and this fact is also corroborated in the Nītisāra of Kāmandaka who lived more than a thousand years ago and who can therefore be expected to know much more about the Arthasāstra than we of the present day. When the mention of the author's name within the body of the work and the reference to it in eulogistic terms in another authoritative work stand as direct evidence the contention that they could be negatived by a conjecture is, it seems to me, the same as saying that the light of the sun can be extinguished by the darkness of the night.

Trivandrum,
16-1-25.

T. GAṆAPATI SĀSTRI.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपोद्घातः ।

तृतीयेनैतेन सम्पुटेन पूर्णतामर्थशास्त्रमगमत् । अर्थशास्त्रस्य मैसूरपुस्तकाल्लवपुरपुस्तकाच्च व्यावृत्तानामर्थवतामसत्पुस्तकस्थानां पाठविशेषाणां सूचनिका काचिंदिह प्रथमपरिशिष्टात्मना निवेशिता; अनुक्रमणी च भूयिष्ठानां पदानां विवरणविज्ञेयार्थानां द्वितीयपरिशिष्टात्मना । तृतीयमपि परिशिष्टं योजितं, यत्रार्षप्रयोगाः सङ्कलिताः; ते च मन्ये कैस्तप्राचीनचतुर्थशताब्द्याः समुचिताः ।

औपनिषदिके प्रलम्भनप्रकरणे अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोगः इति चावान्तरं प्रकरणद्वयं विभक्तमस्ति । तत्राद्ये मासोपवासाद्यनुकूलाः क्षुत्प्रतीकारयोगाः, द्वितीये तमसि रूपदर्शनयोगः, नष्टच्छायारूपतया सञ्चारानुकूलाः पञ्च योगाः, पशूनां मृगाणां पक्षिणां चान्तर्धानयोगाः, एतदादयो बहवो विस्मयावहा योगा उपदिष्टाः । तेषां तु फलसंवादस्तदनुष्ठानेन परीक्षणीयः; अनुष्ठानं च भेषजानां मन्त्राणां च यथावत्प्रयोगपरिपाटीसम्यग्ज्ञानायत्तं; तच्च सम्यग्ज्ञानमनुष्ठानसिद्धगुरूपदेशाधीनम् । अतः फलसंवादसाक्षात्काराभिलाषिभिस्तथाविधगुरूपदेशसम्प्रदाय एव विचेतव्यः । वयं पुनर्यथाप्रमाणं मूलस्यार्थं वक्तुं प्रभवामः, योगानां फलसंवादं चोपदेष्टृप्रामाण्यादनुमिनुमः, न तु फलसंवादस्य निदर्शने प्रतिभूभवामः 'कारीर्या वृष्टिकामो यजेत' इतीष्टिविधिवाक्यव्याख्यातार इव वृष्टिरूपेष्टिफलसंवादने । एतदेवाभिसन्धाय प्रलम्भनाध्यायान्तेऽवोचाम —

'दत्ता टिप्पणिकास्माभिर्भैषज्यस्यैवमल्पशः ।
क्रमस्तु सर्वस्तस्यापि मन्त्रवत् साम्प्रदायिकः' ॥ इति ॥

इन्द्रियजयप्रकरणे मानिनिदर्शने रावणेन सह पठितो दुर्योधनः । स पुरुषव्यसनवर्गप्रकरणे जयत्सेनेन सह कितवप्रसङ्गात् पठितः । ताभ्यां जितौ नलयुधिष्ठिरावपि स्मृतौ । तेन महाभारतमेवाचार्यकौटल्यस्तात्पर्येण स्मृतवानिति स्पष्टमेव । इन्द्रियजयप्रकरणगतानि दम्भोद्भवैहैहयार्जुनवातापिवृष्णिसङ्घवृत्तान्यपि महाभारताद्याकराणि प्रतीतान्येव । किन्तु दाण्डक्यकरालादिवृत्तं कस्मिन् पुराणे वर्णितमिति विचेतव्यम् । तथा पञ्चमाधिकरणीयसमयाचारिकप्रकरणे 'अयमुच्चैः सिञ्चतीति कात्यायनः प्रवव्राज; कौञ्चोऽपसव्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिति कणिङ्को भारद्वाजः' इत्यादिना सूचितं यत् कात्यायनकणिङ्कादीनामिति-वृत्तम् उपलब्धटीकाभागोक्तरीत्यास्माभिर्विवृतं, तस्याकरभूत इतिहासग्रन्थोऽपि मृग्यः ।

प्रथमसम्पुटोपोद्घाते कौटल्यस्मृतानामाचार्याणां नामनिर्देशप्रसङ्गे आम्भीयानां राजपुत्ररक्षणाध्यायस्मृतानाम् अनिर्देशो लेखकप्रमादादायातः । स मुद्राक्षरशोधनदशायामप्यनुवृत्तः । आम्भीयपदार्थोऽपि न प्रकाशितो व्याख्यायां प्रमादादेव । आम्भीया इत्यस्य ह्ययमर्थः —अम्भो जलं नदी गङ्गेति यावत् तस्यापत्यम् आम्भिर्भीष्मः कौणपदन्तशब्दाभिधेयः, अम्भश्शब्दाद् 'बाह्वादिभ्यश्च' इतीञ् 'सम्भूयोम्भसोः सलोपश्च' इति बाह्वादिगणसूत्रादम्भश्शब्दसलोपश्च, आम्भेरिमे आम्भीयाः भीष्मशिष्या इत्यर्थः । 'इत्याम्भीयाः' इत्यस्य स्थाने 'इति कौणपदन्त' इति तु न पठितं, तच्छिष्याणामपि सतां ततः किञ्चिन्मतवैलक्षण्यमस्तीति द्योतनार्थं, वैचित्र्यार्थं वा । अम्भश्शब्द एव वा मेधश्शब्दवद् ऋषिविशेषे वर्तते, तस्यापत्यमित्यादि पूर्ववत् ।

बाहुदन्तीपुत्रः=इन्द्रः, पिशुनो=नारदः, वातव्याधिः=उद्धवः, इति च विवृतं यथाटीकम् । अत्रोपपत्तिरप्यस्ति । यथा —बहुदन्त ऐरावतः तस्येयम् इन्द्रमातृत्वेन स्वामित्वसम्बन्धवती बाहुदन्ती अदितिः तस्याः पुत्रो बाहुदन्तीपुत्रः । नारदः प्रकृत्यैव कलहप्रियत्वात् कलहोत्पादनाय पैशुन्यं करोतीति हि प्रसिद्धिः । उद्धवश्च मन्ये वातनिमित्तव्याधियोगाद् वातव्याधिरुच्यते; अत एव "प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्" इति शिशुपालवधद्वितीयसर्गश्लोके माघकविना वातशब्दस्थाने पवनशब्दं निवेश्य पवनव्याधिशब्देन स व्यवहृतः ।

द्रोणाचार्यादीनां ग्रन्थप्रणेतृत्वं विशिष्यार्थशास्त्रप्रणेतृत्वं कौटल्यकाले तत्प्रणीतार्थशास्त्रोपलब्धिश्चासीदिति कौटल्यप्रामाण्यादवसीयते । अयमर्थो द्वितीयसम्पुटोपोद्घातस्याष्टमे पृष्ठे न खलु न सूचितः । किञ्च, द्रोणादयो राज्यतन्त्रविद्यायां निष्णाताः प्रतीताः; अतो येकेचित् तद्विद्याग्रन्थास्तैः पुरा प्रणीता बभूवुरिति न खलु न सम्भाव्यते । ते तु ग्रन्थाः कौटल्यकाले स्थिता एव पश्चान्नूनं परिलुप्ताः, यथा गार्ग्यादिप्रणीतानि व्याकरणानि पाणिनिकाले स्थितान्येव पश्चात् परिलुप्तानि तद्वत् । आचार्यप्रायपाठे बृहस्पतिविशालाक्षयोः कौटल्येन स्मृतयोर्ग्रन्थौ याज्ञवल्क्यस्मृतिव्याख्यातृविश्वरूपाचार्यकालेऽप्युप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लब्धाविति प्रथमसम्पुटोपोद्घाते यदुक्तं, तदपि न विस्मर्तव्यं; बृहस्पतिविशालाक्षग्रन्थसत्ताविभावनेन हि तत्सहपठितद्रोणाचार्यादिग्रन्थानामपि स्थितत्वमवश्यमनुमेयम् ।

द्वितीयसम्पुटस्योपोद्घाते लवपुरपुस्तकसंशोधकाभिप्रायविमर्शप्रसङ्गात् डाक्टर् विन्टेर्नि ट्सस्य मतं संशोधकप्रमाणितं किञ्चिद् विचारितमस्माभिः । तस्यैवोपन्यासः कश्चिदर्थशास्त्रविषयः कलिकातारिवियूसंज्ञपत्रिकाप्रकाशित इदानी लेशतो विमृश्यते ।

तस्मिन् ह्युपन्यासे विन्टेर्निट्सः प्रायः क्षोदाक्षमाभिर्युक्तिभिः किमपि किमपि वस्तु साधयितुं नितान्तं परिश्रान्तः । वस्तुत्रयमेव तु तत्र प्रतिवचनयोग्यतया गणनीयं मन्यामहे— यद् अर्थशास्त्रकर्तुर्मौर्यचन्द्रगुप्तसमकालतां तत्समानकालिकमेगास्तनीशव्यतिरेकप्रदर्शनभङ्गया स विघटयतीत्येकम्, एकस्य सतः कर्तुर्बहुप्रमेयाभिज्ञताया असम्भवमाहेत्यन्यत्, बहून् अर्थशास्त्रे दोषान् उद्भावयतीति चापरम् । अत्राद्यं द्वितीयं च द्वितीयसम्पुटोपोद्घातेऽर्थशास्त्रस्य चन्द्रगुप्तमन्त्रिचाणक्यप्रणीतत्वस्थापनेन एकस्यापि कर्तुरर्थशास्त्रोपान्त्यावत्प्रमेयोपदेशदेशिकत्वसम्भवोपपादनेन च प्रत्युक्तम् । तत्रापि अर्थशास्त्रकर्तृमेगास्तनीशयोरन्योन्यवैलक्षण्यसमर्थनसंरम्भ एव तावत् तस्यायुक्तः, यतः पूर्वो विधिनिषेधानुशासनमात्राय प्रवृत्तः, उत्तरस्तु वैदेशिको यात्रिकः स्वप्रत्यक्षितप्रियद्वेष्योदासीनवस्तुस्तुतिनिन्दामौनवृत्तिरित्यनयोर्भिन्नस्वभावयोः परस्परसंवादापेक्षणमेव न समञ्जसम् ।

तृतीयं तु चिन्त्यते — शास्त्रे खल्वस्मिन् गूढपुरुषप्रणिधानादिरूपैः कपटोपायैः विरोधिनां सामन्तानां स्वामात्यादीनां स्वराष्ट्रमुख्यानां स्वपुत्रादीनामपि वञ्चनं दमनं हननं च राज्ञा कर्तव्यमुपदिश्यते, जनेभ्यस्तदीयधर्मश्रद्धोपजीवनेन धनापहरणस्योपायाः कोशाभिसंहरणे प्रदर्श्यन्ते । योगवृत्ताधिकरणस्य पञ्चमषष्ठाध्याययोर्मन्त्रिणां राजवशीकरणोपायो राजशक्तिस्वायत्तीकरणोपायश्चोपदिश्येते । त एते पापिष्ठा मार्गा इत्यर्थशास्त्रस्य दोषाः परिस्फुटा इति विन्टेर्निट्सस्याशयः; ईदृशोपदेशदायित्वं चार्थशास्त्रप्रणेतुर्बहुत्र प्रकाशितनिजधार्मिकभावस्यासङ्गतमिति च ।

वयं पुनर्मन्यामहे—बुद्धमुनिरपि राज्यतन्त्रशास्त्रं प्रणेतुं प्रवृत्त एवञ्जातीयान् शत्रुनिग्रहोपायोपदेशान् अवर्जनीयत्वाद् दातुमर्हतीति । यदि हि कश्चिद्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुणी दुर्बलो राजा निस्सहायः प्रबलेन रिपुणा समुच्छेत्तुकामेन बाध्यमानः स्वराज्यरक्षणोपायमधिजिगांसेत, तदा तं प्रति देशिकः किं प्रतिपद्यतां किं तावत् 'सर्वस्वं रिपवे समर्पये'ति स तमनुशास्तु, आहोस्वित् 'तृतीयमाश्रमं चतुर्थं वाश्रयस्वे'ति । उभयमप्यर्थहानिकरमर्थशास्त्रकारेण नोपदेष्टुं युज्यते । किन्तु 'येनकेनचित् पूर्वोक्तजातीयेनाधर्म्येणाप्युपायेनात्मप्रतिष्ठामन्विच्छे'त्येवोपदेष्टव्यम्। एवं हि लब्धोपदेशो दुर्बलः प्रयत्नेन जयं प्रतिपद्य सम्यग्राज्यपरिपालनजन्यैः पुण्यैर्दुरुपायप्रयोगजनितं पाप्मानं कूपखानक इव तत्खननानन्तरपरिनिष्पन्नैस्तोयैः खननकालजनितं पङ्कलेपमपनोत्स्यतीत्याशयवतः उपदेष्टुः क्व धार्मिकत्वप्रच्युतिप्रसङ्गः । किञ्चायं शास्त्रकारो दुरुपायान् अधार्मिकेष्वेव प्रयोक्तव्यान् मन्यते न धार्मिकेषु, यदाह — 'औपनिषेदिकमधर्मिष्ठेषु प्रयुञ्जीते'ति ।

प्रचुरधनसाध्ये राज्यकर्मण्युपस्थिते कोशसम्पद्विहीनेन राज्ञा कोशाभिसंहरणमवश्यं कर्तव्यम्, अन्यथा राज्यं परित्यक्तव्यं स्यात् । तथाविधविपन्निवारणाय कोशमभिसंहर्तुं प्रकृतिभ्यो यया कयापि तन्मनोव्यथाजनिकया विधया हठाद् धनं ग्रहीतुं प्रवृत्तो नियम्यते शास्त्रकारेण — गत्यन्तराभावे प्रकृतिसकाशात् किञ्चिद् वञ्चनमिश्रितैरपि तच्चित्तानुपपीडिभिः कोशाभिसंहरणोक्तैरुपायैर्धनं सञ्चिन्वीत, न तु जातु तच्चित्तोपपीडिभिरिति । तत्र का नाम धर्मच्युतिः कौटल्यमुनेः । तथोपचितया हि कोशसम्पदा राज्यकर्मणि सम्यङ्निर्वृत्तेऽतिमहत् पुण्यं सिद्धं भविष्यति; तेन च वञ्चनजं पापं निर्धानिष्यते ।

किञ्च, राज्यतन्त्रणप्रक्रियैव तावदीदृशी स्वभावाद्, यद् अवर्जनीयैर्वञ्चनैः प्रायः सा संसृज्यते । अत एव राज्यतन्त्रविद्यामिमां स्वकाव्येषु श्लाघनीयतदर्थानुवादेन बहुलमुपजीवन्नपि तत्रभवान् कालिदासः कतिपयावर्जनीयवञ्चनोपदेशदायित्वं निमित्तं कृत्वा अभिज्ञानशाकुन्तले विवाद्युक्तौ श्रोत्रियस्येव पशुमारणकर्मदारुणत्वम् अस्याः परातिसन्धानविद्यात्वमुपन्यस्तवान् 'परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः' इति ।

यत्तु योगवृत्ताधिकरणे मन्त्रिणां राजवशीकरणोपायो राजशक्तिस्वायत्तीकरणोपायश्चोपदिश्यत इति, तदत्यन्तासंगतम् । तस्य हि पञ्चमाध्याये कर्मनियुक्तानां स्वकर्मसम्यगनुष्ठानं, कथञ्चिद् व्यसनिराजानुवर्तनेन तद्व्यसनोपघाते प्रयतनं चोपदिश्यते । षष्ठाध्याये तु 'अमात्यः कुमारमुपरतपितृकं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हत्वा स्वयं राज्यं हरेद्' इत्येवंरूपं भारद्वाजीयं मतं युक्तिभिः खण्डयित्वा अमात्यस्य कुमाराभिषेचनपूर्वं सर्वात्मना तद्धितानुचिन्तनमेव करणीयतया प्रपञ्चितम्। ईदृशेऽध्यायद्वयस्यार्थे विस्पष्टे सति डाक्टर् विन्टेर्निट्त्सस्तद्विपरीतं कथमवोचदिति न विद्मः।

तदेवम् अधर्मोपदेशकत्वेऽर्थशास्त्रस्य निरस्ते सम्यग्राज्यतन्त्रणरूपधर्मानुष्ठानाभ्युपायोपदेशकताया अबाधितत्वाद् धर्मशास्त्रसोदर्यत्वं सिद्धं द्रष्टव्यम्। एतेन, 'लोकायतस्यार्थशास्त्रस्य चान्योन्यसख्यमस्ती'ति विन्टेर्निट्त्सोक्तिः प्रत्युक्ता, लोकायतशब्देन नास्तिकतन्त्रस्य तेन विवक्षणाद् अर्थशास्त्रस्य चास्तिकतन्त्रत्वात्। यद्यान्वीक्षिक्यन्तर्गतं न्यायशास्त्रं लोकायतपदेन तस्य विवक्षितं, तर्हि तत्सख्यं सर्वेषां शास्त्राणामविशिष्टमिति किं विशिष्यार्थशास्त्रस्य तत्कथनेनेति न किञ्चिदेतत्।

यथोक्तजातीया अन्यथाशङ्काः समाधातुं शास्त्रोपान्त्यश्लोकस्य "धर्ममर्थं च कामं च प्रवर्तयति पाति च।" इत्येतस्य व्याख्यायां यदस्माभिरुपपादितं, तदप्यत्र स्मर्तुमुचितम्। तत्र ह्युक्तं — "नन्वस्मिन् शास्त्रे गूढपुरुषप्रणिधानादिभिरुपायैः परवञ्चनानि नानारूपाणि कर्तव्यतयोपदिश्यन्ते, उपांशुवधादीनि च परहिंसनानि; तत् कथमिदं धर्मस्य प्रवर्तकं पालकं च भवतीति चेत्। उच्यते — प्रजापरिरक्षणं हि नाम राज्ञो धर्मः। तच्च धर्मपरेण विजिगीषुणा सम्यङ्निर्वर्त्यमानं धर्मपरा अपि सामन्ताः शत्रूभूय रागवशादसहमानाश्च परभूमिकामुकाश्च विचित्रैः पापिष्ठोपायप्रयोगैर्विहन्तुं प्रायः स्वभावात् प्रयतन्ते। ईदृशे समुदाचारे राज्ञामौत्सर्गिके सति विद्याविनयवता आत्मसम्पद्युक्तेन केनचिदपि राज्ञा परैरबाध्यमानेन वा, परान् अबाधमानेन वा, परप्रवर्तितान् आत्मोपघातान् अप्रतिकुर्वता वा, न कदाचिदपि स्वस्थेन स्थातुं शक्यं, न चानारब्धपरोत्पादितानर्थप्रतीकारेण स्वराज्यरक्षणं सम्यङ् निर्वर्तयितुं शक्यम्। अतः स्वराज्यपरिरक्षणरूपधर्मसम्यङ्निर्वृत्तये परवञ्चनानां परहिंसनानां च विचित्राः प्रकाराः प्रतिकार्यत्वबुद्ध्या जिज्ञासिता एव राज्ञां भवन्तीति तदुपदेशपरमिदं शास्त्रम् अनर्थनिवर्तनद्वारेण यथोक्तधर्मसाधकं भवत्येवेति सुष्ठूक्तं "धर्मं प्रवर्तयति पाति च" इति।

न खलु कश्चित् प्रेक्षापूर्वकारी सर्वाकारमहनीयार्थानुष्ठानोपदेशप्रधानमिदं शास्त्रम् आत्मनस्तदर्थानुष्ठानपरिचयविकलतायां सत्यां 'प्रणयेयम्' इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनसापि संकल्पयितुं व्यवस्येत्, किमुत प्रणेतुम् । इत्थं वस्तुस्थितौ शास्त्रमपरिचिततदर्थानुष्ठानेन पण्डितेन प्रणीतमिति विन्टेर्निट्ज्समहोदयः कथं वक्तुं व्यवसित इति न विद्मः । यदपि स तत्र युक्तिं दर्शयितुमिव प्रवृत्तो वक्ति— बहुपक्षोपन्यासः शास्त्रे परिदृश्यमानः पण्डितसाधारणो, न तु राज्यधुरन्धरसाधारण इति, तदप्यसङ्गतम् । यदि हि शास्त्रे बहुपक्षोपन्यासस्तदर्थानुष्ठानरहितत्वे लिङ्गं, तर्हि ब्रह्मधर्ममीमांसाव्याकरणशास्त्रेषु बहुपक्षोपन्यासदर्शनात् तत्प्रणेतृणां व्यास-जैमिनि-पाणिनीनामपि तदर्थानुष्ठानपरिचयविहीनत्वं कल्पनीयं प्रसज्येत । किञ्च, राज्यतन्त्रधुरन्धरत्वं चतुरवाक्यगुम्फनलक्षणं पाण्डित्यमिति नैतौ परस्परविरुद्धौ धर्मौ; अत एनयोरेकस्मिन् धर्मिणि सहावस्थानमपि नासम्भवीति न चिन्तितं तेन विदुषा ।

अत्रान्तरे केनापि विपश्चिता अर्थशास्त्रस्य चाणक्यकृतत्वे संशयबीजमित्थं मे लेखमुखेन निवेदितम् — 'अर्थशास्त्रग्रन्थे हि बहुलानि द्रव्याणि बहुलानि नामानि च देशजनपदादीनां पठ्यन्ते, यानि तदा मौर्यचन्द्रगुप्तकाले भारतवर्षे न ज्ञायन्ते स्म' इति ।

तत्रेदं प्रष्टव्यमस्ति —तेषां द्रव्याणां देशादिनाम्नां च मौर्यचन्द्रगुप्तकालेषु भारतीयाविज्ञातत्वं केन प्रमाणेनावगतमिति । न तावत् प्रत्यक्षेण प्रत्यक्षकल्पेनाप्तवाक्येन वा पूर्वाचार्योक्तिलक्षणेन प्रमाणेन, तयोरुभयोरभावात् । किन्तु उत्प्रेक्षकबुद्धिवैचित्र्यजन्मना केवलेन ऊहेन । ऊहश्च प्रबलप्रमाणाविरोध्येवोपादेयो भवति, न तु तद्विरोधी । उपादेयता च सा नैकान्तिकी तदुपमर्दकोहान्तरोपनिपातावधिजीवितत्वात् तस्य । प्रकृतस्य चार्थशास्त्रस्य चन्द्रगुप्तराज्यप्रतिष्ठापकविष्णुगुप्तचाणक्यापरनामधेयकौटल्यप्रणीतत्वं ग्रन्थादिमध्यान्तेषु स्पष्टमभिहितम् । कामन्दकेन च परस्सहस्रवर्षप्राचीनतयास्मदाद्यपेक्षयार्थशास्त्रकालप्रत्यासन्नतरेणार्थशास्त्रविषयकयावद्विशेषज्ञानयोगिना तद्वितत्योपश्लोकितं नीतिसारे । इत्थं च ग्रन्थशरीरे कर्तृनामधेयोपनिबन्ध इति, तस्यैव नामधेयस्य ग्रन्थान्तरेषूपश्लोकनमिति च प्रमाणद्वयमबाधितं प्रत्यक्षमुपलब्धं जागर्ति । तदेतन्नित्यशङ्क्यमानबाधेनास्मदाद्यूहेन यथोक्तेन बाध्यतामिति वादः अप्रतिहतप्रकाशप्रसरं सौर्यं तेजस्तिमिरेण बाध्यतामिति वादस्य समान इति मे मतिः; उपदर्शितप्रमाणद्वयमहिम्ना यथोपन्यस्त ऊहः प्रत्याख्येय इति च । तस्माद्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यन्मौर्यमन्त्रिशास्त्रेऽस्मिन् द्रव्यं देशादिनाम वा ।
तज्ज्ञातं मौर्यकालेऽपि भारतीयैरिति स्थितिः ॥

किञ्च,

अर्थः प्रामाणिकाचार्यग्रन्थेषु स्पष्टमीरितः ।
मेगास्तनीशमौनेन बाध्यतामिति वादवत् ॥
ऊहेन बाध्यतां सोऽर्थ इति वादेऽप्यसुन्दरे ।
अबाधितास्य शास्त्रस्य मौर्यमन्त्रिप्रणीतता ॥

अनन्तशयनम्
१६-१-१९२५

त. गणपतिशास्त्री.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयसम्पुटस्य विषयानुक्रमणी ।

व्यसनाधिकरणम् अष्टममधिकरणम् ।

आदितः अध्यायः.	अधिकरणाध्यायः.	प्रकरणम्.	विषयः.	पृष्ठम्.
११७	१	१२७	प्रकृतिव्यसनवर्गः	१—११
११८	२	१२८	राजराज्ययोर्व्यसनचिन्ता	१२—१६
११९	३	१२९	पुरुषव्यसनवर्गः	१७—२४
१२०	४	१३०—१३२	पीडनवर्गः, स्तम्भनवर्गः, कोशसङ्घवर्गश्च	२५—३४
१२१	५	१३३, १३४	बलव्यसनवर्गः, मित्रव्यसनवर्गश्च	३५—४२

अभियास्यत्कर्म नवममधिकरणम् ।

१२२	१	१३५, १३६	शक्तिदेशकालबलावलज्ञानं, यात्राकालाश्च	४३—५०
१२३	२	१३७—१३९	बलोपादानकालाः, सन्नाहगुणाः, प्रतिबलकर्म च	५१—५८
१२४	३	१४०, १४१	पश्चात्कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारश्च	५९—६६
१२५	४	१४२	क्षयव्ययलाभविपरिमर्शः	६७—७२
१२६	५	१४३	बाह्याभ्यन्तराश्चापदः	७३—७८
१२७	६	१४४	दृष्यशत्रुसंयुक्ताः	७९—८८
१२८	७	१४५, १४६	अर्थानर्थसंशययुक्ताः, तासामुपायविकल्पजाः सिद्धयश्च	८९—१०२

सांग्रामिकं दशममधिकरणम् ।

१२९	१	१४७	स्कन्धावारनिवेशः	१०३—१०६
१३०	२	१४८, १४९	स्कन्धावारप्रयाणं, बलव्यसनावस्कन्दकालरक्षणं च	१०७—१११
१३१	३	१५०—१५२	कूटयुद्धविकल्पाः, स्वसैन्योत्साहनं, स्वबलान्यबलव्यायोगश्च	११२—१२०
१३२	४	१५३, १५४	युद्धभूमयः, पत्त्यश्वरथहस्तिकर्माणि च	१२१—१२६

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आदितः अध्यायः.	अधिकर- णाध्यायः.	प्रकरणम्.	विषयः.	पृष्ठम्.
१३३	५	१५५—१५७	पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, सारफल्गुबलविभागः, पत्त्यश्वरथहस्तियुद्धानि च	१२७—१३६
१३४	६	१५८, १५९	दण्डभोगमण्डलासंहृतव्यूहव्यूहनं तस्य प्रतिव्यूहस्थापनं च	१३७—१४३

संघवृत्तम् एकादशमधिकरणम्।

१३५	१	१६०, १६१	भेदोपादानानि, उपांशुदण्डश्च	१४४—१५३

आबलीयसं द्वादशमधिकरणम्।

१३६	१	१६२	दूतकर्माणि—	१५४—१६३
,,	,,	,,	सन्धियाचनम्	१५४—१५७
१३७	२	,,	वाक्ययुद्धम्	१५८—१६३
,,	,,	१६३	मन्त्रयुद्धम्	,, ,,
१३८	३	१६४, १६५	सेनामुख्यवधः, मण्डलप्रोत्साहनं च	१६४—१६७
१३९	४	१६६, १६७	शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधश्च	१६८—१७२
१४०	५	१६८—१७०	योगातिसन्धानं, दण्डातिसन्धानम्, एकविजयश्च	१७३—१७९

दुर्गलम्भोपायः त्रयोदशमधिकरणम्।

१४१	१	१७१	उपजापः	१८०—१८४
१४२	२	१७२	योगवामनम्	१८५—१९१
१४३	३	१७३	अपसर्पप्रणिधिः	१९२—१९९
१४४	४	१७४, १७५	पर्युपासनकर्म, अवमर्दश्च	२००—२०८
१४५	५	१७६	लब्धप्रशमनम्	२०९—२१२

औपनिषदिकं चतुर्दशमधिकरणम्।

१४६	१	१७७	परघातप्रयोगः	२१३—२२०
१४७	२	१७८	प्रलम्भनम्—	२२१—२३७
,,	,,	,,	अद्भुतोत्पादनम्	२२१—२२८
१४८	३	,,	भैषज्यमन्त्रप्रयोगः	२२९—२३७
१४९	४	१७९	स्ववलोपघातप्रतीकारः	२३८—२४०

तन्त्रयुक्तिः पञ्चदशमधिकरणम्।

१५०	१	१८०	तन्त्रयुक्तयः	२४१—२४८

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ श्रीः ॥

श्रीगणेशाय नमः ।

कौटलीयम्

अर्थशास्त्रं

महामहोपाध्यायगणपतिशास्त्रिरचितव्याख्योपेतम् ।

(तृतीयः सम्पुटः।)

व्यसनाधिकारिकम्—अष्टममधिकरणम् ।

१२७. प्रक. प्रकृतिव्यसनवर्गः ।

व्यसनयौगपद्ये सौकर्यतो यातव्यं रक्षितव्यं वेति व्यसनचिन्ता ।

दैवं मानुषं वा प्रकृतिव्यसनमनयापनयाभ्यां सम्भवति ।

षाड्गुण्याधिकरणे 'अरिसम्पद्युक्तः सामन्तः शत्रुर्व्यसनी यातव्यः' इति यातव्यस्य शत्रोर्व्यसनमङ्गमभिहितम् । 'अभ्युच्चीयमानो विगृह्णीयात्' इति च यातुर्विजिगीषोर्व्यसनाभावोऽङ्गमभिहितः । तस्यैतस्य व्यसनस्य कारणस्वरूपाश्रयादिकं वक्तुमिदमष्टममधिकरणमारभ्यते व्यसनाधिकारिकं नाम । व्यसनस्याधिकारः प्रस्तावोऽस्त्यस्मिन्निति च मत्वर्थीयोऽत्र ठन् ।

अधिकरणं स्वयमेव संगमयति — व्यसनयौगपद्य इत्यादि । शत्रुर्यदा व्यसनी आत्मा चाव्यसनी, तदा शत्रूच्छेदसौकर्याद् यानं कर्तव्यमुक्तम् । तस्यास्य व्यसनस्य यौगपद्ये शत्रुविजिगीष्वोरुभयोरपि युगपत् सम्भवे सति, सौकर्यतो यातव्यं रक्षितव्यं वा यानं वा सौकर्यात् कर्तव्यं रक्षणं वा, इति एवं कोटिद्वयोपस्थानात्, व्यसनचिन्ता व्यसनस्य गौरवलाघवचिन्तनमन्यतरकोटिनिर्धारणार्थं, क्रियत इति शेषः । तत्र

प्रकृतिव्यसनवर्ग इति प्रथमं सूत्रम् । प्रकृतयः स्वाम्यादयः सप्त तासां व्यसनवर्ग उच्यत इति सूत्रार्थः । व्यसनं सामान्यतो विभजंस्तत्कारणमाह — **दैवमिति** । दैवं जन्मान्तरीयकर्मजन्यं, मानुषं वा पुरुषबुद्धिजन्यं

G. P. T. 1562. 500. 24-6-99. B

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुणप्रातिलोम्यमभावः प्रदोषः प्रसङ्गः पीडा वा व्यसनम् । व्यस्यत्येनं श्रेयस इति व्यसनम् ।

स्वाम्यमात्यजनपददुर्गकोशदण्डमित्रव्यसनानां पूर्वं पूर्वं गरीय इत्याचार्याः ।

वा, प्रकृतिव्यसनं स्वाम्यादिव्यसनम्, अनयापनयाभ्याम् अनयेनाशुभविधिना अपनयेन सन्ध्यादिगुणानामयथावदनुष्ठानेन च, सम्भवति । तत्रानयकारणकमग्न्युदकादिभयम् अपनयकारणकं परचक्राद्युपद्रवः ।

व्यसनं विशेषतो विभजते — **गुणप्रातिलोम्यमिति** । महाकुलीनत्वादिगुणानां स्वानुरूपकार्यानारम्भकत्वं सन्धिविग्रहादीनामसम्यगनुष्ठानं वा, अभावः महाकुलीनत्वादीनामसत्त्वं सन्धिविग्रहादीनामननुष्ठानं वा, प्रदोषः प्रकृष्टो दोषो गुणन्यक्कारेण प्रगल्भमानः कोपादिः, प्रसङ्गः स्त्रीमृगयाद्यत्यासक्तिः, पीडा वा परचक्रादिभव आबाधश्च, व्यसनम् । व्यसनसंज्ञान्वर्थतां दर्शयति — **व्यस्यत्येनमित्यादि** । एनं जनं, श्रेयसः अर्थप्राप्त्यनर्थपरिहाररूपात्, व्यस्यति विक्षिपति दूरीकरोति इत्यतो, व्यसनम्, उच्यत इति शेषः । एषामादिमौ प्रकारौ गुणप्रातिलोम्यगुणाभावौ वक्ष्यमाणायां राजराज्यव्यसनचिन्तायां, प्रदोषप्रसङ्गौ पुरुषव्यसनवर्गे, पीडा च बलमित्रव्यसनवर्गेऽनुसन्धेयाः । तदिदं यथोक्तरूपं प्रकृतिव्यसनं स्वाम्यादिसप्तप्रकृत्याश्रयत्वेन सप्तात्मकं स्थितम् ।

अथ स्वामिव्यसनादीनां सप्तानां गौरवतारतम्यं यानादिकार्योपयुक्तमुपदेष्टुं सूत्रयति—**स्वाम्यमात्येत्यादि** । स्वामिव्यसनादीनां मित्रव्यसनान्तानां सप्तानां मध्ये, पूर्वं पूर्वं व्यसनं, गरीयः उत्तरोत्तरापेक्षया गुरुतरं भवति मित्रव्यसनाद् दण्डव्यसनं गरीयो दण्डव्यसनात् कोशव्यसनं कोशव्यसनाद् दुर्गव्यसनं दुर्गव्यसनाद् जनपदव्यसनं जनपदव्यसनादमात्यव्यसनम् अमात्यव्यसनाच्च स्वामिव्यसनमिति क्रमेण । इति आचार्याः पूर्वेऽर्थशास्त्रकाराः, आहुरिति शेषः । ते च वक्ष्यमाणभारद्वाजविशालाक्षाद्यतिरिक्ता ग्राह्याः, तद्विप्रतिपन्नानामंशानामनुपदमुद्घाट्य खण्डयिष्यमाणत्वात् । अत एव चाचार्यमतमिदमखण्डितत्वात् कौटल्यस्येष्टं द्रष्टव्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति भारद्वाजः। स्वाम्यमात्यव्यसनयोरमात्यव्यसनं गरीय इति। मन्त्रो मन्त्रफलावाप्तिः कर्मानुष्ठानमायव्ययकर्म दण्डप्रणयनमभित्राटवीप्रतिषेधो राज्यरक्षणं व्यसनप्रतीकारः कुमाररक्षणमभिषेकश्च कुमाराणामायत्तममात्येषु। तेषाम् अभावे तदभावः, छिन्नपक्षस्येवं राज्ञश्चेष्टानाशः। व्यसनेषु चासन्नाः परोपजापाः। वैगुण्ये च प्राणबाधः प्राणान्तिकचरत्वाद् राज्ञ इति।

नेति कौटल्यः। मन्त्रिपुरोहितादिभृत्यवर्गमध्यक्षप्रचारं पुरुषद्रव्यप्रकृतिव्यसनप्रतीकारमेधनं च राजैव करोति। व्यसनिषु वामात्ये-

---

तत्र भारद्वाजस्य विप्रतिपत्तिमुपन्यस्यति — नेति भारद्वाज इत्यादि। स्वाम्यमात्येत्यादिनाचार्यनिर्दिष्टे गरीयस्त्वक्रमे स्वाम्यमात्ययोः पौर्वापर्यविपर्ययः कर्तव्य इत्यर्थः। एकदेशविप्रतिपत्त्या च शेषसम्प्रतिपत्तिर्भारद्वाजस्य बोद्धव्या। एवं विशालाक्षादिविप्रतिपत्तिष्वपि द्रष्टव्यम्। अमात्यव्यसनगरीयस्त्वे भारद्वाजोक्तां युक्तिमाह — मन्त्र इति। मन्त्रः कार्याकार्यविमर्शनं, मन्त्रफलावाप्तिः कार्यनिर्द्धारणं, कर्मानुष्ठानं निर्धारितकार्यकरणम्, आयव्ययकर्म हिरण्याद्युत्पादनमुत्पादितहिरण्यविनियोगश्च, दण्डप्रणयनं सैन्यसमुत्थापनयथास्थानस्थापनादि, अमित्राटवीप्रतिषेधः अमित्राणामाटविकानां च स्वदेशहिंसनाद् वारणं, राज्यरक्षणं निजप्रजायोगक्षेमवहनं, व्यसनप्रतीकारः दैवमानुषविपत्प्रतिक्रिया, कुमाररक्षणं कुमारेभ्यो नृपस्य रक्षणं, कुमाराणामभिषेकश्च यौवराज्ये नवार्जितराज्ये वाभिषेचनं च, अमात्येषु आयत्तम् अमात्यैकसाध्यम्। तेषाम् अमात्यानाम्, अभावे, तदभावः मन्त्राद्यभावः। ततश्च छिन्नपक्षस्येव छिन्नपक्षस्य पक्षिण इव, राज्ञः चेष्टानाशः प्रवृत्तिलोपः, स्यादिति शेषः। व्यसनेषु च अमात्यानां व्यसनसम्भवे च, आसन्नाः परोपजापाः शत्रूपजापानर्थाः सन्निहिताः स्युः। वैगुण्ये च पूज्यापूजनदूष्यादरणलक्षणे विगुणाचारे च, राज्ञः प्राणबाधः प्राणनाशः स्यात्, कुतः, प्राणान्तिकचरत्वात् राजप्राणानिकटचरत्वादमात्यानाम्। अतस्तद्वैगुण्यमन्तिकचरा अमात्याः परिहरेयुरित्यर्थः। इतिशब्दो हेतौ। एवञ्च राज्ञः सर्वारम्भाणां जीवितस्य चामात्याधीनत्वादमात्या एव राजापेक्षया गरीयांस इति तद्व्यसनमेव गरीय इत्यभिप्रायः।

भारद्वाजोक्तं खण्डयति — नेति कौटल्य इत्यादि। मन्त्रिपुरोहितेत्यादिना स्वामीतीत्यन्तेन खण्डनयुक्तिप्रदर्शनम। मन्त्रिपुरोहितादिभृत्यवर्गं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्वन्यानव्यसनिनः करोति । पूज्यपूजने दूष्यावग्रहे च नित्ययुक्तस्तिष्ठति । स्वामी च सम्पन्नः स्वसम्पद्भिः प्रकृतीः सम्पादयति । स्वयं यच्छीलस्तच्छीलाः प्रकृतयो भवन्ति, उत्थाने प्रमादे च तदायत्तत्वात् । तत्कूटस्थानीयो हि स्वामीति ।

अमात्यजनपदव्यसनयोर्जनपदव्यसनं गरीय इति विशालाक्षः । कोशो दण्डः कुप्यं विष्टिर्वाहनं निचयाश्च जनपदादुत्तिष्ठन्ते । तेषामभावो जनपदाभावे । स्वाम्यमात्ययोश्चानन्तर इति ।

मन्त्रिपुरोहितसेनापतिप्रभृतिं भृत्यवर्गम्, अध्यक्षप्रचारं सुवर्णाध्यक्षादिसर्वविधाध्यक्षव्यवस्थापनं, पुरुषद्रव्यप्रकृतिव्यसनप्रतीकारं मन्त्र्यादीनां पुरुषप्रकृतीनां द्रव्यप्रकृतीनां जनपददुर्गकोशानां च व्यसनप्रतिक्रियाम्, एधनं च पुरुषद्रव्यप्रकृतीनामेव वर्धनं च, राजैव करोति । एतावतामात्याभावे राज्ञश्चेष्टानाशः प्रत्युक्तः । व्यसनिषु वा अमात्येषु जातेषु, अन्यान् अव्यसनिनः करोति अमात्यपदेषु स्थापयति । एतेन 'व्यसनेषु चासन्नाः परोपजापाः' इति यदुक्तं तत् प्रत्युक्तम् । पूज्यपूजने, दूष्यावग्रहे च दूष्याणां राज्योपघातिनां निग्रहणे च, नित्ययुक्तः नित्यावहितः, तिष्ठति । एतेन 'वैगुण्ये च प्राणबाध' इति समाहितम् । प्रकृतिगुणवत्तापि स्वामिगुणवत्तयैवाभिनिर्वर्तत इत्याह—**स्वामी चेत्यादि** । स च, सम्पन्नः गुणसमृद्धियुक्तः, स्वसम्पद्भिः स्वीयाभिर्गुणसमृद्धिभिः, प्रकृतीः, सम्पादयति सम्पद्वतीः करोति । स्वामिनः सम्पन्नत्वे तद्यत्नं विना स्वयमेव प्रकृतयः सम्पन्ना भवन्तीत्यभिप्रायेणाह—**स्वयं यच्छील इत्यादि । उत्थाने प्रमादे च तदायत्तत्वादिति** । प्रकृतयो हि स्वामिनमुत्तिष्ठमानमनूत्तिष्ठन्ति प्रमाद्यन्तं चानुप्रमाद्यन्तीत्यर्थः । तासां तदनुविधायित्वे कारणमाह—**तत्कूटस्थानीयो हि स्वामीतीति** । तासां कूटं मूलप्रकृतिः तत्स्थानीयो हि राजा, अर्थात् तद्विकृतिस्थानीयास्ताः ।

विशालाक्षस्य विप्रतिपत्तिमाह — **अमात्यजनपदेत्यादि** । अमात्यव्यसनाज्जनपदव्यसनस्य गरीयस्त्वे तदीयां युक्तिमाह — **कोश इत्यादि** । कोशो हिरण्यादिसमुदयः, दण्डो मौलभृतादि सैन्यं, कुप्यं वस्त्रास्तरणादि, विष्टिः कर्मकरवर्गः, वाहनं गजाश्वादि, निचयाश्च धान्यस्नेहादिसमुदयाश्च, जनपदाद्, उत्तिष्ठन्ते उद्भवन्ति । जनपदाभावे तेषां कोशादीनाम , अभावः । **स्वाम्यमात्ययोश्चानन्तर इति** । ततश्च जनपदः स्वाम्यमात्ययोरनन्तरः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः । अमात्यमूलाः सर्वारम्भाः जनपदस्य कर्मसिद्धयः स्वतः परतश्च योगक्षेमसाधनं व्यसनप्रतीकारः शून्यनिवेशोपचयौ दण्डकरानुग्रहश्चेति ।

जनपददुर्गव्यसनयोर्दुर्गव्यसनम् इति पाराशराः। दुर्गे हि कोशदण्डोत्पत्तिरापदि स्थानं च जनपदस्य । शक्तिमत्तराश्च पौरा जानपदेभ्यो नित्याश्चापदि सहाया राज्ञः । जानपदास्त्वमित्रसाधारणा इति।

नेति कौटल्यः । जनपदमूला दुर्गकोशदण्डसेतुवार्तारम्भाः ।

अव्यवहितः मध्यगतः, युक्त इति शेषः । तथाच 'स्वाम्यमात्यजनपददुर्गे'ति पठितं सूत्रं 'स्वामिजनपदामात्यदुर्गे'त्येवमेकदेशव्यत्ययेन पठितव्यमित्याशयः।

विशालाक्षमतं निराचष्टे—नेति कौटल्य इति । तत्र युक्तिमाह — **अमात्यमूला** इति । जनपदस्य, सर्वारम्भाः सर्वे व्यापाराः, अमात्यमूलाः । के ते, कर्मसिद्धयः सेतुवार्तादिकर्मनिष्पत्तयः, स्वतः परतश्च योगक्षेमसाधनं स्वजनात् शत्रुजनाच्च योगक्षेमयोरलब्धलाभलब्धपालनयोर्निष्पादनं, व्यसनप्रतीकारः प्रकृतिव्यसनप्रतिक्रिया, शून्यनिवेशोपचयौ शून्यदेशे ग्रामादिनिवेशनं निवेशितपरिवर्धनं च, दण्डकरानुग्रहश्च दण्डस्य उत्तमसाहसादेः करस्य राजभागस्य च अनुग्रहः ग्रहणानुवृत्तिश्च, इति ।

पाराशराणां विप्रतिपत्तिमाह — **जनपदेत्यादि** । जनपदव्यसनदुर्गव्यसनयोर्मध्ये दुर्गव्यसनं गुरुतरमिति पराशरशिष्याः । 'स्वाम्यमात्यजनपददुर्गकोशे'त्येतत् 'स्वाम्यमात्यदुर्गजनपदकोशे'ति किञ्चिद्व्यत्ययेन पठनीयमित्याशयः । तत्र युक्तिरुच्यते — **दुर्गे हीति** । दुर्गं स्थानीयं तस्मिन्, दुर्गाद्धीति क्वचित् पाठः । कोशदण्डोत्पत्तिः धनसमुदायबलोत्पत्तिः, आपदि स्थानं च जनपदस्य जानपदानां परचक्रभयादौ रक्षाभूमिश्च, पौराः जानपदेभ्यः, शक्तिमत्तराश्च अतिशयेन शक्तिमन्तश्च, नित्याश्च सर्वकालानुवर्तिनश्च, आपदि सहायाः, राज्ञः, सुलभा इति शेषः । नैवं जानपदा इत्याह—**जानपदास्त्विति** । ते तु, अमित्रसाधारणाः पराक्रम्यागतं शत्रुमप्यनुवर्तन्त इत्यर्थः। इति ।

पाराशरमतं प्रत्याचष्टे—नेति कौटल्य इति । तत्र युक्तिमाह— **जनपदेत्यादि** । दुर्गकोशदण्डसेतुवार्तारम्भाः दुर्गस्य स्थानीयादेः कोशस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः । कोशमूलो हि दण्डः । कोशाभावे दण्डः परं गच्छति, स्वामिनं वा हन्ति । सर्वाभियोगकरश्च कोशो धर्मकामहेतुः । देशकालकार्यवशेन तु कोशदण्डयोरन्यतरः प्रमाणीभवति । लम्भपालनो हि दण्डः कोशस्य । कोशः कोशस्य दण्डस्य च भवति । सर्वद्रव्यप्रयोजकत्वात् कोशव्यसनं गरीय इति ।

दण्डमित्रव्यसनयोर्मित्रव्यसनम् इति वातव्याधिः । मित्र-

दानेन, परभूमिस्वयंग्रहेण वा शत्रोरभियुक्तस्य देशे 'येन यत् स्वयं गृह्यते तत् तदीयं धनमि'ति संवित्कल्पनया वा, दण्डः, पिण्डयितुं संग्रहीतुं, शक्यः । दण्डे संगृहीते कोशस्तेनैव सुसाध इत्याह — **दण्डवता च कोश इति** । पिण्डयितुं शक्य इति सम्बध्यते । दण्डः स्वामिन आसन्नवर्तनेन सर्वकार्यनिर्वाहकत्वादमात्यस्थानीय इत्याह — **स्वामिनश्चासन्ने**त्यादि ।

भीष्ममतं निराकरोति — **नेति कौटल्य** इत्यादि । युक्तिमाह — **कोशमूलो हि दण्ड** इति । कोशसंग्राह्य एव दण्डो नोपायान्तरसंग्राह्यः । **कोशाभाव** इति । तद्विरहे, दण्डः परं गच्छति संगृहीतमपि दण्डं परः कोशदानेन स्वायत्तं करोतीत्यर्थः । स्वामिनं वा हन्ति अर्थात् कोशालाभकुपितः । **सर्वाभियोगकरश्चे**ति । सर्वसामन्तविषयाभियोगनिर्वाहकश्च, सर्वाभियोगतारक इति पाठे सर्वेषां सामन्तानामभियोगाद् विरोधात् तारको रक्षक इत्यर्थः, कोशः, धर्मकामहेतुः । यदुक्तं दण्डस्य प्राधान्यं पूर्वपक्षिणा तद् देशकालकार्यानुसारात् कोशसाधारणमङ्गीकरोति—**देशकालकार्यवशेन त्वि**त्यादि । देशवशेन कालवशेन कार्यवशेन च कदाचित् कोशः कार्यसाधको भवति कदाचिद् दण्ड इत्यर्थः । एवं स्थितेऽपि कोशस्य दण्डाद् व्यतिरेकमाह — **लम्भपालनो हीति** । दण्डः, कोशस्य लम्भपालनः लाभरक्षकः अर्थालब्धकोशरक्षकः । कोशः, कोशस्य दण्डस्य च, भवति अर्थात् पालनः । एकदेशानुवृत्तिर्वा पालन इति । एतावता सिद्धमाह— **सर्वद्रव्यप्रयोजकत्वादिति** । सर्वद्रव्येषु सर्वासु द्रव्यप्रकृतिषु प्रयोजकत्वात् कार्यकारित्वात्, कोशव्यसनं, गरीयः । इति ।

अथोद्धवमतं सप्तममाह — **दण्डमित्रव्यसनयोरित्यादि** । 'स्वाम्यमात्यजनपददुर्गकोशदण्डमित्रव्यसनानामि'त्येतत् 'स्वाम्यमात्यजनपददुर्गकोशमित्रदण्डव्यसनानामि'ति किञ्चिद् व्यत्ययेन पठनीयमित्यर्थः । तत्र युक्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभृतं व्यवहितं च कर्म करोति, पार्ष्णिग्राहमासारममित्रमाटविकं च प्रतिकरोति, कोशदण्डभूमिभिश्चोपकरोति व्यसनावस्थायोगमिति।

नेति कौटल्यः। दण्डवतो मित्रं मित्रभावे तिष्ठत्यमित्रो वा मित्रभावे। दण्डमित्रयोस्तु साधारणे कार्ये सारतः स्वयुद्धदेशकाललाभाद् विशेषः। शीघ्राभियाने त्वमित्राटविकाभ्यन्तरकोपे च न मित्रं विद्यते। व्यसनयौगपद्ये परवृद्धौ च मित्रमर्थयुक्तौ तिष्ठति।

प्रकृतिव्यसनसम्प्रधारणमुक्तमिति।

प्रदर्शनं — मित्रमित्यादिना। मित्रम्, अभृतम् अदत्तवेतनं, व्यवहितं च आत्मानवहितं च सत्, कर्म करोति। दण्डस्तु भृतश्च समक्षितश्च कर्म करोतीत्यार्थम्। पार्ष्णिग्राहमित्यादि। पृष्ठशत्रुम्, आसारं पार्ष्णिग्राहमित्रम्, अमित्रम्, आटविकं च, प्रतिकरोति वारयति। कोशदण्डभूमिभिश्च कोशादिदानेन च, उपकरोति। कथम्भूतं सत्, व्यसनावस्थायोगं व्यसनावस्थायाम् आपद्दशायां योग आत्मना सह संगतिर्यस्य तत् तथाभूतं सत्। इति।

तदपि मतं प्रत्याचष्टे — **नेति कौटल्य** इति। तत्र युक्तिमाह — **दण्डवत** इत्यादि। मित्रं वा अमित्रो वा दण्डवतो नृपस्य भवति, दण्डाभावे मित्रामित्रव्यवहार एव नास्तीत्यर्थः। **दण्डमित्रयोस्त्वित्यादि**। दण्डमित्रयोरुभयोः कार्यसाधकत्वे बलतः समाने स्वानुगुणयुद्धभूमिकाललाभानुसारेणान्यतरप्रमाणीकरणलक्षणो विशेषो भवतीत्यर्थः। एवं सति दण्डस्य मित्राद् व्यतिरेकमाह — **शीघ्राभियाने त्विति**। शत्रुमुद्दिश्याभियाने शीघ्रमनुष्ठातव्ये, अमित्राटविकाभ्यन्तरकोपे च अमित्राणाम् आटविकानाम् आभ्यन्तराणाम् अभ्यन्तरगतानां दूष्यादीनां च कोपे विकारे च सद्यः शमयितव्ये समुपस्थिते, मित्रं न विद्यते दूरस्थत्वादुपकारक्षमं न भवति। दण्डस्तु सन्निहितत्वादुपकारक्षमो भवतीत्याशयः। व्यसनयौगपद्ये शत्रुविजिगीष्वोर्युगपदापत्सम्भवे, परवृद्धौ च विजिगीष्वपेक्षया शत्रोर्वृद्धियुक्तत्वे च, मित्रम्, अर्थयुक्तौ तिष्ठति अर्थलाभमेवात्मनो गणयति, परादधिकमर्थं गृहीत्वा तत्पक्षं प्रविशतीत्यर्थः। एवञ्च सर्वकालोपकारकतया दण्डस्य मित्राद् गरीयस्त्वसिद्धेर्दण्डव्यसनमेव मित्रव्यसनाद् गुरुतरमिति सिद्धम्।

प्रकृतीत्यादि। प्रकृतिव्यसनानां परस्परापेक्षगौरवलाघवनिर्धारणमित्थं व्याख्यातम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकृत्यवयवानां तु व्यसनस्य विशेषतः ।
बहुभावोऽनुरागो वा सारो वा कार्यसाधकः ॥
द्वयोस्तु व्यसने तुल्ये विशेषो गुणतः क्षयात् ।
शेषप्रकृतिसाद्गुण्यं यदि स्यान्नाभिधेयकम् ॥

योऽयं स्वाम्यादिप्रकृतिविशेषसप्तकसम्बन्धिनां व्यसनानां परस्परगुरुलघुभावः यानादिकार्योपयोगी कथितः, तस्य क्वचिदप्रयोजकत्वमाह — **प्रकृत्यवयवानां** त्विति । प्रकृतीनां स्वाम्यादीनाम् अवयवाः यथा — स्वामिनो राजयुवराजादयः अमात्यस्य मन्त्रिमन्त्रपरिषदादयः जनपदस्य कर्षकायुधीयादयः दुर्गस्य धान्वनवनादयः कोशस्य रत्नसारफल्गवादयः दण्डस्य मौलभृतादयः मित्रस्य सहजकृत्रिमादयः इत्येतेषां, व्यसनस्य, विशेषतः इतरापेक्षया गरीयस्त्वरूपे विशेषे विद्यमानेऽपि, बहुभावः जनादिबहुत्वम्, अनुरागः स्वामिभक्तिः, सारो वा प्रशस्तगुणयोगो वा, कार्यसाधकः यानादिकार्यसिद्धिकरः । तद्यथा — दुर्गव्यसनवति शत्रौ दुर्गव्यसनाद् गुरुतरं जनपदव्यसनं प्राप्तोऽपि विजिगीषुर्जनपदावयवानां बहुभावानुरागादिसत्त्वे दुर्गावयवानां च तदसत्त्वे यानादिकमनुतिष्ठेत्, तच्च सिद्धिकरं स्यादिति ॥

इदं शत्रुविजिगीष्वोर्व्यसनैक्ये उक्तम् । व्यसनतुल्यतायां त्वाह — **द्वयोस्त्विति** । शत्रुविजिगीष्वोरुभयोः, व्यसने तुल्ये, गुणतः एकत्र बहुभावानुरागादिगुणसद्भावात्, क्षयात् अन्यत्र तथाविधगुणविरहाच्च, विशेषः यानानुष्ठानलक्षणः, अध्यवसेय इति शेषः । तद्यथा —शत्रुविजिगीषू द्वावपि जनपदव्यसनवन्तौ । तत्र विजिगीषोर्जनपदावयवानां बहुभावानुरागादिसत्त्वे शत्रोर्जनपदावयवानां तदभावे च विजिगीषुर्यानमनुतिष्ठेत् तच्च कार्यसिद्धिकरं स्यादेवेत्यभिप्रायः । यथोक्तबहुभावानुरागादिगुणसत्त्वासत्त्वनिमित्तश्चायं विशेषः किं सर्वत्रैव भवति, नेत्याह — **शेषेत्यादि** । शेषप्रकृतिसाद्गुण्यं शेषाणां यत्प्रकृतिविषयं व्यसनं शत्रुविजिगीष्वोस्तुल्यं तदतिरिक्तानां प्रकृतीनां — जनपदव्यसने तुल्ये तदतिरिक्तानां स्वाम्यमात्यादिप्रकृतीनां — साद्गुण्यं 'जानपदोऽभिजातः' इत्यादिगुणसमृद्धत्वरूपम्, अभिधेयकम् अभिधानविषयभूतं पूर्वोक्तमित्यर्थः, न स्याद् यदि अर्थाच्छत्रोर्न भवेच्चेत् । तदैव स विशेष इत्यर्थः । परस्य शेषप्रकृतिसाद्गुण्ययोगे तु बहुभावानुरागादिसद्भावोऽपि विजिगीषोरप्रयोजक इत्यभिप्रायः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शेषप्रकृतिनाशस्तु यत्रैकव्यसनाद् भवेत् ।
व्यसनं तद् गरीयः स्यात् प्रधानस्येतरस्य वा ॥

इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे
प्रथमोऽध्यायः प्रकृतिव्यसनवर्गः,
आदितः सप्तदशशततमः ॥

यत्रैकप्रकृतिविषयं व्यसनं शेषप्रकृतिविनाशहेतुः स्यात्, तत्र तद् व्यसनं प्रधानप्रकृतिसम्बद्धं वा भवतु अप्रधानप्रकृतिसम्बद्धं वा, सर्वथा तद् गुरुतरमेवेत्याह — शेषप्रकृतिनाशस्त्वित्यादि ॥

इति कौटलीयार्थशास्त्रव्याख्यायां व्यसनाधिकारिकेऽष्टमाधिकरणे
प्रथमोऽध्यायः प्रकृतिव्यसनवर्गः,
आदितः सप्तदशोत्तरशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१२८. प्रक. राजराज्ययोर्व्यसनचिन्ता ।

राजा राज्यमिति प्रकृतिसंक्षेपः ।

राज्ञोऽभ्यन्तरो बाह्यो वा कोप इति । अहिभयादभ्यन्तरः कोपो बाह्यकोपात् पापीयान् । अन्तरमात्यकोपश्चान्तःकोपात् । तस्मात् कोशदण्डशक्तिमात्मसंस्थां कुर्वीत ।

द्वैराज्यवैराज्ययोः । द्वैराज्यमन्योन्यपक्षद्वेषानुरागाभ्यां परस्पर-

---

राजराज्ययोर्व्यसनचिन्ता इति सूत्रम् । राजा अभिषिक्तः स्वामी विजिगीषुमित्राद्यवस्थः राज्यम् अमात्यादिप्रकृतिपञ्चकं तयोः व्यसनचिन्ता व्यसनानां गुरुलघुभावसम्प्रधारणा क्रियत इति सूत्रार्थः । स्वाम्यादिप्रकृतीर्द्विश उपादाय तद्व्यसनानां परस्परगुरुलघुभावः पूर्वप्रकरणे चिन्तितः, इह तु स्वामी एको राशिः शेषप्रकृतिसमुदायोऽपर इति द्वैराश्येन गृहीत्वा तद्व्यसनावान्तरभेदानां स विचार्यते ।

तदेतदभिसन्धायाह— राजेति । प्रकृतिसंक्षेपः प्रकृतीनां स्वाम्यादीनां सप्तानां संक्षेपः समष्टिः, राजा राज्यमिति, द्वैराश्येन विभज्यत इति शेषः । तत्र राजा स्वामी विजिगीषुमित्रोभयरूपः राज्यम् अमात्यादिद्रव्यप्रकृतिपञ्चकम् ।

तत्र राजव्यसनहेतुभूतयोः राज्यव्यसनभेदयोर्गुरुलघुभावं चिन्तयति— राज्ञ इत्यादि । राजानं प्रति राज्यस्य आभ्यन्तरो बाह्य इति द्वौ कोपौ । तत्राद्योऽमात्यादिकोपो द्वितीयोऽरिकोपः । तयोर्मध्ये कतरो गुरुतर इति चिन्त्यत इत्यर्थः । निर्धारयति — अहिभयादिति । अभ्यन्तरकोपो बाह्यकोपात् पापीयान् अतिशयेनानर्थावहः, कुतः, अहिभयात् आसन्नसर्पभयसधर्मत्वात् । अभ्यन्तरकोपेऽपि विशेषमाह — अन्तरमात्यकोपश्चान्तःकोपादिति । अभ्यन्तरकोपोऽपि द्विरूप आन्तरामात्यकोपो बाह्यामात्यकोप इति, तत्राद्योऽन्यस्मादन्तःकोपात् पापीयानित्यर्थः । तस्मात् उक्तकोपद्वयपापीयस्त्वाद्धेतोः, कोशदण्डशक्तिं कोशदण्डयोस्तत्प्रशमनसाधनयोर्विषये या शक्तिः प्रयोगप्रभविष्णुता ताम्, आत्मसंस्थाम् आत्मनि प्रतिष्ठितां स्वायत्तां, कुर्वीत ।

एवं राज्यकोपजं राजव्यसनं तत्परिहारोपायं चाभिधाय राजनिमित्तं राज्यस्य व्यसनमाह — द्वैराज्यवैराज्ययोरिति । द्वैराज्यं द्विस्वामिकत्वं वैराज्यं विगतस्वामिकत्वं तयोः, चिन्ता क्रियत इति शेषः । तदुभयगुरुलघुभावश्चिन्त्यत इत्यभिप्रायः । तत्राचार्यमतमाह — द्वैराज्यमिति । तत्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सङ्घर्षेण वा विनश्यति । वैराज्यं तु प्रकृतिचित्तग्रहणापेक्षि यथास्थितमन्यैर्भुज्यत इत्याचार्याः ।

नेति कौटल्यः । पितापुत्रयोर्भ्रात्रोर्वा द्वैराज्यं तुल्ययोगक्षेममात्यावग्रहं वर्तयेतेति । वैराज्ये तु जीवतः परस्याच्छिद्य 'नैतन्मम' इति मन्यमानः कर्शयत्यपवाहयति, पण्यं वा करोति, विरक्तं वा परित्यज्य अपगच्छतीति ।

अन्धश्चलितशास्त्रो वा राजेति । अशास्त्रचक्षुरन्धो यत्किञ्चनकारी दृढाभिनिवेशी परप्रणेयो वा राज्यमन्यायेनोपहन्ति, चलितशास्त्रस्तु यत्र शास्त्राच्चलितमतिर्भवति, शक्यानुनयो भवतीत्याचार्याः ।

अन्योन्यपक्षद्वेषानुरागाभ्यां परस्परपक्षयोर्द्वेषानुरागाभ्यां, परस्परसंघर्षेण वा मिथः स्पर्धया वा, विनश्यति । वैराज्ये गुणमाह—वैराज्यमिति । तत्, प्रकृतिचित्तग्रहणापेक्षि प्रजाचित्तज्ञानानुरोधिप्रवृत्तिकं, यथास्थितं केनाप्यव्याकुलितं, अन्यैः भुज्यते प्रजाभिरनुभूयते । अतश्च वैराज्याद् द्वैराज्यं पापीय इत्याशयः । इत्याचार्याः, मन्यन्त इति शेषः ।

तन्मतं निराकरोति— नेति कौटल्य इति । तत्र युक्तिमाह— पितापुत्रयोरित्यादि । अयमर्थः—द्वैराज्यं नाम पितापुत्रयोर्भ्रात्रोर्वा दायभागिनोः परस्परेण विरोधाद् भवति । तच्चाभिन्नयोगक्षेमत्वादमात्यैरेव राज्ययोगक्षेमनिर्वहणसहायभूतैः प्रतिषिध्येतेति नातिगणनीयो द्वैराज्ये दोष इति । वैराज्ये पुनर्महान्तं दोषमाह — वैराज्ये त्वित्यादि । अयमर्थः — विजिगीषुर्जीवन्तं शत्रुमनादृत्य बलापहृततदीयराज्यस्तस्मिन् राज्ये यदि ममकारं न करोति, तदा तद् दण्डकरादिभिः कर्शयति, अन्यत्र नयति, मूल्यग्रहणेन वा यस्मैकस्मैचिद् विक्रीणीते । यद्यात्मनि तद् विरक्तं भवति, तदापहृतसर्वसारं तत् परित्यज्यापैतीति महते दुःखाय स्यादिति ।

राज्यव्यसनस्यावान्तरभेदं चिन्तयति — अन्ध इत्यादि । अन्धः अनधीतशास्त्रो राजा, चलितशास्त्रोऽधीताननुरुद्धशास्त्रो राजा, तयोर्मध्ये को वा श्रेयानिति विचार्यत इत्यर्थः । तत्राचार्यमतेन निर्णयमाह—अशास्त्रेत्यादि । अशास्त्रचक्षुः शास्त्रात्मकचक्षुर्हीनः, अन्धः, यत्किञ्चनकारी असमीक्षापूर्वकारी, दृढाभिनिवेशी अनिवार्यदुष्कर्माभिनिवेशः, परप्रणेयो वा परबुद्ध्यधीनप्रवृत्तिको वा भवन्, अन्यायेन राज्यम् उपहन्ति । चलितशास्त्रस्त्विति । स तु,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः । अन्धो राजा शक्यते सहायसम्पदा यत्र तत्र वा पर्यवस्थापयितुमिति । चलितशास्त्रस्तु शास्त्रादन्यथाभिनिविष्टबुद्धिरन्यायेन राज्यमात्मानं चोपहन्तीति ।

व्याधितो नवो वा राजेति । व्याधितो राजा राज्योपघातममात्यमूलं प्राणाबाधं वा राज्यमूलमवाप्नोति, नवस्तु राजा स्वधर्मानुग्रहपरिहारदानमानकर्मभिः प्रकृतिरञ्जनोपकारैश्चरतीत्याचार्याः ।

यत्र विषये, शास्त्रात् चलितमतिर्भवति, तत्र शक्यानुनयः शक्यः सुकरः अनुनयः सान्त्वपूर्वं वारणं यस्य स तथाभूतो भवति । इत्याचार्याः ।

तन्मतप्रतिषेधपूर्वं स्वमतमाह — **नेति कौटल्य** इत्यादि । अन्धो राजा अमात्यादिसहायगतया प्राज्ञत्वादिगुणसम्पदा यत्र हितायां प्रवृत्तौ पर्यवस्थापयितुमिष्टस्तत्र शक्यः पर्यवस्थापयितुम् । चलितशास्त्रस्तु शास्त्रप्रतिषिद्धकर्माभिनिवेशदोषाद् वारयितुमशक्योऽन्यायेन राज्यं चात्मानं च नाशयतीत्यर्थः ।

अन्यं विचारमाह — **व्याधित** इति । व्याधिग्रस्तः, नवो वा अचिराभिषिक्तो वा, राजा, श्रेयानिति विचार्यते । तत्राचार्यमतमाह — **व्याधितो राजेति** । सः, अमात्यमूलं राजभयाभावनिरङ्कुशवृत्तिभिरमात्यैर्जनितं, राज्योपघातम्, अवाप्नोति । राज्यमूलं प्राणाबाधं वा अमात्यादिप्रकृतिषट्ककृतं स्वप्राणनाशं वावाप्नोति । नवो राजा तु, स्वधर्मादिभिः स्वधर्मः शास्त्रोक्तराजधर्मानुष्ठानम् अनुग्रहः स्वकोशोपकारः परिहारः करमोक्षणं दानं कृतकर्मणां भूम्याद्यर्पणं मानः सत्कारः कर्म पूर्तादिप्रवर्तनम् इत्येतैः, प्रकृतिरञ्जनोपकारैः प्रकृत्यनुरागोत्पादनोपायैः, चरति व्यवहरति, इत्याचार्याः ।

नेति कौटल्य इति । प्रतिषेधे उपपत्तिमाह — **व्याधितो राजेति** । सः, यथाप्रवृत्तं पूर्वप्रवृत्तप्रकारं, राजप्रणिधिं राजव्यापारम्, अनुवर्तयति । नवो राजा तु, इदं राज्यं, मम बलावर्जितं स्वबलोपार्जितम्, इति, मन्यमान इति शेषः, अनवग्रहः निरङ्कुशः, यथेष्टं स्वच्छन्दं, चरति । वा अथवा, सामुत्थायिकैः सामवायिकैः, अवगृहीतः परतन्त्रतां नीतः, राज्योपघातं सामवायिकमूलं, मर्षयति सहते न तु प्रतिकर्तुं शक्नोतीत्यर्थः । प्रकृतिषु विषये, अरूढः नवत्वेनानुपजातस्नेहः, सुखः समुच्छेत्तुं भवति परेणोच्छेत्तुमनायासशक्यो भवति । एवञ्च नवाद् व्याधितस्य श्रेयस्त्वं सिद्धम् । व्याधितविषयेऽपि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः। व्याधितो राजा यथाप्रवृत्तं राजप्रणिधिमनुवर्तयति। नवस्तु राजा 'बलाबर्जितं मयेदं राज्यम्' इति यथेष्टमनवग्रहश्चरति। सामुत्थायिकैरवगृहीतो वा राज्योपघातं सर्पयति। प्रकृतिष्वरूढः सुखः समुच्छेत्तुं भवति। व्याधिते विशेषः — पापरोग्यपापरोगी च।

नवेऽप्यभिजातोऽनभिजात इति। दुर्बलोऽभिजातो बलवाननभिजातो राजेति। दुर्बलस्याभिजातस्योपजापं दौर्बल्यापेक्षाः प्रकृतयः कृच्छ्रेणोपगच्छन्ति। बलवतश्चानभिजातस्य बलापेक्षाः सुखेन इत्याचार्याः।

नेति कौटल्यः। दुर्बलमभिजातं प्रकृतयः स्वयमुपनमन्ति, जात्यमैश्वर्यप्रकृतिरनुवर्तत इति। बलवतश्चानभिजातस्योपजापं विसंवादयन्ति — अनुरागे सार्वगुण्यम् इति।

न सामान्यग्रहणं, किन्तु व्याधितविशेषस्यैवापापरोगिलक्षणस्य स्वमते ग्रहणमित्यभिप्रायं मनसि निधाय पापरोगी अपापरोगी चेत्येवं व्याधिते विशेषमाचष्टे — व्याधिते विशेष इत्यादि। पापरोगः कुष्ठादिः तद्वान् पापरोगी।

नवेऽप्यवान्तरभेदं विमर्शार्थमाह — नवेऽपीत्यादि। विशेष इत्यनुवर्तते। तत्राभिजातो दुर्बलो वा गरीयान् बलवाननभिजातो वेति चिन्तयति — दुर्बल इत्यादि। आचार्यमतेन निर्णयमाह — दुर्बलस्येत्यादि। अभिजातस्यापि सतो दुर्बलस्योपजापं प्रकृतयो दौर्बल्यावज्ञया कृच्छ्रादङ्गीकुर्वन्ति, बलवतस्त्वनभिजातस्यापि बलबहुमानात् सुखेनाङ्गीकुर्वन्तीति बलवाननभिजात एव गरीयानित्यभिप्रायः।

आचार्यमतं निषेधन् स्वमतमाह — नेति कौटल्य इत्यादि। युक्तिमाह — दुर्बलमिति। बलरहितम्, अभिजातं राजानं, प्रकृतयः, स्वयम् उपनमन्ति अप्रार्थ्यमाना अप्याभिजात्यानुरागादुपगम्याश्रयन्ति। कुतः, जात्यं कुलोत्पन्नम्, ऐश्वर्यप्रकृतिः ऐश्वर्यार्हता, अनुवर्तत इति हेतोरित्यर्थः। बलवतश्च, अनभिजातस्य अजात्यस्य, उपजापं, विसंवादयन्ति नानुवर्तन्ते। कुतः, अनुरागे सार्वगुण्यमिति अनुरागे सति सर्वगुणयोगित्वं प्रतीयत इति हेतोः। इह 'अनुयोगे सादृगुण्यमि'त्यपपाठः। एवञ्च प्रकृतय आभिजात्यानुरागाद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रयासवधात् सस्यवधो मुष्टिवधात् पापीयान् ।
निराजीवत्वादवृष्टिरतिवृष्टित इति ।
द्वयोर्द्वयोर्व्यसनयोः प्रकृतीनां बलाबलात् ।
पारम्पर्यक्रमेणोक्तं याने स्थाने च कारणम् ॥

इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे
द्वितीयोऽध्यायः राजराज्ययोर्व्यसनचिन्ता,
आदितोऽष्टादशशततमः ॥

भिजाते सार्वगुण्यं पश्यन्त्यस्तमुपनमन्ति, अनभिजातं त्वनुरागाभावान्नोपनमन्तीत्याशयः । इत्थं राजहेतुकं राज्यव्यसनं व्याख्यातम् ।

परचक्रहेतुकं व्यसनमाह — **प्रयासवधादिति** । सस्यवधः निष्पन्नसस्यनाशनं, मुष्टिवधात् मुष्टिर्बीजवापः तस्याकरणात्, पापीयान्, कुतः, प्रयासवधात् धान्यालाभहेतुत्वसाम्येऽपि उदकपायनपालनादिरूपपरिश्रमनैष्फल्यहेतुत्वेनाधिकेन योगात् ।

दैवकृतं व्यसनमाह—**निराजीवत्वादिति** । इह पापीयानित्यनुवृत्तं स्त्रीलिङ्गतया विपरिणम्यते । अवृष्टिः, अतिवृष्टितः, पापीयसी, कस्मात्, निराजीवत्वात् उदकाधीनाजीवोच्छेदप्रयोजकत्वात् । इतिशब्दो विचारसमाप्तौ ।

एवं निर्णीतो द्विद्विप्रकृतिपरस्परगुरुलघुभावः क्वोपयुज्यत इत्याह — **द्वयोर्द्वयोरित्यादि** । **याने स्थाने च कारणमिति** । शत्रुव्यसनापेक्षया स्वव्यसनस्य लघुत्वं विजिगीषोर्याने प्रयोजकं गुरुत्वं तु स्थाने इत्येवं यानस्थानव्यवस्थापकतया बलाबलमुपयुज्यत इति भावः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां व्यसनाधिकारिकेऽष्टमाधिकरणे
द्वितीयोऽध्यायः राजराज्ययोर्व्यसनचिन्ता,
आदितोऽष्टादशोत्तरशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१२९. प्रक. पुरुषव्यसनवर्गः।

अविद्याविनयः पुरुषव्यसनहेतुः। अविनीतो हि व्यसनदोषान् न पश्यति।

तानुपदेक्ष्यामः कोपजस्त्रिवर्गः, कामजश्चतुर्वर्गः।

तयोः कोपो गरीयान्। सर्वत्र हि कोपश्चरति, प्रायशश्च कोपवशा राजानः प्रकृतिकोपैर्हताः श्रूयन्ते, कामवशाः क्षयव्ययनिमित्तमरिव्याधिभिः इति।

नेति भारद्वाजः। सत्पुरुषाचारः कोपः। वैरयातनमवज्ञावधो

पुरुषव्यसनवर्ग इति सूत्रम्। पुरुषसामान्यस्य यानि व्यसनानि व्यसनप्रभवा दोषास्तेषां वर्गोऽभिधीयत इति सूत्रार्थः।

पुरुषस्य व्यसने कारणमाह —**अविद्याविनय** इति। विद्यासु आन्वीक्षिक्यादिषु विनयः शिक्षा विद्याविनयः तस्याभावः अविद्याविनयः, पुरुषव्यसनहेतुः। हेतुत्वमुपपादयति — **अविनीतो हीत्यादि**। पुरुषस्य व्यसने प्रवृत्तिस्तज्जन्यदोषाज्ञानाद् भवति, अज्ञानं विद्याशिक्षणाभावकृतमित्यर्थः।

व्यसनदोषान् प्रतिज्ञापूर्वमुपदिशति—**तानुपदेक्ष्याम** इत्यादि। तत्र वाक्पारुष्यमर्थदूषणं दण्डपारुष्यं च त्रिवर्गः, मृगया द्यूतं स्त्रियः पानमिति चतुर्वर्गः। उभयोः संकलनया च व्यसनदोषाः सप्त सम्पद्यन्त इति बोद्धव्यम्।

तयोरिति। वर्गद्वयोत्पादकयोः कामकोपयोर्मध्ये, कोपो गरीयान्, कोपज इति नयचन्द्रिकापाठे तयोः कामजकोपजयोर्वर्गयोरिति व्याख्येयम्। गरीयस्त्वे हेतुमाह— **सर्वत्र हीत्यादि**। कोपो हि सर्वविषयः कामस्तु स्त्र्यादिप्रतिनियतविषयत्वादसर्वविषय इत्यसार्वत्रिकं काममपेक्ष्य सार्वत्रिकः कोपो गुरुतरः। ततश्च तज्जन्यस्त्रिवर्गोऽपि गुरुतर इति भावः। हेत्वन्तरमाह — **प्रायशश्चेत्यादि**। **क्षयव्ययनिमित्तमरिव्याधिभिरित्यादि**। कोशदण्डहानिं शरीरपरिहानिं च निमित्तीकृत्य शत्रुभिर्व्याधिभिश्च हताः श्रूयन्त इत्यर्थः। एवञ्चारिव्याधिहननापेक्षया पापीयसः प्रकृतिकोपहननस्य कोपो निमित्तं भवतीत्यतोऽपि हेतोः कोपो गरीयानित्यभिप्रायः।

नेति भारद्वाज इति। कोपः कामश्च न दोष इति द्रोणाचार्यो मन्यत इत्यर्थः। **सत्पुरुषाचार** इत्यादिना तत्र हेतून्यासः। कोपः, सत्पुरुषाचारः सत्पुरुषधर्मो भवति। उपादेयं कोपसाध्यमाह — वैरयातनं वैरप्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भीतमनुष्यता च। नित्यश्च कोपसम्बन्धः पापप्रतिषेधार्थः। कामः सिद्धिलाभः। सान्त्वं त्यागशीलता सम्प्रियभावश्च। नित्यश्च कामेन सम्बन्धः कृतकर्मणः फलोपभोगार्थ इति।

नेति कौटल्यः। द्वेष्यता शत्रुवेदनं दुःखासङ्गश्च कोपः। परिभवो द्रव्यनाशः पाटच्चरद्यूतकारलुब्धकगायनवादकैश्चानर्थैः संयोगः कामः।

तयोः परिभवाद् द्वेष्यता गरीयसी, परिभूतः स्वैः परैश्चावगृह्यते, द्वेष्यः समुच्छिद्यत इति। द्रव्यनाशाच्छत्रुवेदनं गरीयः, द्रव्य-

---

क्रिया, अवज्ञावधः परकृतावहेलनवारणं, भीतमनुष्यता च यमुद्दिश्यापकारकरणाद् भीता मनुष्याः स भीतमनुष्यस्तत्ता च, कोपात् सिध्यतीति वाक्यशेषः। पापप्रतिषेधार्थः दुर्जननिग्रहार्थः, कोपसम्बन्धः कोपस्वीकारः, नित्यश्च अवर्जनीयश्च सत्पुरुषस्य। कामं प्रत्याह — काम इति। सः, सिद्धिलाभः सुखलाभहेतुः। तदधीनान् पुरुषस्य गुणानाह — सान्त्वं सूनृतभाषित्वं, त्यागशीलता दानशौण्डत्वं, सम्प्रियभावश्च सौम्यत्वं च, जायत इति शेषः। कृतस्य प्रयत्नस्य तत्फलानुभवार्थं कामेन सम्बन्धः पुरुषावर्जनीयश्चेत्याह — नित्यश्चेत्यादि। इतिशब्दो हेत्वर्थः।

तदिदं भारद्वाजमतं निषेधति — नेति कौटल्य इति। भारद्वाजेन यदुक्तं तन्न, कोपकामौ न गुणौ, किन्तु दोषावेवेत्यर्थः। कोपजान् महानर्थान् आह — द्वेष्यतेति। द्वेष्यता सर्वद्वेषविषयता, शत्रुवेदनं शत्रुलाभः, दुःखासङ्गश्च दुःखयोगश्च, कोपः आयुर्घृतमितिवत् कार्यकारणयोरभेदोपचाराद् द्वेष्यतादिनिमित्तं कोप इत्यर्थः। एवं कोपजदोषत्रिवर्गमुक्त्वा कामजं दोषत्रिवर्गमाह — परीत्यादि। परिभवः उत्पथप्रवृत्त्यावमानप्राप्तिः, द्रव्यनाशः द्रव्याणामपात्रेष्वतिमात्रं विनियोगान्नाशः, पाटच्चरादिभिः पाटच्चराश्चोराः द्यूतकारा अक्षादिदेविनः लुब्धकाः मृगयासहायाः गायनाः कण्ठगायिनः वादकाः वीणावादिनः एभिः, अनर्थैः अर्थापैतैः, संयोगश्च, कामः परिभवादिरूपः काम इत्यर्थः। एवञ्चानर्थहेतुत्वात् कोपकामयोर्दोषत्वं सिद्धम्।

तयोश्च कोपस्य गरीयस्त्वं यत् प्रागुन्यस्तं तद् यथोक्तकोपजदोषत्रिवर्गकामजदोषत्रिवर्गान्योन्यगुरुलघुभावविमर्शद्वारेण स्थापयति — तयोः परिभवादित्यादि। तयोः कोपजकामजत्रिवर्गयोर्मध्ये, परिभवात् कामजवर्गप्रथमाद्, द्वेष्यता कोपजवर्गप्रथमा, गरीयसी। कुतः, परिभूतः स्वैः परैश्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाशः कोशाबाधकः, शत्रुवेदनं प्राणाबाधकमिति। अनर्थसंयोगाद् दुःखसंयोगो गरीयान्, अनर्थसंयोगो मुहूर्तप्रीतिकरः, दीर्घक्लेशकरो दुःखानामासङ्ग इति। तस्मात् कोपो गरीयान्।

वाक्पारुष्यमर्थदूषणं दण्डपारुष्यमिति। वाक्पारुष्यार्थदूषणयोः वाक्पारुष्यं गरीयः इति विशालाक्षः। पुरुषमुक्तो हि तेजस्वी तेजसा प्रत्यारोहति, दुरुक्तशल्यं हृदि निखातं तेजस्सन्दीपनमिन्द्रियोपतापि च इति।

नेति कौटल्यः। अर्थपूजा वाक्छल्यमपहन्ति, वृत्तिविलोपस्त्वर्थदूषणम्। अदानमादानं विनाशः परित्यागो वा अर्थस्येत्यर्थदूषणम्।

अवगृह्यते विधेयीक्रियते। द्वेष्यः, समुच्छिद्यते राज्यात् प्रभ्रश्यते, इति अतः कारणात्। द्रव्यनाशात् कामजवर्गाद्द्वितीयात्, शत्रुवेदनं कोपजवर्गाद्द्वितीयं, गरीयः, कुतः, द्रव्यनाशः कोशाबाधकः कोशमेव केवलमाबाधते न तु प्राणान्, शत्रुवेदनं प्राणाबाधकम्, इत्यतः कारणात्। अनर्थसंयोगात् कामजवर्गतृतीयात्, दुःखसंयोगः कोपजवर्गतृतीयः, गरीयान्, कुतः, अनर्थसंयोगः, मुहूर्तप्रीतिकरः दुःखपर्यवसाय्यपि मुहूर्तं प्रीतये कल्पते, दुःखानामासङ्गः, दीर्घक्लेशकरः प्रीतिलेशेनाप्यस्पृष्टं क्लेशं करोति, इत्यतः। तस्मादिति। कामजत्रिवर्गापेक्षया कोपजत्रिवर्गस्य गरीयस्त्वात्, कोपः, गरीयान् कामापेक्षया।

'कोपजस्त्रिवर्ग' इति पूर्वमुक्तस्य त्रिवर्गस्य परस्परतो गुरुलघुभावं विचारयति — वाक्पारुष्यमित्यादि। तत्राद्ययोर्निर्णयं विशालाक्षमतेनाह — वाक्पारुष्यार्थदूषणयोरित्यादि। तत्र हेतुमाह — पुरुषमुक्तो हीति। पुरुषवाक्यैरधिक्षिप्तः, तेजस्वी परिभवासहनस्वभावः, तेजसा, प्रत्यारोहति अधिक्षेप्तारं प्रत्याक्रामति। दुरुक्तशल्यं दुर्वचनरूपं शल्यं, हृदि, निखातं स्थापितं, तेजस्सन्दीपनं तेजसः प्रज्वलनकरम्, इन्द्रियोपतापि च इन्द्रियसन्तापकरं च। इति अतः कारणात्।

विशालाक्षमतं निराकरोति — नेति कौटल्य इति। तत्र हेतुमाह — अर्थपूजेति। अर्थेन सत्कारः, वाक्छल्यम् अधिक्षेपवचनप्रयोगकृतं मनश्शल्यम्, अपहन्ति अपोहति। वाक्पूजा तु अर्थदूषणं नापहन्ति तस्य जीविकाविलोपहेतुत्वादित्यभिप्रायेणाह — वृत्तिविलोपस्त्वर्थदूषणमिति। अदानमित्यादिना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अर्थदूषणदण्डपारुष्ययोरर्थदूषणं गरीयः इति पाराशराः। अर्थमूलौ धर्मकामौ, अर्थप्रतिबन्धश्च लोको वर्तते, तस्योपघातो गरीयान् इति।

नेति कौटल्यः। सुमहताप्यर्थेन न कश्चन शरीरविनाशमिच्छेत्। दण्डपारुष्याच्च तमेव दोषमन्येभ्यः प्राप्नोति। इति कोपजस्त्रिवर्गः।

कामजस्तु। मृगया द्यूतं स्त्रियः पानमिति चतुर्वर्गः। तस्य मृगयाद्यूतयोः मृगया गरीयसी इति पिशुनः। स्तेनामित्रव्यालदावप्रस्खलनभयदिङ्मोहाः क्षुत्पिपासे च प्राणाबाधस्तस्याम्। द्यूते तु जितमेवाक्षविदुषा यथा जयत्सेनदुर्योधनाभ्याम् इति।

र्थदूषणस्य प्रकाराणां प्रदर्शनं तेषु चतुर्ष्वपि वृत्तिविलोपहेतुत्वस्य स्पष्टत्वबोधनार्थम्। अदानं कृतकर्मवेतनानर्पणम्, आदानं दण्डाद्यात्मना धनग्रहणं, विनाशो देशपीडनम्, अर्थस्य परित्यागः रक्षणीयस्यारक्षणम्, इति चतुष्प्रकारमिति शेषः, अर्थदूषणम्। तथाचार्थदूषणमेव गरीय इत्यभिप्रायः।

अर्थदूषणदण्डपारुष्ययोरर्थदूषणं गरीय इति पाराशरमतमाह — **अर्थदूषणेत्यादि**। तत्र युक्तिमाह — **अर्थमूलौ धर्मकामावित्यादि**। धर्मकामयोरर्थसाध्यतया लोकवर्तनस्यार्थान्वयव्यतिरेकानुविधायित्वादर्थस्य प्राधान्यात् तस्योपघातो दण्डपारुष्याद् गुरुतर इत्यर्थः।

तन्निराचष्टे — **नेति कौटल्य इत्यादि**। अतिप्रभूतेनाप्यर्थलाभेन कस्याप्यनभिलषितं प्रत्युत तावताप्यर्थोपघातेन सर्वैः परिजिहीर्षितं शरीरविनाशं यस्माद् दण्डपारुष्यं प्रयोजयति, तस्मात् तदेवार्थदूषणापेक्षया पापीय इत्यभिप्रायः। **इति कोपजस्त्रिवर्ग इति**। इत्थं कोपजस्य त्रिवर्गस्यान्योन्यगुरुलघुभावो निरूपित इत्यर्थः।

कामजस्य चतुर्वर्गस्य त्रीणि द्विकानि कृत्वा तेषामेकैकस्यावयवयोरन्योन्यापेक्षं गुरुलघुभावं निर्णेष्यन् वर्गिणो निर्दिशति — **कामजस्तु मृगयेत्यादि**। आद्यद्विके गरीयस्त्वस्य निर्णयं नारदमतेनाह — **तस्येत्यादि**। तत्र तदीयां युक्तिमाह — **स्तेनेत्यादि**। स्तेनाश्चोराः अमित्राः शत्रवः व्यालाः दुष्टमृगाः दावो वनाग्निः प्रस्खलनं गत्याद्यनवधानम् एतेभ्यो भयानि अपायशङ्काः दिङ्मोहः दिग्भ्रमः इत्येते, क्षुत्पिपासे च बुभुक्षोदन्ये च, प्राणाबाधः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः । तयोरप्यन्यतरपराजयोऽस्तीति नलयुधिष्ठिराभ्यां व्याख्यातं, तदेव विजितद्रव्यमामिषं, वैरबन्धश्च, सतोऽर्थस्य विप्रतिपत्तिरसतश्चार्जनमप्रतिभुक्तनाशो, मूत्रपुरीषधारणबुभुक्षादिभिश्च व्याधिलाभ इति द्यूतदोषः । मृगयायां तु व्यायामः श्लेष्मपित्तमेदःस्वेदनाशश्चले स्थिरे च काये लक्षपरिचयः कोपभयस्थानेहितेषु च मृगाणां चित्तज्ञानमनित्ययानं चेति ।

द्यूतस्त्रीव्यसनयोः कैतवव्यसनम् इति कौणपदन्तः । सातत्येन हि निशि प्रदीपे मातरि च मृतायां दीव्यत्येव कितवः, कृच्छ्रे च प्रतिपृष्टः कुप्यति । स्त्रीव्यसनेषु तु स्नानप्रतिकर्मभोजनभूमिषु

कार्यकारणयोरभेदोपचारात् प्राणपीडाहेतव इत्यर्थः, तस्यां मृगयायाम् । द्यूते तु, अक्षविदुषा जितमेव अक्षदेवनविचक्षणो जयमेव लभते । तत्रोदाहरणमाह — यथेत्यादि । इतिशब्दो हेतौ ।

पिशुनमतं निषेधति — नेति कौटल्य इति । मृगयाद्यूतयोर्मध्ये द्यूतस्य मृगयाया इव दोषमाह — तयोरपीत्यादि । अन्यतरस्य जयवत् पराजयोऽपि नियतः, जितं द्रव्यं सर्वेषां भोग्यं भवति, पराजितस्य जेतरि विद्वेषकरणं, सतो विशुद्धागमस्य पूर्वार्जितस्य द्रव्यस्यास्थानविनियोगः, असतोऽशुद्धागमस्यार्थस्य द्यूतोपायेनाधिगमनम्, अभुक्तस्यैव द्यूतार्जितस्य पुनर्द्यूते हारणा, मूत्रपुरीषधारणबुभुक्षापिपासाभिर्व्याधिप्राप्तिश्चेत्येतान् द्यूते दोषानभिधाय मृगयायां गुणानाह — मृगयायां त्वित्यादि । व्यायामः कायायासकरणम् । श्लेष्मपित्तमेदस्स्वेदनाशः श्लेष्मपित्तदोषनाशः मांसानुपचयः आयासे महत्यप्यस्विद्यद्गात्रत्वं च, चलस्य स्थिरस्य च शरीरस्य लक्षीकरणशिक्षणं, कोपनिमित्तचेष्टितेषु भयनिमित्तचेष्टितेषु च मृगाणां भावज्ञानं, मृगयार्थस्य यानस्य वर्षादिषु कर्तुमशक्यतया कादाचित्कानुष्ठानविषयत्वं न पुनर्द्यूतस्येव नित्यानुष्ठानविषयत्वमित्येते द्यूतव्यावृत्ता गुणा मृगयायां सन्ति । अतश्च द्यूतमेव पापीय इत्यभिप्रायः ।

द्यूतस्त्रीव्यसनयोर्बलाबलचिन्तायां द्यूतव्यसनं गरीय इति भीष्ममतमाह — द्यूतेत्यादि । तदीयं तत्र हेतुमाह — सातत्येन हीत्यादि । द्यूतकारो हि सूर्यप्रकाशाभावेऽपि रात्रौ दीपप्रकाशमुपजीव्याविच्छेदेन दीव्यति, मृताया मातुरौर्ध्वदैहिकमप्यात्मकार्यं परिहृत्य दीव्यति, कार्यसङ्कटे तन्निवारणोपायं पृष्टः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवत्येव धर्मार्थपरिप्रश्नः । शक्या च स्त्री राजहिते नियोक्तुम् । उपांशुदण्डेन व्याधिना वा व्यावर्तयितुमवस्रावयितुं वा इति ।

नेति कौटल्यः । सप्रत्यादेयं द्यूतं, निष्प्रत्यादेयं स्त्रीव्यसनम् । अदर्शनं, कार्यनिर्वेदः, कालातिपातनादनर्थधर्मलोपश्च, तन्त्रदौर्बल्यं, पानानुबन्धश्चेति ।

स्त्रीपानव्यसनयोः स्त्रीव्यसनम् इति वातव्याधिः । स्त्रीषु हि बालिश्यमनेकविधं निशान्तप्रणिधौ व्याख्यातम् । पाने तु शब्दादीनामिन्द्रियार्थानामुपभोगः प्रीतिदानं परिजनपूजनं कर्मश्रमवधश्च इति ।

कुप्यतीत्येते द्यूते दोषाः । स्त्रीव्यसने तु दोषसत्त्वेऽपि विशेषमाह— **स्त्रीव्यसनेष्वित्यादि** । स्त्रीव्यसनी तु स्नानभूमौ प्रसाधनभूमौ भोजनभूमौ च धर्ममर्थं वा प्रष्टुं बोधयितुं च शक्यः, यत्स्त्रीव्यसनी राजा सा राजहितायां वृत्तावव्यवस्थापयितुममात्यादिभिः शक्या, अवस्थापनाशक्यत्वे उपांशुदण्डेन नाशयितुं शक्या, नाशनाशयक्त्वे रसदानादिनिमित्तव्याधियोगेनान्यत्र नेतुं वा शक्येत्येते दोषपरिहारमार्गाः सम्भवन्तीत्याशयः ।

कौणपदन्तमतमिदं निराचष्टे— **नेति कौटल्य इति** । तत्र हेतुकथनं— **सप्रत्यादेयमित्यादिना** । द्यूते हारितं यत् तत् पुनर्द्यूतद्वारेण प्रत्यादातुं शक्यमिति प्रत्यादेयसहितं द्यूतम्, अतथाभूतं तु स्त्रीव्यसनम् । किञ्च स्त्रीव्यसनिनो राज्ञो दर्शनमेव तावदमात्यैर्न लभ्यते, अमात्यादीनां राजादर्शननिमित्तः कार्यानुष्ठानेष्वनुत्साहः, कालातिपातनादनर्थप्राप्तिसहिता धर्महानिश्च, तन्त्रस्य स्वराज्यचिन्तनलक्षणस्यानूर्जितत्वं, स्त्रीरतिसहकारिणो मद्यपानस्यानुवर्तनमित्येतैर्दोषैः स्त्रीव्यसनमेव पापीय इत्यभिप्रायः ।

स्त्रीव्यसनपानव्यसनयोर्बलाबलविचारे स्त्रीव्यसनं गरीय इत्युद्धवमतमाह— **स्त्रीपानव्यसनयोरित्यादि** । तत्र तदीयं हेतुमाह— **स्त्रीषु हीत्यादि** । तासु हि बहुप्रकारं मौख्यं भर्तृवधार्थविषमिश्रलाजदानादिलक्षणं प्रथमाधिकरणीयनिशान्तप्रणिधिप्रकरणोदाहृतं सम्भावितं, न तु पाने । किञ्च पाने चित्तैकाग्र्यसम्पत्त्या शब्दादीनामिन्द्रियार्थानामेकरस्यानुभवः, प्रीतिदानं, परिजनसत्कारः, कर्मायासकरणनिमित्ताश्रमावसादादिप्रशमनं च भवतीत्येतस्माद्धेतोरित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः। स्त्रीव्यसने भवत्यपत्योत्पत्तिरात्मरक्षणं चान्तर्दारेषु, विपर्ययो वा बाह्येषु, अगम्येषु सर्वोच्छित्तिः। तदुभयं पानव्यसने। पानसम्पत् —संज्ञानाशः अनुन्मत्तस्योन्मत्तत्वमप्रेतस्य प्रेतत्वं कौपीनदर्शनं श्रुतप्रज्ञाप्राणवित्तमित्रहानिः सद्भिर्वियोगोऽनर्थ्यसंयोगस्तन्त्रीगीतनैपुण्येषु चार्थघ्नेषु प्रसङ्ग इति।

द्यूतमद्ययोः द्यूतयेकेषाम्। पणनिमित्तो जयः पराजयो वा प्राणिषु निश्चेतनेषु वा पक्षद्वैधेन प्रकृतिकोपं करोति, विशेषतश्च सङ्घानां

इदं मतं प्रतिषेधति — नेति कौटल्य इति। तत्र हेतुमाह — स्त्रीव्यसन इत्यादि। तस्मिन्, अन्तर्दारेषु यथाविधि परिणीतासु पतिव्रतासु, अपत्योत्पत्तिः, आत्मरक्षणं च भवति। वा अन्तर्दाराभावपक्षे, बाह्येषु गणिकादिषु, प्रसक्तस्येति शेषः, विपर्ययः अपत्योत्पत्त्यात्मरक्षणयोरभावः। अगम्येषु कुलस्त्रीजनेषु, सर्वोच्छेदः प्राणपर्यन्तसर्वस्वनाशः। एवं तावद् गणिकादिप्रसङ्गः कुलवधूप्रसङ्गः इति दोषद्वयं स्त्रीव्यसनेऽभिहितम्। तच्च तदतिरिक्ताश्च बहवो दोषाः पानव्यसने भवन्तीत्याह — तदुभयमित्यादि। पानसम्पत् पानकार्याणां समृद्धिः। तां विवृणोति—संज्ञानाश इति। संज्ञानाशो बुद्धिलोपः। अनुन्मत्तस्य उन्मत्तभावः चित्तविभ्रमहीनस्यैव विभ्रान्तचित्तत्वम्। अप्रेतस्य प्रेतत्वं जीवत एव शवसाधारणं निश्चेष्टत्वं, कौपीनदर्शनं गुह्यागोपनम्। श्रुतादिहानिः श्रुतं शास्त्रश्रवणं प्रज्ञा श्रुतजन्या मतिः प्राणो बलं वित्तमित्रे प्रसिद्धे तेषां हानिः। सद्भिर्वियोगः सत्संसर्गाभावः। अनर्थ्यसंयोगः गायनवादकादिसंसर्गः। तन्त्रीगीतनैपुण्येषु चार्थघ्नेषु प्रसङ्गः अर्थोपघातिषु वीणागानकौशलेष्वत्यासङ्गः। एवञ्च स्त्रीव्यसनाद् मद्यव्यसनं गरीय इति व्यवस्थितम्।

केचिदाचार्या मन्यन्ते — द्यूतमद्यव्यसनयोर्द्यूतव्यसनं गरीय इति। तन्मतं सयुक्तिकं दर्शयति— द्यूतमद्ययोरित्यादि। एकेषामित्येतदनन्तरं गरीयस्त्वेनेष्टमिति शेषः। तत्र द्यूतदोषबाहुल्यं हेतुमाह — पणनिमित्त इति। पणो ग्लहद्रव्यं तन्निमित्तः, जयः पराजयो वा पणलाभप्रयोजनो जयः पणहानिप्रयोजनः पराजय इत्यर्थः, प्राणिषु निश्चेतनेषु वा प्राणिद्यूते प्राणिविषयः अप्राणिद्यूते अप्राणिविषयः, पक्षद्वैधेन जेतृपक्षो जितपक्ष इति परस्परविरुद्धपक्षद्वयोत्थापनेन, प्रकृतिकोपं, करोति। विशेषतश्च, सङ्घानां, सङ्घवर्णिना च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सङ्घधर्मिणां च राजकुलानां द्यूतनिमित्तो भेदः, तन्निमित्तो विनाश इति । असत्प्रग्रहः पापिष्ठतमो व्यसनानां तन्त्रदौर्बल्यादिति ॥

असतां प्रग्रहः कामः कोपश्चावग्रहः सताम् ।
व्यसनं दोषबाहुल्यादत्यन्तमुभयं मतम् ॥
तस्मात् कोपं च कामं च व्यसनारम्भमात्मवान् ।
परित्यजेन्मूलहरं वृद्धसेवी जितेन्द्रियः ॥

इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे
तृतीयोऽध्यायः पुरुषव्यसनवर्गः,
आदित एकोनविंशतिशततमः ॥

सङ्घधर्म ऐकमत्यं तद्वतां च, राजकुलानां, द्यूतनिमित्तो भेदः ऐकमत्यभङ्गः। तन्निमित्तः भेदनिमित्तः विनाशः, जायत इति शेषः । इति हेतोः । **अन्येषामिति** । अपरेषामाचार्याणाम्, असत्प्रग्रहः असतां प्रग्रहः पूजा यस्मिन्नस्ति सः अर्थान्मद्यपानासङ्गः, पापिष्ठतमः, व्यसनानां सर्वेषां व्यसनानां मध्ये, कुतः, तन्त्रदौर्बल्यात् स्वराज्यचिन्तापचयात् । इति एवं मतमिति शेषः । 'अन्येषाम्' इति पाठो मूलमातृकासु न दृश्यते । किन्तु नयचन्द्रिकायामुपात्तत्वात् प्रकृततंत्रगतत्वाच्च स आदृतः । मतद्वयमपीदमप्रतिषिद्धत्वात् कौटल्यस्यापीष्टं द्रष्टव्यम् ॥

प्रपञ्चितमर्थं संक्षिप्याह—**असतामिति** । गायनवादकादीनामनर्थ्यानां, प्रग्रहः पूजाहेतुः, कामः, कोपश्च, सताम्, अवग्रहः निग्रहहेतुः । उभयम् उक्तं द्विकम्, अत्यन्तं सर्वथा, व्यसनम् मतं व्यसनत्वेनाभिमतं, कुतः, दोषबाहुल्यात् पूर्वोक्ताद् दोषप्राचुर्यात् ॥

तस्मादिति । तस्मात् आत्यन्तिकव्यसनतायाः सिद्धत्वात्, व्यसनारम्भं दुःखजनकं, मूलहरं सर्वस्वनाशकरं, कोपं च, कामं च, परित्यजेत्, कः, आत्मवान् मनस्वी धीर इत्यर्थः । स कीदृशः, वृद्धसेवी जितेन्द्रियः वृद्धसंयोगद्वारेण वशीकृतमनस्क इत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां व्यसनाधिकारिके
अष्टमाधिकरणे तृतीयोऽध्यायः पुरुषव्यसनवर्गः,
आदित एकोनविंशत्यधिकशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१३०—१३२. प्रक. पीडनवर्गः, स्तम्भनवर्गः, कोशसङ्गवर्गश्च ।

दैवपीडनमग्निरुदकं व्याधिर्दुर्भिक्षं मरक इति ।

अग्न्युदकयोरग्निपीडनमप्रतिकार्यं सर्वदाहि च, शक्योपगमनं तार्यावाधमुदकपीडनमित्याचार्याः ।

नेति कौटल्यः । अग्निर्ग्राममर्धग्रामं वा दहति, उदकवेगस्तु ग्रामशतप्रवाहीति ।

व्याधिदुर्भिक्षयोर्व्याधिः प्रेतव्याधितोपसृष्टपरिचारकव्यायामोपरोधेन कर्माण्युपहन्ति, दुर्भिक्षं पुनरकर्मोपघाति हिरण्यपशुकरदायि च इत्याचार्याः ।

नेति कौटल्यः । एकदेशपीडनो व्याधिः शक्यप्रतीकारश्च, सर्वदेशपीडनं दुर्भिक्षं प्राणिनामजीवनायेति ।

पीडनवर्ग इति सूत्रम् । पीडनानां दैवमानुषभेदभिन्नानां, वर्गः अभिधीयत इति सूत्रार्थः । गुणप्रातिलोम्य-गुणाभाव-प्रदोष-प्रसङ्ग-पीडात्मकेषु पञ्चसु व्यसनेषु प्रसङ्गपर्यन्तानि निरूपितानि । पीडारूपं तु सम्प्रति निरूप्यते ।

तत्र दैवपीडनं तावत् पञ्चधा विभजते — दैवपीडनमग्निरित्यादि ।

तेषां द्वयोर्द्वयोः क्रमेण परस्परगुरुलघुभावं निर्णेष्यन् प्रथमयोरग्निपीडनोदकपीडनयोस्तन्निर्णयमाचार्यमतेनाह — अग्न्युदकयोरित्यादि । तयोर्मध्ये अग्निपीडनम् अग्नेः स्प्रष्टुमप्यशक्यतया प्रतिकर्तुमशक्यं सर्वदहनशीलं च भवति, उदकपीडनं तु शक्योपगमनं नौकादिप्रतिकार्याबाधं चेत्यतोऽग्निपीडनमुदकपीडनाद् गरीय इत्याचार्या मन्यन्त इत्यर्थः ।

तन्मतं निषेधति — नेति कौटल्य इति । निषेधसूचित उदकपीडनस्य गरीयस्त्वे स्वमते साधकमाह — अग्निर्ग्राममित्यादि । ग्रामशतप्रवाही ग्रामशतमाक्रम्यापहर्तुं शक्त इत्यर्थः ।

व्याधिदुर्भिक्षयोर्व्याधिगरीयस्त्वमाचार्यमतेनाह — व्याधीत्यादि । प्रेतादिव्यायामोपरोधेन प्रेतानां व्याधितानाम् उपसृष्टपरिचारकाणां रोगिपरिचारकाणां च कृष्याद्यायासोपहननेन । अकर्मोपघाति कर्मानुपघातकम् । हिरण्यपशुकरदायि हिरण्यरूपं पशुरूपं च करं धान्यकरामावेऽपि दत्त इत्यर्थः ।

आचार्योक्तहेतुविघटनभङ्ग्या दुर्भिक्षगरीयस्त्वं स्वाभिमतं समर्थयति — नेति कौटल्य इत्यादि । एकदेशपीडनः एकदेशमात्रवर्तित्वात् । सर्वदेशपीडनं कृत्स्नजनपदव्यापित्वात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेन मरको व्याख्यातः ।

क्षुद्रकमुख्यक्षययोः क्षुद्रकक्षयः कर्मणामयोगक्षेमं करोति, मुख्यक्षयः कर्मानुष्ठानोपरोधधर्मा इत्याचार्याः ।

नेति कौटल्यः । शक्यः क्षुद्रकक्षयः प्रतिसन्धातुं बाहुल्यात् क्षुद्रकाणां, न मुख्यक्षयः । सहस्रेषु हि मुख्यो भवत्येको न वा सत्त्वप्रज्ञाधिक्यादाश्रयत्वात् क्षुद्रकाणामिति ।

स्वचक्रपरचक्रयोः स्वचक्रमतिमात्राभ्यां दण्डकराभ्यां पीडयत्यशक्यं च वारयितुं, परचक्रं तु शक्यं प्रतियोद्धुमपसारेण सन्धिना वा मोक्षयितुम् इत्याचार्याः ।

तेनेति । प्राणिप्राणहरणलक्षणेन दुर्भिक्षोक्तन्यायेन, मरको मारिः, व्याख्यातः, बहुतरप्राणिमरणहेतुतया दुर्भिक्षादपि स गरीयानित्यर्थः ।

अथ पीडाया विषयभेदनिमित्ते गौरवचिन्तने आचार्यमतमाह—**क्षुद्रकमुख्यक्षययोरिति** । क्षुद्रकाः कर्मणां कर्तारः मुख्याः प्रधानाः कर्मणां कारयितारः तेषां क्षययोर्मध्ये, क्षुद्रकक्षयः, कर्मणाम्, अयोगक्षेमं करोति अप्रवृत्तप्रवृत्तिं प्रवृत्तरक्षणं च न निष्पादयति, मुख्यक्षयः, कर्मानुष्ठानोपरोधधर्मा कर्मानुष्ठानविघातमात्रहेतुः न तु कर्मकराणां कारयितृनिरपेक्षां स्वतन्त्रप्रवृत्तिं विहन्तीत्यर्थः । तथाच कारयितृक्षयात् कर्तृक्षयो गरीयानित्यभिप्रायः ।

तन्निराकरोति—**नेति कौटल्य इति** । क्षुद्रकक्षयः प्रतिसन्धातुं क्षुद्रकान्तरप्रतिनिधानेन समाधातुं, शक्यः, कुतः, क्षुद्रकाणां, बाहुल्यात् बहुत्वेन सुलभत्वात् । न मुख्यक्षयः मुख्यक्षयस्तु न प्रतिसन्धातुं शक्यः । तत्र हेतुमाह—**सहस्रेषु हीति** । बहुषु पुरुषाणां सहस्रेषु मध्ये, मुख्य एको भवति न वा अतिदुर्लभ इत्यर्थः । स कथम्भूतः, सत्त्वप्रज्ञाधिक्यादाश्रयत्वात् क्षुद्रकाणां सत्त्वप्रज्ञातिशययोगनिमित्तां क्षुद्रकाश्रयत्वयोग्यतां प्राप्य स्थित इत्यर्थः । इतिशब्दो वाक्यार्थहेतुत्वे ।

इत्थं दैवपीडनं निरूप्य मानुषपीडनं निरूपयति—**स्वचक्रपरचक्रयोरिति** । तयोर्मध्ये, स्वचक्रं स्वबलम्, अतिमात्राभ्यां सीमातिगाभ्यां, दण्डकराभ्यां पीडयति, अशक्यं च वारयितुं स्वामिप्रकृत्युत्पादितां पीडां कः प्रतिसमादधीतेत्यर्थः । 'अशक्यं वारयितुमि'त्यस्य स्थाने 'अशक्यप्रकृतिश्च' इति नयचन्द्रिकायाः पाठः । अप्रतिसमाधेयराजप्रकृतिरूपं च स्वचक्रं भवतीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः। स्वचक्रपीडनं प्रकृतिपुरुषमुख्योपग्रहविघाताभ्यां शक्यते वारयितुम्, एकदेशं वा पीडयति। सर्वदेशपीडनं तु परचक्रं विलोपघातदाहविध्वंसनापवाहनैः पीडयतीति।

प्रकृतिराजविवादयोः प्रकृतिविवादः प्रकृतीनां भेदकः पराभियोगानावहति। राजविवादस्तु प्रकृतीनां द्विगुणभक्तवेतनपरिहारकरो भवतीत्याचार्याः।

नेति कौटल्यः। शक्यः प्रकृतिविवादः प्रकृतिमुख्योपग्रहेण कलहस्थानापनयनेन वा वारयितुं, विवदमानास्तु प्रकृतयः परस्परसङ्घर्षणोपकुर्वन्ति। राजविवादस्तु पीडनोच्छेदनाय प्रकृतीनां द्विगुणव्यायामसाध्य इति।

तदर्थो बोद्धव्यः। परचक्रं तु, शक्यं प्रतियोद्धुं प्रतियोधनेन वारयितुं शक्यम्, अपसारेण अन्यत्र गमनेन, सन्धिना वा दानपणनेन वा, मोक्षयितुं द्रोहारम्भान्निवर्तयितुं, शक्यम्। एवञ्च परचक्रपीडनात् स्वचक्रपीडनं गरीय इति भावः। इत्याचार्याः।

स्वचक्रपीडनं नाम प्रकृतिपुरुषमुख्यभूतानाममात्यादीनामानुकूल्यसम्पादनेन विघातोत्पादनेन च वारयितुं शक्यम्। एकदेशमेव च तद् धनधान्याद्यात्मवन्तं प्रदेशं पीडयति, न तु सर्वदेशम्। परचक्रं तु द्रव्यलुण्टनैर्मनुष्यवधैर्गृहादिदाहभञ्जनैः स्वदेशादुत्सारणैश्च सर्वं देशं पीडयतीत्यतः परचक्रपीडनमेव स्वचक्रपीडनाद् गरीय इत्यभिप्रायकमाचार्यमतनिषेधपूर्वकमाह — **नेति कौटल्य** इत्यादि।

अथ प्रकृतिविवादराजविवादयोस्तारतम्यपरीक्षायामाचार्यमतमाह — **प्रकृतीत्यादि**। प्रकृतिराजविवादयोः प्रकृतिविवादः प्रकृतीनां परस्परविप्रतिपत्तिः राजविवादः राज्ञोः परस्परविप्रतिपत्तिः तयोर्मध्ये, प्रकृतिविवादः, प्रकृतीनां भेदकः परस्परभेदहेतुः, अत एव पराभियोगान् शत्रूद्योगान्, आवहति। राजविवादस्तु, प्रकृतीनां, द्विगुणभक्तवेतनपरिहारकरः भक्तवेतनद्वैगुण्यं करमोक्षणं च करोति। ततश्च प्रकृत्यनुकूलाद् राजविवादात् तत्प्रतिकूलः प्रकृतिविवादो गरीयानित्यर्थः। इत्याचार्यमतम्।

तत् प्रतिषेधति—**नेति कौटल्य** इत्यादि। शक्य इत्यादेरयमर्थः — प्रकृतिविवादः प्रकृतिमुख्यानुकूलीकरणेन परस्परकलहकारणनिवारणेन वा वारयितुं शक्यः। किञ्च विवदमानाः प्रकृतयः परस्परस्पर्धया सातिशयमुप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देशराजविहारयोः देशविहारस्त्रैकाल्येन कर्मफलोपघातं करोति, राजविहारस्तु कारुशिल्पिकुशीलववाग्जीवनरूपाजीवावैदेहकोपकारं करोति इत्याचार्याः ।

नेति कौटल्यः । देशविहारः कर्मश्रमवधार्थमल्पं भक्षयति, भक्षयित्वा च भूयः कर्मसु योगं गच्छति । राजविहारस्तु स्वयं वल्लभैश्च स्वयंग्राहप्रणयपण्यागारकार्योपग्रहैः पीडयतीति ।

सुभगाकुमारयोः कुमारः स्वयं वल्लभैश्च स्वयंग्राहप्रणयपण्यागारकार्योपग्रहैः पीडयति । सुभगा विलासोपभोगेन । इत्याचार्याः ।

कुर्वन्ति । राज्ञोविवादस्तु प्रकृतीनां शक्तिसिद्धिविघातलक्षणाय पीडनाय उच्छेदाय च कल्पते प्रकृतिविवादप्रशमनापेक्षितप्रयत्नद्विगुणप्रयत्नप्रशमनीय इत्ययमेव गरीयानिति ।

देशविहारराजविहारयोर्गुरुलघुभावं निरूपयन्नाचार्यमतमाह — **देशराजविहारयोरिति** । देशविहारो देशीयजनक्रीडा राजविहारो राजक्रीडा तयोर्मध्ये, देशविहारः, त्रैकाल्येन कर्मफलोपघातं करोति कृतवापसस्यानवेक्षणात् तत्कालकरणीयवापाकरणात् करिष्यमाणवापानुकूलक्षेत्रसंस्काराकरणाच्च कालत्रयेऽपि कृषिफलमुपहन्ति । राजविहारस्तु, कारुशिल्पिकुशीलववाग्जीवनरूपाजीवावैदेहकोपकारं करोति, तत्र कारवस्तक्षादयः शिल्पिनः सूक्ष्मशिल्पकराः स्वर्णकारादयः कुशीलवाः गायकाः वाग्जीवनाः स्तुतिपाठकाः रूपाजीवा वेश्याः वैदेहकाः गन्धमाल्यादिविक्रयजीविनः । अतश्च देशविहार एव गरीयानित्यभिप्रायः । इत्याचार्याः ।

तत् प्रतिषेधति — **नेति कौटल्य** इत्यादि । देशविहारस्तावत् कृष्यादिव्यापारानुष्ठानोत्पन्नश्रमनिवारणापेक्षितमल्पं कालमपहरति । अपहृत्य च भूयः कृष्यादिकर्मसु उद्योगं गमयति विहारवन्तं जनम् । राजविहारस्तु स्वयं राज्ञा राजवल्लभैश्च जानपदाननुज्ञातधनग्रहणलक्षणेन स्वयंग्राहेण आत्माभिरुचिकल्पितया पण्यशालया कार्यनिर्वर्तनार्थलञ्चग्रहणेन च पीडयतीति स एव पापीयानित्यर्थः ।

सुभगाविहारकुमारविहारयोर्गुरुलघुभावे आचार्यमतमाह — **सुभगाकुमारयोरिति** । सुभगा देवी कुमारो युवराजः तयोर्मध्ये, कुमारः, स्वयं, वल्लभैश्च स्वदयितजनैश्च, स्वयंग्राहप्रणयपण्यागारकार्योपग्रहैः पीडयति, अर्था-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः। शक्यः कुमारो मन्त्रिपुरोहिताभ्यां वारयितुं, न सुभगा बालिश्यादनर्थ्यजनसंयोगाच्चेति।

श्रेणीमुख्ययोः श्रेणी बाहुल्यादनवग्रहा स्तेयसाहसाभ्यां पीडयति, मुख्यः कार्यानुग्रहविघाताभ्याम् इत्याचार्याः।

नेति कौटल्यः। सुव्यावर्त्या श्रेणी समानशीलव्यसनत्वात्, श्रेणीमुख्यैकदेशोपग्रहेण वा। स्तम्भयुक्तो मुख्यः परप्राणद्रव्योपघाताभ्यां पीडयतीति।

सन्निधातृसमाहर्त्रोः सन्निधाता कृतविदूषणात्ययाभ्यां पीडयति। समाहर्ता करणाधिष्ठितः प्रदिष्टफलोपभोगी भवति इत्याचार्याः।

ज्जनान्। सुभगा, विलासोपभोगेन क्रीडार्थेन भोगद्रव्येण गन्धमाल्यादिना, पीडयति। ततश्च कुमारनिमित्तकं पीडनं गुर्वित्यर्थः।

तन्निषिध्य स्वमतमाह — नेतीत्यादि। कुमारः, मन्त्रिपुरोहिताभ्यां, वारयितुं स्वयंग्राहादिभ्यो निवर्तयितुं, शक्यः। सुभगा, न वारयितुं शक्या स्त्रीत्वादेव। हेत्वन्तरमप्याह — बालिश्याद् अनर्थ्यजनसंयोगाच्चेति। मौर्ख्याद् गायनवाग्जीवनकुशीलवादिसहवासाच्च।

श्रेणीनिमित्तपीडामुख्यनिमित्तपीडयोर्गुरुलघुभावे आचार्यमतमाह — श्रेणीमुख्ययोरिति। तयोर्मध्ये, श्रेणी आयुधीयकर्षकाणामन्योन्यसंगतानां सङ्घः, बाहुल्यात्, अनवग्रहा वारयितुमशक्यतया निष्प्रतिबन्धा, स्तेयसाहसाभ्यां परधनप्रच्छन्नहरणात् परधनप्रसभहरणाच्च, पीडयति। मुख्यः, कार्यानुग्रहविघाताभ्याम् उत्कोचदाने कार्यसाधनेन तददाने कार्यविहननेन च, पीडयतीति।

तन्निषिध्य स्वमतमाह — नेतीत्यादि। श्रेणी, सुव्यावर्त्या सुखेन स्तेयादितो निवर्तयितुं शक्या, कुतः, समानशीलव्यसनत्वात् श्रेण्यवयवतुल्यकर्म्यादिवृत्तिव्यसनत्वात्, अर्थात् समानशीलव्यसनैरेव। श्रेणीमुख्यैकदेशोपग्रहेण वा श्रेणीमुख्याङ्गभूतपुरुषानुकूलनेन वा, सुव्यावर्त्येति सम्बध्यते। स्तम्भयुक्तः गर्वयुक्तः, मुख्यः, परप्राणद्रव्योपघाताभ्याम् अन्यजीवितहरणेनान्यद्रव्यहरणेन च, पीडयति। इति अतश्च मुख्यपीडैव गरीयसीत्यर्थः।

सन्निधातृपीडासमाहर्तृपीडयोर्गुरुलघुभावं चिन्तयन्नाचार्यमतमाह — सन्निधातृसमाहर्त्रोरिति। तयोर्मध्ये, सन्निधाता, कृतविदूषणात्ययाभ्यां कृतस्य दूषणादेर्दोषारोपेण कालातिक्रमकथनेन च, पीडयति। समाहर्ता, करणाधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः । सन्निधाता कृतावस्थमन्यैः कोशप्रवेश्यं प्रतिगृह्णाति । समाहर्ता तु पूर्वमर्थमात्मनः कृत्वा पश्चाद् राजार्थं करोति, प्रणाशयति वा, परस्वादाने च स्वप्रत्ययश्चरतीति ।

अन्तपालवैदेहकयोरन्तपालश्चोरप्रसङ्गदेयात्यादानाभ्यां वणिक्पथं पीडयति । वैदेहकास्तु पण्यप्रतिपण्यानुग्रहैः प्रसाधयन्ति इत्याचार्याः ।

नेति कौटल्यः । अन्तपालः पण्यसम्पातानुग्रहेण वर्तयति । वैदेहकास्तु सम्भूय पण्यानामुत्कर्षापकर्षं कुर्वाणाः पणे पणशतं कुम्भे कुम्भशतम् इत्याजीवन्ति ।

ष्ठितः संख्यायकाधिष्ठितः, प्रदिष्टफलोपभोगी स्वक्लृप्तवेतनमात्रभोक्ता, भवति, अत एष न पीडाकर इत्यभिप्रायः । इत्याचार्याः ।

आचार्यमतं निषिध्य स्वमतमाह — **नेति कौटल्य** इत्यादि । सन्निधाता, अन्यैः कृतावस्थम् अन्यैः परीक्षकैः सुपरीक्ष्य ग्राह्यत्वेन निर्णीतं, कोशप्रवेश्यं भाण्डागारस्थापनीयं वस्तु, प्रतिगृह्णाति, न तु तस्य ग्राह्यत्वाग्राह्यत्वविषये स प्रमाणमित्यर्थः । एवञ्च स न पीडाकरः किन्तु समाहर्तैवेत्यभिप्रायेणाह — **समाहर्ता त्विति** । सः, पूर्वं प्रथमम्, आत्मनः अर्थं कृत्वा अपीडनार्थमुत्कोचद्रव्यं गृहीत्वा, पश्चाद् राजार्थं, करोति उत्थापयति, प्रणाशयति वा स्वयमपहरति वा । प्रणाशनसम्भावनार्थमाह—**परस्वादाने चेति** । परस्वस्य करभूतस्य ग्रहणे च, स्वप्रत्ययः आत्मप्रमाणकः, चरति । इतिशब्दो हेत्वर्थः । एवञ्च समाहर्तैव पीडाकर इत्यभिप्रायः ।

अन्तपालवैदेहकपीडां प्रत्याह — **अन्तपालवैदेहकयोरिति** । तयोर्मध्ये, अन्तपालः, चोरप्रसङ्गदेयात्यादानाभ्यां चोरप्रसङ्गेन स्वप्रसञ्जितचोरद्वारार्थापहरणेन देयात्यादानेन देयस्य पथिकदेयस्य वर्तनीरूपस्यातिमात्रग्रहणेन च, वणिक्पथं पीडयति । वैदेहकास्तु, पण्यप्रतिपण्यानुग्रहैः पण्ये पणनीयपदार्थे प्रतिपण्ये पण्यमूल्यप्रतिनिधिभूते पदार्थे च अनुग्रहैः लाभकल्पनैः प्रसाधयन्ति वणिक्पथं वर्धयन्ति इत्याचार्याः ।

तन्मतं निषिध्य स्वमतमाह — **नेतीत्यादि** । अन्तपालः, पण्यसम्पातानुग्रहेण पण्यानां सम्भूयागमनं पण्यसम्पातः तेन तन्निमित्ता वर्तनीह लक्ष्यते, तस्याम् अनुग्रहेण लाभकरणेन, वर्तयति अर्थात् वणिक्पथम् । वैदेह-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभिजातोपरुद्धा भूमिः पशुव्रजोपरुद्धा वेति । अभिजातोपरुद्धा भूमिः महाफलाप्यायुधीयोपकारिणी न क्षमा मोक्षयितुं व्यसनाबाधभयात् । पशुव्रजोपरुद्धा तु कृषियोग्या क्षमा मोक्षयितुं, विवीतं हि क्षेत्रेण बाध्यते । इत्याचार्याः ।

नेति कौटल्यः । अभिजातोपरुद्धा भूमिरत्यन्तमहोपकारापि क्षमा मोक्षयितुं व्यसनाबाधभयात् । पशुव्रजोपरुद्धा तु कोशवाहनोपकारिणी न क्षमा मोक्षयितुमन्यत्र सस्यवापोपरोधादिति ।

कास्तु, सम्भूय संहता भूत्वा, पण्यानाम् उत्कर्षापकर्षं कुर्वाणाः स्वपण्यविक्रये मूल्योत्कर्षं परपण्यक्रयणे मूल्यापकर्षं च कल्पयन्तः, पणे पणशतम् एकस्मिन् पणे पणानां शतं, कुम्भे कुम्भशतम् एकस्मिंस्तैलादिकुम्भे तत्कुम्भशतम्, इति आजीवन्ति अनेन प्रकारेण बहुगुणं लाभं गृह्णन्ति । अतो वणिज एव पीडाकरा इत्यभिप्रायः ।

भूमेः पीडाहेतुभूताया मोक्षणीयत्वामोक्षणीयत्वे चिन्तयति— **अभिजातोपरुद्धेति** । विजिगीषुकुलीनाधिगता, भूमिः, मोक्षयितव्येति शेषः । पशुव्रजोपरुद्धा वा मोक्षयितव्या, इति विचार्यत इति शेषः । तत्राचार्यमतमाह — अभिजातोपरुद्धा भूमिः, महाफलापि प्रभूतधान्यफलदायिकापि, आयुधीयोपकारिणी आयुधीयदानेनोपकर्त्री, अत एव मोक्षयितुं न क्षमा । कुतः, व्यसनाबाधभयात् व्यसने शत्र्वाक्रमणे य आबाधः आयुधीयव्यपगमनिमित्ता पीडा तद्भयात् । पशुव्रजोपरुद्धा तु कृषियोग्या धान्यादिप्रसवार्हा, अत एव मोक्षयितुं क्षमा । पशुभोग्यविवीतस्थानभूता भूमिः किमिति विवीतत्वबाधनेन धान्योत्पत्तिक्षेत्रतामापाद्यत इत्यत्राह — **विवीतं हि क्षेत्रेण बाध्यत** इति । विवीतं तृणाद्युत्पत्तिभूमिः, क्षेत्रेण सस्यवापेन, बाध्यते प्रयोजनगौरवादित्यर्थम् ।

आचार्यमतं निषेधति — **नेति कौटल्य** इति । अभिजातोपरुद्धा भूमिरतिमहान्तं सस्योपकारमादधानापि मोक्षणीयैव, अन्यथा व्यसने रन्ध्रान्वेषिणाभिजातेनैव आबाध उत्पाद्येतेति भयात् । पशुव्रजोपरुद्धा तु कोशसंग्राह्यघृतादिदानेन बलीवर्दादिवाहनदानेन चोपकारिणी अत एव मोक्षयितुं न क्षमा समीपावस्थितसस्यवापक्षेत्रोपघाताभावे इत्येवंरूपं स्वमतमाह — **अभिजातोपरुद्धेत्यादि** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिरोधकाटविकयोः प्रतिरोधका रात्रिसत्रचराः शरीराक्रमिणो नित्याः शतसहस्रापहारिणः प्रधानकोपकाश्च । व्यवहिताः प्रत्यन्तारण्यचराश्चाटविकाः प्रकाशा दृश्याश्चरन्त्येकदेशघातकाश्च । इत्याचार्याः ।

नेति कौटल्यः । प्रतिरोधकाः प्रमत्तस्यापहरन्ति, अल्पाः कुण्ठाः सुखा ज्ञातुं ग्रहीतुं च । स्वदेशस्थाः प्रभूता विक्रान्ताश्चाटविकाः । प्रकाशयोधिनोऽपहर्तारो हन्तारश्च देशानां राजसधर्माण इति ।

मृगहस्तिवनयोः मृगाः प्रभूताः प्रभूतमांसचर्मोपकारिणो मन्द-

प्रतिरोधकाटविकयोः पीडामधिकृत्याचार्यमतमाह — प्रतिरोधकाटविकयोरित्यादि । प्रतिरोधकाः, रात्रिसत्रचराः रात्रिचारिणो वनगहनचारिणश्च, शरीराक्रमिणः परशरीरहिंसिनः शरीरं शरीरमात्रमर्थादसहायं जनं यं यं पश्यन्ति तं तमाक्रमितुं शीलमेषामिति तथाभूता इत्यर्थः, नित्याः सर्वदा सन्निहिताः, शतसहस्रापहारिणः हिरण्यादिलक्षापहारिणः, प्रधानकोपकाश्च प्रधानान् राष्ट्रमुख्यान् महाधनिकान् कोपयन्ति उपघ्नन्तीति तथाभूताश्च । व्यवहिता दूरस्थाः, दूरस्थत्वमेव विवृणोति—प्रत्यन्तारण्यचराश्च विषयान्तवनचारिणश्च, आटविकाः, प्रकाशाः सर्वजनविदिताः, दृश्याः दृष्टिविषयाः, चरन्ति । एतेन तत्पीडनीयानामपसरणसौकर्यमुक्तम् । एकदेशघातकाश्च कतिपयघातिनो न सर्वघातिनः । एवञ्च प्रतिरोधका गुरुपीडाकराः आटविका लघुपीडाकरा इत्यभिप्रायः । इत्याचार्याः ।

तन्मतं निराकरोति — नेति कौटल्य इति । प्रतिरोधकाः, प्रमत्तस्य धनरक्षणानवहितस्य, अपहरन्ति अर्थाद् धनम्, अल्पाः असहायचराः, अत एव कुण्ठाः कुण्ठितप्रसराः, ज्ञातुं, ग्रहीतुं च बन्धुं च, सुखाः अनायासशक्याः । सुखमिति पाठे सामान्ये नपुंसकम् । आटविकेषु विशेषमाह — आटविकाः स्वदेशस्थाः, न तु प्रतिरोधका इव देशान्तरगमनसापेक्षाः, प्रभूताः अनल्पाः, विक्रान्ताश्च विक्रमवत्तया दुर्ग्रहाश्च । किञ्च राजान इव ते निरङ्कुशाः प्रकाशमेव युद्धं कृत्वा देशीयजनानां द्रव्यं प्राणांश्च हरन्तीत्याह — **प्रकाशयोधिन** इत्यादि । ततश्चाटविकपीडैव गरीयसीत्यभिप्रायः ।

मृगवनाद्धस्तिवनं पीडने गरीय इत्यभिप्रायकमाह — **मृगहस्तिवनयोरित्यादि** । प्रभूताः प्रचुराः हस्त्यपेक्षया । मन्दग्रामावक्लेशिनः अल्पाहाराः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रासावक्लेशिनः सुनियम्याश्च । विपरीता हस्तिनो गृह्यमाणाः दुष्टाश्च देशविनाशायेति ।

स्वपरस्थानीयोपकारयोः स्वस्थानीयोपकारो धान्यपशुहिरण्यकुप्योपकारो जानपदानामापद्यात्मधारणः । विपरीतः परस्थानीयोपकारः । इति पीडनानि ।

आभ्यन्तरो मुख्यस्तम्भो बाह्यो मित्राटवीस्तम्भः । इति स्तम्भवर्गः ।

ताभ्यां पीडनैर्यथोक्तैश्च पीडितः सक्तो मुख्येषु परिहारोपहतः प्रकीर्णो मिथ्यासंहृतः सामन्ताटवीहृत इति कोशसङ्गाः ॥

अत एव धावने सुलभक्लेशाः अत एवानुधावितृसुग्रहा इत्यर्थः । सुनियम्याः गृहीताश्च सुखेन वशयितुं शक्याः । विपरीताः मृगोक्तगुणविपरीतगुणाः अल्पसङ्ख्या अल्पमांसचर्मोपकारिणः अमिताहारतयानवक्लेशिनो दुर्दमाश्चेत्यर्थः । गृह्यमाणा दुष्टाश्च देशविनाशायेति । गृह्यमाणा हस्तिनो दुष्टाश्चेत्, लोकं विनाशयन्ति ।

स्वनगरोपकारपरनगरोपकारयोराद्य उपकर्तुर्गुणावहः, द्वितीयः पीडावह इत्याह — स्वपरस्थानीयोपकारयोरिति । तयोः, स्वस्थानीयोपकारः, जानपदानां, धान्यपशुहिरण्यकुप्योपकारः धान्यपश्वादिक्रयविक्रयव्यवहाररूपः, आपदि दुर्भिक्षादिविपत्समये, आत्मधारणः स्वप्राणधारणहेतुः । परस्थानीयोपकारः परस्थानीये स्वेन प्रयुक्तो धान्यादिक्रयविक्रयव्यवहारः, विपरीतः परवृद्धिहेतुत्वादात्मपीडावह इत्यर्थः । इति पीडनानीति । एवं देशपीडनवर्गो व्याख्यात इत्यर्थः ।

अथ स्तम्भनवर्ग इति सूत्रम् । राष्ट्रमुख्याद्यैः प्रत्यूहोक्त्या राजार्थोपरोधः स्तम्भनं तत्सम्बद्धो वर्ग उच्यत इति सूत्रार्थः । जनपददुर्गव्यसनकथनानन्तरं क्रमप्राप्तं कोशव्यसनमनेन सूत्रेणोत्तरेण चाभिधीयते ।

राष्ट्रमुख्यकृतः स्तम्भ आभ्यन्तर इति मित्राटविकृतः स्तम्भो बाह्य इति च स्तम्भो द्विप्रकार इत्याह — आभ्यन्तर इत्यादि । इति स्तम्भवर्ग इति । व्याख्यात इति शेषः ।

कोशसङ्गवर्ग इति सूत्रम् । कोशस्य राजार्थस्य करादेः सङ्गः अप्रदानं भाण्डागारे प्रवेशाकरणं कोशसङ्गः तस्य वर्ग उच्यत इति सूत्रार्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पीडनानामनुत्पत्तौ उत्पन्नानां च वारणे ।
यतेत देशवृद्ध्यर्थं नाशे च स्तम्भसङ्गयोः ॥

इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे चतुर्थोऽध्यायः
पीडनवर्गः स्तम्भनवर्गः कोशसङ्गवर्गः,
आदितः विंशाधिशततमः ॥

ताभ्यामिति । आभ्यन्तरबाह्यस्तम्भाभ्यां, यथोक्तैः पीडनैश्च दैवमानुषरूपैः, पीडितः अल्पितः, मुख्येषु सक्तः करदेभ्यो गृहीत एव मुख्यैर्भक्षितत्वात् तेषु स्थितः, परिहारोपहतः परिहरिण राजशासननिमित्तकेन कराग्रहणेन उपहतः विहतोत्थापनः, प्रकीर्णः कणशस्तत इतो विक्षिप्तावस्थितः, मिथ्यासंहृतः न्याय्यपरिमाणात् न्यूनतयाधिकतया वा संहृतः, सामन्ताटवीहृतः सामन्तैराटविकैश्चापहृतः । हृतस्थाने 'भृत' इत्यादर्शेषु पठ्यते । इति एवम्प्रकाराः, कोशसङ्गाः ॥

प्रान्ते श्लोकमाह—पीडनानामिति । तेषाम्, अनुत्पत्तौ उत्पत्तिप्रतिबन्धे, उत्पन्नाना पीडनानां, वारणे च यतेत राजा । किमर्थं, देशवृद्ध्यर्थम् । स्तम्भसङ्गयोः नाशे च, यतेत, अर्थात् कोशवृद्ध्यर्थम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां व्यसनाधिकारिकेऽष्टमाधिकरणे
चतुर्थोऽध्यायः पीडनवर्गः स्तम्भनवर्गः कोशसङ्गवर्गः,
आदितो विंशत्यधिकशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१३३,१३४. प्रक. बलव्यसनवर्गः, मित्रव्यसनवर्गश्च ।

बलव्यसनानि । अमानितं विमानितम् अभृतं व्याधितं नवागतं दूरायातं परिश्रान्तं परिक्षीणं प्रतिहतं हताग्रवेगम् अपृतुमासम् अभूमिप्रायम् आशानिर्वेदि परिसृतं कलत्रगर्हि अन्तश्शल्यं कुपितमूलं भिन्नगर्भम् अपसृतम् अतिक्षिप्तम् उपनिविष्टं समासम् उपरुद्धम् परिक्षिप्तं छिन्नधान्यपुरुषवीवधं स्वविक्षिप्तं मित्रविक्षिप्तं दूष्ययुक्तं दुष्टपार्ष्णिग्राहं शून्यमूलम् अस्वामिसंहतं भिन्नकूटम् अन्धमिति ।

तेषाममानितविमानितयोरमानितं कृतार्थमानं युध्येत न विमानितमन्तःकोपम् ।

अभृतव्याधितयोरभृतं तदात्वकृतवेतनं युध्येत, न व्याधितमकर्मण्यम् ।

नवागतदूरायातयोर्नवागतमन्यत उपलब्धदेशमनवमिश्रं युध्येत, न दूरायातमायतगतपरिक्लेशम् ।

बलव्यसनवर्ग इति सूत्रम् । बलस्य दण्डस्य यानि व्यसनानि तेषां वर्गः अभिधीयत इति सूत्रार्थः । कोशव्यसनानन्तरं क्रमप्राप्तं दण्डव्यसनमिहोच्यते ।

बलव्यसनानीति । बलस्य व्यसनरूपा धर्मा उच्यन्त इति शेषः । तान् उद्दिशति — **अमानितमित्यादि** ।

तेषां क्रमेण द्वयोर्द्वयोर्गुरुलघुभावं चिन्तयिष्यन् प्रथमस्य द्विकस्य तमादौ निरूपयति—**तेषामिति** । अमानितादिचतुस्त्रिंशद्विशेषयुक्तानां बलानां मध्ये, अमानितविमानितयोः अकृतार्थसत्कारस्यावहेलितस्येत्यनयोर्द्वयोः, **अमानितं**, कृतार्थमानं तत्कालकृतार्थदानसत्कारं सद्, युध्येत । **न विमानितमन्तःकोपमिति** । विमानितं तु हृदयनिहितस्वावज्ञामर्षं न युध्येत ।

अभृतव्याधितयोरित्यादि । अदत्तवेतनरोगिणोर्मध्ये । तदात्वकृतवेतनं तत्कालदत्तवेतनं सत् । अकर्मण्यं कर्माक्षमम् ।

नवागतदूरायातयोरित्यादि । नवागतमचिरायातं दूरायातं दूरादागतं तयोर्मध्ये, नवागतम्, अन्यत उपलब्धदेशं स्वतो देशानभिज्ञमपि नवेतरेभ्यो विज्ञातदेशम्, अनवमिश्रं नवेतरसहितं, युध्येत । **न दूरायातमायतगतपरिक्लेशमिति** । दूरायातं दीर्घाध्वगमनपरिखिन्नत्वान्न युध्येत ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिश्रान्तपरिक्षीणयोः परिश्रान्तं स्नानभोजनस्वप्नलब्धविश्रमं युध्येत, न परिक्षीणमन्यत्राहवे क्षीणयुग्यपुरुषम् ।

प्रतिहतहताग्रवेगयोः प्रतिहतमग्रपातभग्नं प्रवीरपुरुषसंहतं युध्यते, न हताग्रवेगमग्रपातहतप्रवीरम् ।

अनृत्वभूमिप्राप्तयोरनृतुप्राप्तं यथर्तुयोग्ययुग्यशस्त्रावरणं युध्येत, नाभूमिप्राप्तमवरुद्धप्रसारव्यायामम् ।

आशानिर्वेदिपरिसृप्तयोराशानिर्वेदि लब्धाभिप्रायं युध्येत, न परिसृप्तमपसृतमुख्यम् ।

कलत्रगर्ह्यन्तश्शल्ययोः कलत्रगर्ह्यमुज्झ्य कलत्रं युध्येत, नान्तश्शल्यमन्तरमित्रम् ।

परिश्रान्तपरिक्षीणयोरित्यादि । असुखाहारदूरगतागतादिपरिखिन्न परिश्रान्तं युद्धान्तरक्षीणयुग्यपुरुषं परिक्षीणं तयोर्मध्ये । अन्यत्राहवे अन्यस्मिन् युद्धे ।

प्रतिहतहताग्रवेगयोरिति । प्रतिहतं युद्धारम्भ एव प्राप्तभङ्गं हताग्रवेगं हतः प्रवीरपुरुषवधकुण्ठितः अग्रवेगः प्राथमिको युद्धसम्पातोत्साहो यस्य तत् तथाभूतं तयोर्मध्ये, प्रतिहतम्, अग्रपातभग्नमिति तद्विवरणं, प्रवीरपुरुषसंहतं प्रवीरपुरुषमिलितं, युध्येत । हताग्रवेगम्, अग्रपातहतप्रवीरमिति तद्विवरणं, न युध्येत ।

अनृत्वभूमिप्राप्तयोरित्यादि । अनृतुप्राप्तम् अलब्धयुद्धयोग्यर्तुकम् अभूमिप्राप्तं सैन्यव्यायामानर्हभूमिप्राप्तं तयोर्मध्ये, अनृतुप्राप्तं, यथर्तुयोग्ययुग्यशस्त्रावरणं यथोपस्थितर्त्वर्हवाहनायुधकवचादियुक्तं सत्, युध्येत । अभूमिप्राप्तं तु, अवरुद्धप्रसारव्यायामं न युध्येत उपरुद्धसर्वतोगतिकत्वादुपरुद्धयुद्धकर्मत्वाच्च न योद्धुमर्हेत् ।

कामनाविषयवस्त्वलाभप्राप्तनैराश्यमाशानिर्वेदि मुख्यवर्जितं परिसृप्तं तयोर्मध्ये आशानिर्वेदि बलम् आसादितपुनराशास्थानं भूत्वा युध्येत, न तु परिसृप्तं प्रधानापेतत्वादित्याह — **आशानिर्वेदीत्यादि** । अपसृतमुख्यमिति परिसृप्तपदार्थव्याख्यानम् । एवमुत्तरेष्वपि बोध्यम् । अपसृतमित्यपपाठः ।

कलत्रगर्ह्यन्तःशल्ययोरिति । कलत्रं लक्षणया पोष्यवर्गं गर्हति 'एष मे युद्धकर्मपरिपन्थी रक्ष्यभार' इति निन्दतीति कलत्रगर्हि, अन्तरमित्रमन्तःशल्यं तयोर्मध्ये, कलत्रगर्हि, कलत्रम् उन्मुच्य समुचिते रक्षास्थानेऽवस्थाप्य युध्येत । अन्तःशल्यम्, अन्तरमित्रम् अन्तर्गतशत्रुकं, न युध्येत ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुपितमूलभिन्नगर्भयोः कुपितमूलं प्रशमितकोपं सामादिभिर्युध्येत, न भिन्नगर्भमन्योन्यस्माद् भिन्नम् ।

अपसृतातिक्षिप्तयोरपसृतमेकराज्यातिक्रान्तम् मन्त्रव्यायामाभ्यां सत्रमित्रापाश्रयं युध्येत, नातिक्षिप्तमनेकराज्यातिक्रान्तं बहाबाधत्वात् ।

उपनिविष्टसमाप्तयोरुपनिविष्टं पृथग्यानस्थानमतिसन्धातारं युध्येत, न समाप्तमरिणैकस्थानयानम् ।

उपरुद्धपरिक्षिप्तयोरुपरुद्धमन्यतो निष्क्रम्योपरोद्धारं प्रतियुध्येत, न परिक्षिप्तं सर्वतः प्रतिरुद्धम् ।

छिन्नधान्यपुरुषवीवधयोः छिन्नधान्यमन्यतो धान्यमानीय जङ्गमस्थावराहारं वा युध्येत, न छिन्नपुरुषवीवधमनभिसारम् ।

कुपितमूलं क्रुद्धप्रधानकं भिन्नगर्भं परस्परभिन्नगर्भितं तयोर्मध्ये, कुपितमूलं, सामादिभिः प्रशमितकोपं सद् युध्येत, नतु भिन्नगर्भमित्याह — **कुपितमूलभिन्नगर्भयोरित्यादि ।**

एकस्मिन् राज्येऽतिक्रान्तं बलैर्विप्रकृतं यत् तदपसृतमुच्यते । अनेकेषु राज्येष्वतिक्रान्तं बलैः कृतभङ्गं यत् तद् अतिक्षिप्तमुच्यते । तयोर्मध्ये अपसृतं शास्त्रदृष्टोपायचिन्तालक्षणेन मन्त्रेण शिक्षाविशेषलक्षणेन व्यायामेन च अरण्यं मित्रं चापाश्रित्य युध्येत, न तु अतिक्षिप्तम् अनेकराज्यानुभूतबहुपीडत्वादित्याह — **अपसृतातिक्षिप्तयोरित्यादि** । सत्रम् अरण्यम् ।

शत्रोः समीपे यन्निविष्टं न शत्रुणा सह निविष्टम् अर्थाच्छत्रुसम्बद्धस्वीययानस्थानं, तद् उपनिविष्टम् । यच्छत्रुणा सह तुल्यस्थानयानं तत् समाप्तम् । तयोर्मध्ये उपनिविष्टं बलं स्वातिसन्धातारं शत्रुं प्रति युध्येत पृथग्यानस्थानस्यात्मनो रन्ध्रं स न जानातीति कृत्वा । न तु समाप्तं स्वातिसन्धातारं शत्रुं प्रति युध्येत स्वस्यारिणा सहैकस्थानयानस्य रन्ध्रं स जानातीति कृत्वेत्याह — **उपनिविष्टसमाप्तयोरित्यादि** ।

एकतः प्रतिरुद्धमुपरुद्धं सर्वतः प्रतिरुद्धं परिक्षिप्तम् । तयोर्मध्ये उपरुद्धम् उपरोधदेशेतरदेशतो निर्गत्योपरोद्धारं प्रति युध्येत, न पुनः परिक्षिप्तमित्याह — **उपरुद्धपरिक्षिप्तयोरित्यादि** ।

विच्छिन्नस्वदेशधान्यागमं छिन्नधान्यम् उच्यते, विच्छिन्नस्वदेशयौधपुरुषशिक्यादिभारागमं छिन्नपुरुषवीवधम् । तयोर्मध्ये छिन्नधान्यमन्यदेशाद् व्रीह्यादिधान्यमानीय वा युध्येत, मृगादिजङ्गममांसाहारं वृक्षादिस्थावरफला-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वविक्षिप्तमित्रविक्षिप्तयोः स्वविक्षिप्तं स्वभूमौ विक्षिप्तं सैन्यमापदि शक्यमवस्रावयितुं, न मित्रविक्षिप्तं विप्रकृष्टदेशकालत्वात् ।

दूष्ययुक्तदुष्टपार्ष्णिग्राहयोर्दूष्ययुक्तमात्मपुरुषाधिष्ठितमसंहतं युध्येत, न दुष्टपार्ष्णिग्राहं पृष्ठाभिघातत्रस्तम् ।

शून्यमूलास्वामिसंहतयोः शून्यमूलं कृतपौरजानपदारक्षं सर्वसन्दोहेन युध्येत, नास्वामिसंहतं राजसेनापतिहीनम् ।

भिन्नकूटान्धयोर्भिन्नकूटमन्याधिष्ठितं युध्येत, नान्धमदेशिकमिति ॥

दोषशुद्धिर्बलावापः सत्रस्थानातिसंहितम् ।
सन्धिश्चोत्तरपक्षस्य बलव्यसनसाधनम् ॥

द्याहारं च भूत्वा वा युध्येत, न तु छिन्नपुरुषवीवधमसहायमित्याह— **छिन्नधान्यपुरुषवीवधयोरित्यादि** ।

स्वभूमौ कार्यार्थं तत इतः प्रेषितं स्वविक्षिप्तमुच्यते, मित्रभूमौ तत्कार्यार्थं प्रेषितं मित्रविक्षिप्तम् । तयोर्मध्ये स्वविक्षिप्तं सैन्यं पराभियोगविपदि प्राप्तायामावाहयितुं शक्यं, न तु मित्रविक्षिप्तं विप्रकृष्टदेशस्थत्वेन सन्निधानविलम्बित्वादित्याह— **स्वविक्षिप्तमित्रविक्षिप्तयोरित्यादि** ।

राज्योपघातिनो मुख्या हि दूष्याः, तैर्युक्तं दूष्ययुक्तमुच्यते । पृष्ठाभिघातरन्ध्रान्वेषिपार्ष्णिग्राहं दुष्टपार्ष्णिग्राहम् । तयोर्मध्ये दूष्ययुक्तं दूष्योपजीव्यस्वविश्वस्तपुरुषाधिष्ठितं दूष्यान्तरासंहतं सद् युध्येत, न तु दुष्टपार्ष्णिग्राहं पृष्ठाभिघातभयग्रस्तत्वादित्याह — **दूष्ययुक्तदुष्टपार्ष्णिग्राहयोरित्यादि** ।

निरवशेषसैन्यसन्दोहेन प्रस्थितं शून्यमूलमुच्यते, राज्ञा सेनापतिना वानधिष्ठितम् अस्वामिसंहतम् । तयोर्मध्ये शून्यमूलं पौरजानपदकृतपरिरक्षं भूत्वा सर्वसन्दोहेन युध्येत, न पुनरस्वामिसंहतमनायकत्वादित्याह— **शून्यमूलास्वामिसंहतयोरित्यादि** ।

भिन्नकूटान्धयोरिति । कूटं शृङ्गं तत्स्थानीयः सर्वसेनाध्यक्षः तद्रहितं भिन्नकूटम्, अन्धं शत्रुवृत्तिज्ञानशून्यं, तयोर्मध्ये भिन्नकूटम् अन्याधिष्ठितम् अन्येन प्रधानेनाध्यक्षितं भूत्वा युध्येत । अदेशिकम् उपदेष्टृरहितम् अन्धं न युध्येत । इतिशब्दो बलव्यसनस्वरूपादिनिरूपणसमाप्त्यर्थः ॥

उक्तानां बलव्यसनानां परिहारोपायानाह—**दोषशुद्धिरिति** । अमाननविमाननादीनां दोषाणां प्रायश्चित्तविधानं दोषशुद्धिः, बलावापः निर्दोषस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रक्षेत् स्वदण्डं व्यसने शत्रुभ्यो नित्यमुत्थितः ।
प्रहरेद् दण्डरन्ध्रेषु शत्रूणां नित्यमुत्थितः ॥
अभियातं स्वयं मित्रं सम्भूयान्यवशेन वा ।
परित्यक्तमशक्त्या वा लोभेन प्रणयेन वा ॥
विक्रीतमभियुञ्जाने सङ्ग्रामे वापवर्तिना ।
द्वैधीभावेन वा मित्रं यास्यता वान्यमन्यतः ॥

बलस्य बलान्तरेण सहावस्थापनं, सत्रस्थानातिसंहितं सत्रस्थानमरण्यस्थितिः अतिसंहितं कपटोपायैः शत्रुबलातिसन्धानं च, अतिसंधानमित्यपि पाठः । उत्तरपक्षस्य सन्धिश्च बलाधिकप्रतिपक्षेण सन्धिकरणं च, बलव्यसनसाधनं बलव्यसनानां परिहारोपायः ॥

उपदेष्टव्यशेषमाह — **रक्षेदिति** । नित्यमुत्थितः नित्योद्योगी सन्, व्यसने, स्वदण्डं स्वबलं, शत्रुभ्यो रक्षेत् । तथाभूत एव सन्, शत्रूणां, दण्डरन्ध्रेषु सैन्यच्छिद्रेषु, प्रहरेत् ॥

इत्थं बलव्यसनं निरूपितम् । अथ मित्रव्यसने निरूपणीये सूत्रम् — **मित्रव्यसनवर्ग इति** । मित्रसंबन्धिनां व्यसनानां वर्ग उच्यत इति सूत्रार्थः ।

तमेवाह — **अभियातमिति** । स्वयं स्वकार्यार्थं वा, संभूय समुदायेन सह तदर्थं समवेत्य वा, अन्यवशेन वा स्वबन्ध्वादिकार्यवशेन वा, अभियातं शत्रौ कृताभियोगं, मित्रम्, अशक्त्या वा शक्तिविरहेण वा, लोभेन वा शत्रुसकाशाद् धनग्रहणेन वा, प्रणयेन वा शत्रौ स्नेहेन वा, परित्यक्तम् अकृतसाहाय्यम् अर्थाद् विजिगीषुणा, यद् यथोक्तास्ववस्थासु यथाशक्ति साह्ये कर्तव्ये विजिगीषुणात्मदोषादुपेक्षितं, तत् तथाविधं मित्रमिति श्लोकार्थः । तस्य च 'कृच्छ्रेण साध्यते' इति वक्ष्यमाणेन सम्बन्धः । एवमुत्तरत्रापि बोद्धव्यम् । अयमेको मित्रव्यसनस्य प्रयोजकः प्रकारः ॥

प्रकारान्तरमाह — **विक्रीतमित्यादि** । संग्रामे युद्धे, अभियुञ्जाने अनुष्ठीयमानाभियोगे न तु निस्तीर्णाभियोगे सति अर्थान्मित्रे, अपवर्तिना स्वारब्धमेव साहाय्यमपरिसमाप्य परस्माद् धनं गृहीत्वा मध्ये निवर्तमानेन विजिगीषुणा, विक्रीतं वा स्वीयत्वात् प्रच्यावितं वा, मित्रम् । प्रकारमन्यमाह — **द्वैधीभावेन वेति** । स्वमित्रशत्रुणा सह सन्धिं कृत्वा स्वयातव्यं प्रति यानं द्वैधीभावः तेन निमित्तेन वा, विक्रीतं, मित्रम् । प्रकारान्तरमाह — **यास्यता**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृथग्वा सह याने वा विश्वासेनातिसंहितम् ।
भयावमानालस्यैर्वा व्यसनान्न प्रमोक्षितम् ॥
अवरुद्धं स्वभूमिभ्यः समीपाद् वा भयाद् गतम् ।
आच्छेदनाददानाद् वा दत्त्वा वाप्यवमानितम् ॥
अत्याहारितमर्थं वा स्वयं परमुखेन वा ।
अतिभारे नियुक्तं वा भङ्क्त्वा परमवस्थितम् ॥
उपेक्षितमशक्त्या वा प्रार्थयित्वा विरोधितम् ।
कृच्छ्रेण साध्यते मित्रं सिद्धं चाशु विरज्यति ॥

वान्यमन्यत इति । 'त्वमितो याहि अहमितो यास्यामी'त्येवम् अन्यतः अन्येन स्वमित्रशत्रुणा सह संन्धिं कृत्वा, अन्यं स्वशत्रुं, यास्यता वा विजिगीषुणा, विक्रीतं मित्रम् ॥

प्रकारान्तरमाह—**पृथग्वेत्यादि** । पृथग् याने विश्वासेन वा 'त्वमितो याहि त्वच्छत्रुं प्रति अहमितो यास्यामी'ति भिन्नदिक्कयानविषयसन्धिविश्वासेन वा, सह याने विश्वासेन वा सहयानसन्धिविश्वासेन वा, अतिसंहितं मित्रशत्रोः प्रच्छन्नसाहाय्यकरणेन वञ्चितं, मित्रम् । प्रकारान्तरमाह— **भयावमानालस्यैर्वेति** । मित्रशत्रोः सकाशाद् भयेन वा मित्रविषयानादरेण वा अलसतया वा, व्यसनात् शत्रभियोगात्, न प्रमोक्षितम् अनिस्तारितं, मित्रम् ।

प्रकारान्तराण्याह — **अवरुद्धमिति** । स्वभूमिभ्यः अवरुद्धं स्वभूमिमुद्दिश्य प्रतिरुद्धागमनं मित्रम् । समीपाद् भयाद् गतं वा वधबन्धनादिशङ्कया स्वसमीपात् स्वयमेव गतं वा मित्रम् । आच्छेदनाद् बलेन द्रव्यापहरणाद्, अवमानितं मित्रम् । अदानाद् वा दातव्याप्रदानाद् वा, अवमानितं मित्रम् । दत्त्वापि वा दातव्यं प्रदायापि वा अवमानितं मित्रम् ॥

प्रकारान्तरमाह—**अत्याहारितमिति** । स्वयं, परमुखेन वा अन्यद्वारेण वा, अर्थम् अत्याहारितं वा धनमतिमात्रहारितं वा, मित्रम् । प्रकारान्तरमाह — **अतिभार इत्यादि** । विजिगीषुशत्रुं निर्जित्य प्राप्तमात्रमेव पुनरपि दुस्साधे कार्ये नियुक्तं वा, मित्रम् ॥

प्रकारान्तरमाह—**उपेक्षितमशक्त्या वेति** । सामर्थ्यविरहेणानपेक्षितं, प्रार्थयित्वा विरोधितं पुनर्मित्रभावप्रार्थनयोपगतमुत्पादितविरोधं वा, मित्रम् । इत्थं व्युत्पादितनानाप्रकारविकारप्राप्तस्य पुनस्साध्यतापेक्षायामाह — **कृच्छ्रे-**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृतप्रयासं मान्यं वा मोहान्मित्रममानितम् ।
मानितं वा न सदृशं भक्तितो वा निवारितम् ॥
मित्रोपघातत्रस्तं वा शङ्कितं वारिसंहितात् ।
दूष्यैर्वा भेदितं मित्रं साध्यं सिद्धं च तिष्ठति ॥
तस्मान्नोत्पादयेदेनान् दोषान मित्रोपघातकान् ।
उत्पन्नान् वा प्रशमयेद् गुणैर्दोषोपघातिभिः ॥
यतो निमित्तं व्यसनं प्रकृतीनामवाप्नुयात् ।
प्रागेव प्रतिकुर्वीत तन्निमित्तमतन्द्रितः ॥

इति कौटलीयार्थशास्त्रे व्यसनाधिकारिके अष्टमाधिकरणे
पञ्चमोऽध्यायः बलव्यसनवर्गः मित्रव्यसनवर्गः,
आदितः एकविंशतिशततमः ॥
एतावता कौटलीयस्यार्थशास्त्रस्य व्यसनाधिकारिकम्
अष्टममधिकरणं समाप्तम् ॥

णेति । मित्रं यथोक्तविकारभेदभिन्नं, कृच्छ्रेण साध्यते क्लेशेन स्वानुकूलीक्रियते विजिगीषुणा । सिद्धं वा कथञ्चित् प्राप्तानुकूल्यमपि वा, आशु क्षिप्रं, विरज्यति निःस्नेहं भवति ॥

इत्थं विकृतचित्तेषु मित्रेषु दुस्साधानां वर्गमुक्त्वा सुसाधानां वर्गमाह—**कृतप्रयासमिति** । विजिगीष्वर्थे कृतसंग्रामादिपरिश्रमम्, अत एव मान्यं पूजार्हम्, मोहाद् अमानितं प्रमादादपूजितं वा इति प्रथमम् । **मानितं वा न सदृशमिति** द्वितीयम्, अकृतस्वप्रयासानुरूपसत्कारं वेत्यर्थः । **भक्तितो वा निवारितमिति** तृतीयं, शत्रुभिः विजिगीषुविषयादनुरागात् प्रतिषिद्धमित्यर्थः । **मित्रोपघातत्रस्तं** वेति चतुर्थं, मित्रस्यान्यस्योपघातं विजिगीषुणा कृतं दृष्ट्वा स आत्मनोऽपि क्रियेतेति भीतमित्यर्थः । **शङ्कितं वारिसंहितादिति** पञ्चमं, स्वशत्रुणा कृतसन्धानाद् विजिगीषोरुपजातशङ्कमित्यर्थः । **दूष्यैर्वा भेदितमिति** षष्ठं, राज्योपघातपरैः प्रधानैः प्रयुक्तभेदमित्यर्थः । मित्रं यथोक्तषट्प्रकारं, साध्यं विकारापनयनेन प्रकृतिं नेतुं शक्यम् । सिद्धं च तिष्ठति प्रकृतिप्राप्तं च पुनर्न विक्रियते ॥

तस्मादिति । सर्वथापि परिहर्तव्यत्वाद्धेतोः, एनान् दोषान् मित्रोपघातकान् मैत्रीभङ्गहेतून् यथोक्तान् परित्यक्तत्वविक्रीतत्वादिरूपान् दोषान्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोत्पादयेत् अर्थान्मित्रेषु । उत्पन्नान् वा यदृच्छासम्भूतांश्च तान् दोषान्, दोषोपघातिभिः गुणैः सान्त्वादिरूपैः, प्रशमयेत् ॥

पूर्वोक्तसर्वविधस्वाम्यादिप्रकृतिव्यसनसाधारणं विधिं वदन्नधिकरणमुपसंहरति— यत इत्यादि । इह यत इति द्वितीयार्थे तसिः । अतन्द्रितोऽनलसः अर्थाद् विजिगीषुः, प्रकृतीनां स्वाम्यादीनां मित्रान्तानां सम्बन्धि, व्यसनं कर्तृ, यत् निमित्तं स्वोत्पादकम् अवाप्नुयात्, तत् निमित्तं, तदवाप्तेः प्रागेव, प्रतिकुर्वीत परिहरेत् तदुत्पत्तिप्रागभावं परिरक्षेदित्यर्थः । अस्य श्लोकस्य मित्रव्यसनवर्गनिरूपणारम्भात् प्राक् पाठो मातृकासु दृश्यते ॥

इत्यष्टमाधिकरणं श्रीमूले विवृतौ गतम् ।
कौटलीयस्य व्यसनाधिकारिकसमाह्वयम् ॥

इति श्रीचञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्त्तितरुधाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायां व्यसनाधिकारिकेऽष्टमाधिकरणे पञ्चमोऽध्यायः बलव्यसनवर्गो मित्रव्यसनवर्गः, आदित एकविंशत्यधिकशततमः ॥

इति व्यसनाधिकारिकमष्टमधिकरणं समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभियास्यत्कर्म—नवममधिकरणम् ।

१३५,१३६. प्रक. शक्तिदेशकालबलाबलज्ञानं, यात्राकालाश्च ।

विजिगीषुरात्मनः परस्य च बलाबलं शक्तिदेशकालयात्राकालबलसमुत्थानकालपश्चात्कोपक्षयव्ययलाभापदां ज्ञात्वा विशिष्टबलो यायात् । अन्यथासीत ।

उत्साहप्रभावयोरुत्साहः श्रेयान् । स्वयं हि राजा शूरो बल-

अभियास्यतः पूर्वाधिकरणनिरूपितप्रकृतिव्यसनगुरुलघुभावज्ञानवत् शक्त्यादीनां बलाबलस्य ज्ञानमप्यपेक्षितमिति तन्निरूपणायेदमधिकरणमारभ्यतेऽभियास्यत्कर्मास्यम् । तत्रेदं प्रथमं

शक्तिदेशकालबलाबलज्ञानमिति सूत्रम् । शक्तेरुत्साहप्रभावमन्त्रलक्षणायाः देशस्य समविषमाद्यात्मकस्य कालस्य शीतोष्णादिरूपस्य च यद् बलं स्वसैन्यस्य युद्धयोग्यत्वं यच्चाबलं परसैन्यस्य युद्धायोग्यत्वं तयोर्ज्ञानं विचारः क्रियत इति सूत्रार्थः ।

शक्त्यादिज्ञानस्य यानं प्रति प्रयोजकतामन्वयव्यतिरेकाभ्यामाह—**विजिगीषुरिति** । सः, आत्मनः परस्य च विषये, बलाबलं शक्त्यादीनां शक्तिदेशकालयात्राकालबलसमुत्थानकालानां बलं यानानुकूलत्वं तदनुष्ठाननिमित्तभूतम् अबलं तद्विपरीतं, पश्चात्कोपक्षयव्ययलाभापदां बलं यानाननुकूलत्वं यानपरिहारनिमित्तभूतम् अबलं तद्विपरीतं च, ज्ञात्वा परस्परतोऽन्यतश्च सम्प्रधार्य, विशिष्टबलो यायात् परापेक्षयात्मनो यानानुकूलशक्त्यादिविशेषयोगे सति यानमनुतिष्ठेत् । तत्र शक्त्यादिषु कालः कार्यानुरूपबलोपादानकालः, पश्चात्कोपो विजिगीषौ याते पश्चात् तस्य स्थानीयादौ पार्ष्णिग्राहादिभिर्दाहविलोपाद्यारम्भः, क्षयो युग्यपुरुषापचयः, व्ययः हिरण्याद्यपचयः, लाभः फलसिद्धिः, आपदः 'बाह्याभ्यन्तराश्चापदः' इति सूत्रे व्याख्यास्यमानाः इति बोद्धव्यम् । **अन्यथासीतेति** । विशिष्टबलत्वाभावे न यायादित्यर्थः ।

शक्तिषु श्रेयस्त्वं चिन्तयन्नाचार्यमतमाह— **उत्साहप्रभावयोरिति** । उत्साहः शौर्यबलारोग्यादियोगः प्रभावः कोशदण्डयोगः तयोर्मध्ये, उत्साहः, श्रेयान् प्रशस्ततरः । तत्र हेतुमाह — **स्वयं हि राजेत्यादि** । राजा हि स्वयं शौर्यवान् कायशक्तियुक्त आरोग्यसम्पन्नः शिक्षितास्त्रविद्यो मित्रबलसहकृत-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वानरोगः कृताम्नो दण्डद्वितीयोऽपि शक्तः प्रभाववन्तं राजानं जेतुम्, अल्पोऽपि चास्य दण्डस्तेजसा कृत्यकरो भवति। निरुत्साहस्तु प्रभाववान् राजा विक्रमाभिपन्नो नश्यति इत्याचार्याः।

नेति कौटल्यः। प्रभाववानुत्साहवन्तं राजानं प्रभावेनातिसन्धत्ते तद्विशिष्टमन्यं राजानम् आवाह्य हृत्वा क्रीत्वा प्रवीरपुरुषान्। प्रभूतप्रभावहयहस्तिरथोपकरणसम्पन्नश्चास्य दण्डः सर्वत्राप्रतिहतश्चरति। उत्साहवतश्च प्रभाववन्तो जित्वा क्रीत्वा च स्त्रियो बालाः पङ्गवोऽन्धाश्च पृथिवीं जिग्युः इति।

प्रभावमन्त्रयोः प्रभावः श्रेयान्। मन्त्रशक्तिसम्पन्नो हि वन्ध्यबुद्धिरप्रभावो भवति, मन्त्रकर्म चास्य निश्चितमप्रभावो गर्भधान्यमवृष्टिरिवोपहन्ति इत्याचार्याः।

स्वीयदण्डमात्रसहायोऽपि सन् प्रभाविनं राजानं जेतुं शक्तो भवति, अस्यैव तेजोमहिम्ना दण्डः स्वल्पोऽपि कार्यक्षमो भवतीत्येतस्मात् कारणादित्यर्थः। प्रभाववतोऽप्युत्साहव्यतिरेके जयव्यतिरेकमाह — निरुत्साहस्त्वित्यादि।

आचार्यमतं खण्डयति — नेति कौटल्य इति। युक्तिमाह — प्रभाववानिति। सः, उत्साहवन्तं राजानं प्रभावेन, अतिसन्धत्ते अतिशेते, कथं कृत्वा, तद्विशिष्टं तस्माद् यातव्याद् विशिष्टमुत्कृष्टबलम्, अन्यं राजानम्, आवाह्य स्वसाह्यार्थं वरयित्वा, प्रवीरपुरुषान्, हृत्वा भक्तवेतनदानेन स्वीकृत्य, क्रीत्वा प्रभूतधनदानेन स्वायत्तीकृत्य वा। प्रभूतप्रभावादिसम्पन्नश्च, भूत्वेति शेषः, अस्य दण्डः सर्वत्र अप्रतिहतः, चरति प्रसरति। किञ्च स्त्रीबालपङ्ग्वन्धा अपि कोशसम्पन्महिम्ना उत्साहवतः प्रवीरान् स्वायत्तीकृत्य भूमिं जितवन्त इत्यैतिह्यमप्यस्तीत्याह — उत्साहवतश्चेत्यादि। इतिशब्दानन्तरम् ऐतिह्यमिति शेषः।

प्रभावमन्त्रशक्त्योर्मध्ये प्रभावशक्तिः श्रेयसी, कस्मात्, मन्त्रशक्तियुक्तः प्रभावशक्तिरहितश्चेत्, निष्फलमन्त्रो भवति; प्रभावाभावो हि तस्य विचार्यनिर्णीतं मन्त्रार्थानुष्ठानप्रकारं कोशदण्डैकसाध्यमुपहन्ति, यथा गर्भस्थं धान्यं वृष्ट्यपेक्षोद्गमनं वृष्ट्यभाव उपहन्ति तद्वदित्याचार्या मन्यन्त इत्याह — प्रभावमन्त्रयोरित्यादि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः। मन्त्रशक्तिः श्रेयसी। प्रज्ञाशास्त्रचक्षुर्हि राजा अल्पेनापि प्रयत्नेन मन्त्रमाधातुं शक्तः, परानुत्साहप्रभाववतश्च सामादिभिर्योगोपनिषद्भ्यां चातिसन्धातुम्। एवमुत्साहप्रभावमन्त्रशक्तीनामुत्तरोत्तराधिकोऽतिसन्धत्ते।

देशः पृथिवी। तस्यां हिमवत्समुद्रान्तरमुदीचीनं योजनसहस्रपरिमाणं तिर्यक् चक्रवर्तिक्षेत्रम्। तत्रारण्यो ग्राम्यः पार्वत औदको भौमः समो विषम इति विशेषाः। तेषु यथास्वबलवृद्धिकरं कर्म प्रयुञ्जीत। यत्रात्मनः सैन्यव्यायामानां भूमिः अभूमिः परस्य, स उत्तमो देशः। विपरीतोऽधमः। साधारणो मध्यमः।

आचार्यमतं निषेधन् स्वमतमाह — नेति कौटल्य इत्यादि। मन्त्रशक्तिरिति। सा श्रेयसीत्यत्र युक्तिमाह — प्रज्ञाशास्त्रचक्षुर्हीति। प्रज्ञा शेमुषी शास्त्रं श्रुतं ते चक्षुषी यस्य स तथाभूतो हि, राजा, अल्पेनापि प्रयत्नेन, मन्त्रम्, आधातुम् अनुष्ठातुं, शक्तः। परान् उत्साहप्रभाववतश्च, सामादिभिः उपायैः, योगोपनिषद्भ्यां योगेन तीक्ष्णादिगूढपुरुषप्रयोगेण उपनिषदा औपनिषदिकोक्तविषाग्न्यादिना च, अतिसन्धातुं शक्तः, आत्मन उत्साहप्रभावाल्पत्वेऽपीत्यर्थम्। एवमिति। अनेन प्रकारेण उत्साहाद्युत्तरोत्तरगौरवसिद्ध्येत्यर्थः, उत्साहप्रभावमन्त्रशक्तीनाम्, उत्तरोत्तराधिकः उत्तरोत्तरयाधिको राजा, अतिसन्धत्ते पूर्वपूर्वशक्तियोगिनमतिशेते। इति शक्तिर्निरूपिता।

देशं निरूपयति—देशः पृथिवीति। तस्यामिति। पृथिव्यां, हिमवत्समुद्रान्तरम् उदीचीनं हिमालयदक्षिणसमुद्रयोरन्तरालम् उदग्भवं, तिर्यग् योजनसहस्रपरिमाणं पूर्वापरसमुद्रावधिकं योजनसहस्रमितं, चक्रवर्तिक्षेत्रं चक्रवर्तिनां क्षेत्रं यस्याखण्डस्य शासनेन राजा चक्रवर्तीति व्यपदिश्यते तदित्यर्थः। विशेषानाह — तत्रेति। चक्रवर्तिक्षेत्रे, आरण्यः कृष्यनर्हदेशप्रायः, ग्राम्यः कृष्यर्हदेशप्रायः, पार्वतः उन्नतदृषत्प्रायः, औदक आस्रावयुक्तः, भौमः स्थलप्रायः, समः अनुन्नतानतः, विषमः उन्नतानतः, इति विशेषाः। तेष्विति। उक्तेषु विशेषेषु, यथास्वबलवृद्धिकरं स्वसैन्यजयावहं यथा भवेद् अर्थात् परसैन्यपराजयावहं च तथाभूतं, कर्म युद्धं, प्रयुञ्जीत। यत्रेति। यस्मिन् देशे, आत्मनः सैन्यव्यायामानां, भूमिः योग्यः प्रदेशो, लभ्यत इति शेषः, परस्य शत्रोः, सैन्यव्यायामानाम्, अभूमिः योग्यप्रदेशाभावः, स उत्तमो देशः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालः शीतोष्णवर्षात्मा । तस्य रात्रिरहः पक्षो मास ऋतुरयनं संवत्सरो युगमिति विशेषाः । तेषु यथास्वबलवृद्धिकरं कर्म प्रयुञ्जीत । यत्रात्मनः सैन्यव्यायामानामृतुः अन्यतुः परस्य स उत्तमः कालः । विपरीतोऽधमः । साधारणो मध्यमः ।

शक्तिदेशकालानां तु शक्तिः श्रेयसीत्याचार्याः । शक्तिमान् हि निम्नस्थलवतो देशस्य शीतोष्णवर्षवतश्च कालस्य शक्तः प्रतीकारे भवति ।

देशः श्रेयान् इत्येके, स्थलगतो हि श्वा नक्रं विकर्षति, निम्नगतो नक्रः श्वानमिति ।

कालः श्रेयान् इत्येके । दिवा काकः कौशिकं हन्ति, रात्रौ कौशिकः काकम् इति ।

विपरीतः परस्य सैन्यव्यायामानां भूमिः आत्मनश्चाभूमिर्यः स देश इत्यर्थः, अधमः । साधारणः आत्मपरयोर्विशेषरहितो देशः, मध्यमः ।

कालं निरूपयति — **काल इति** । सः, शीतोष्णवर्षात्मा शीतस्वभावो हेमन्तादिरूपः उष्णस्वभावो ग्रीष्मादिरूपः वर्षस्वभावः प्रावृड्रूपश्च भवति । तस्य विशेषानाह — **तस्य रात्रिरित्यादि** । उक्तेषु कालस्य विशेषेषु कर्मप्रयोगप्रकारं कालस्योत्तमादित्वं चाह — **तेषु यथास्वबलवृद्धिकरमित्यादि** ।

इत्थं शक्त्यादिवान्तरभेदानां बलाबलं विचारितम् । इदानीं शक्त्यादीनां त्रयाणां मिथो बलाबलं विचारयन्नाचार्यमतमाह — **शक्तिदेशकालानां त्वित्यादि** । तत्र युक्तिमाह — **शक्तिमान् हीत्यादि** । प्रतीकारे प्रतिक्रियायाम् । तत्र देशस्य प्रतिक्रिया निम्नादेर्मृदापूरणादिः, कालस्य प्रतिक्रिया कञ्चुकादिना शीतादिवारणम् ।

तत्रैकीयमतमाह — **देश इत्यादि** । स्थले शुनो नक्रविकर्षणयोग्यतायाः अस्थले तदभावस्य च, जले नक्रस्य श्वविकर्षणयोग्यतायाः अजले तदभावस्य चोपलब्ध्या बलाबलस्य देशतद्भावतदभावानुविधायित्वाद् देश एव श्रेयानित्यर्थः ।

काकदिवापराक्रमित्व-वृकरात्रिपराक्रमित्वदृष्टान्तेन बलाबलस्य कालान्वयव्यतिरेकानुविधानं वर्णयन्तः कालस्य श्रेयस्त्वमेके मन्यन्त इत्याह — **कालः श्रेयानित्यादि** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः । परस्परसाधका हि शक्तिदेशकालाः ।

तैरभ्युच्चितः तृतीयं चतुर्थं वा दण्डस्यांशं मूले पार्ष्ण्यां प्रत्यन्ताटवीषु च रक्षा विधाय कार्यसाधनसहं कोशदण्डं चादाय क्षीणपुराणभक्तगृहीतनवभक्तमसंस्कृतदुर्गमित्रं, वार्षिकं चास्य सस्यं हैमनं च मुष्टिमुपहन्तुं मार्गशीर्षीं यात्रां यायात् । हैमनं चास्य सस्यं वासन्तिकं च मुष्टिमुपहन्तुं चैत्रीं यात्रां यायात् । क्षीणतृणकाष्ठोदकमसंस्कृतदुर्गमामित्रं, वासन्तिकं चास्य सस्यं वार्षिकीं वा मुष्टिमुपहन्तुं ज्येष्ठामूलीयां यात्रां यायात् ।

उक्तं मतत्रयमपि प्रतिषेधति — नेति कौटल्य इति । तत्र हेतुमाह — परस्परसाधका हि शक्तिदेशकाला इति । सत्यामपि शक्तौ देशकालाभावे कार्यासिद्ध्या सतोरपि देशकालयोः शक्त्यभावे कार्यासिद्ध्या च तेषां त्रयाणामन्योन्यसापेक्षतयैव कार्यसाधकत्वदर्शनात् समं प्राधान्यमित्यभिप्रायः । इत्थं शक्तिदेशकालबलाबलं चिन्तितम् ।

अथ यात्राकालनिरूपणार्थं सूत्रं —

यात्राकाला इति । शत्रुमुद्दिश्य विजिगीषोर्यानं यात्रा तस्याः समुचिताः काला अभिधीयन्त इति सूत्रार्थः ।

तैरभ्युच्चित इति । शक्तिदेशकालैः परापेक्षयातिशयं प्राप्तः विजिगीषुः, तृतीयं चतुर्थं वा यथोचितं, दण्डस्य त्रेधा चतुर्धा वा विभक्तस्य बलस्य, अंशं, मूले स्थानीये, पार्ष्ण्यां पृष्ठे, प्रत्यन्ताटवीषु च विषयान्तेऽरण्येषु च, रक्षा विधाय रक्षार्थं स्थापयित्वा, कार्यसाधनसहं, कोशदण्डं च कोशं दण्डं च, आदाय, अमित्रमुपहन्तुं, मार्गशीर्षीं यात्रां यायात् मार्गशीर्षे मासि शत्रुं प्रति अभियायात् । शत्रोः सुखोपहन्तव्यतार्थं त्रीणि विशेषणान्याह — क्षीणपुराणभक्तमित्यादि । यदा पुराणं पूर्वभोगसञ्चितं भक्तं क्षीणं नवसंग्राह्यं चागृहीतं दुर्गं चाकृतसमुचितरक्षाविधानं पश्यति, तथाविधे काले समुत्पन्नसस्यग्रहणप्रतिबन्धलक्षणेन नवबीजवापप्रतिबन्धलक्षणेन चोपघातेनैनं योजयितुं यायादित्यर्थः । इह हि वर्षासुबीजनिष्पन्नसस्यग्रहणपूर्वको हेमन्ते बीजवाप इत्येको भोगः, हेमन्तोप्तबीजनिष्पन्नसस्यग्रहणपूर्वो वसन्ते बीजवाप इत्यपरो भोगः, वसन्तोप्तबीजनिष्पन्नसस्यग्रहणपूर्वो वर्षासु बीजवाप इत्यन्य इत्येवं त्रयः प्रत्यब्दं भोगा भवन्ति । तेषु कतमं भोगमुपहन्तुं कतमस्मिन् मासि यात्रां यायादित्याकाङ्क्षायामाह — वार्षिकं चास्य सस्यमित्यादि । अयमर्थः —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्युष्णमल्पयवसेन्धनोदकं वा देशं हेमन्ते यायात् ।
तुषारदुर्दिनमगाधनिम्नप्रायं गहनतृणवृक्षं वा देशं ग्रीष्मे यायात् ।
स्वसैन्यव्यायामयोग्यं परस्यायोग्यं वर्षासु यायात् ।

मार्गशीर्षं तैषं चान्तरेण दीर्घकालां यात्रां यायात् । चैत्रं वैशाखं चान्तरेण मध्यमकालां, ज्येष्ठामूलीयमाषाढं चान्तरेण ह्रस्वकालामुपोषिष्यन् । व्यसने चतुर्थीम् । व्यसनाभियानं विगृह्ययाने व्याख्यातम् ।

प्रथमं भोगमुपहन्तुं मार्गशीर्षे मासि यायाद्, द्वितीयं चैत्रे, तृतीयं ज्येष्ठामूलीयापराख्ये ज्यैष्ठे इति । तत्रासंस्कृतदुर्गस्यामित्रस्य सद्योदुर्गसंस्कारमिच्छतोऽपि ज्येष्ठामूलीये तदपेक्षिततृणकाष्ठोदकादिक्षयात् सुतरामुपघातो भवतीति द्योतयितुं क्षीणतृणकाष्ठोदकमसंस्कृतदुर्गममित्रमित्यमित्रस्य विशेषणान्तरयोगेन पुनरुपादानमिति ज्ञेयम् । त एते परोपघातानुकूला यात्राकालाः ।

यातव्यदेशानुकूलान् यात्राकालानाह — **अत्युष्णमित्यादि** । यो देशः अतिमात्रोष्णस्वभावः तृणकाष्ठजलानि वा यत्राल्पानि, तं देशं हेमन्ते यायात्, तदा हि शीतवशादुष्णः किञ्चित् सह्यो भवति, तृणकाष्ठजलानां च नोत्सादो भवतीत्यभिप्रायः ।

तुषारदुर्दिनमित्यादि । अनवरतहिमवर्षं गभीरतटाकबहुलं निबिडतृणवृक्षं वा देशं ग्रीष्मे यायात् । तदाहि शैत्यं सह्यं भवतीत्यभिप्रायः ।

सामान्यतो वर्षाकाले यानं प्रतिषिद्धम् । तस्य प्रतिप्रसवमाह— **स्वसैन्येत्यादि** । यस्मिन् देशे स्वसैन्यस्य व्यायामयोग्यभूमिलाभः परसैन्यस्य च तदभावः, तथाविधं देशं वर्षाकालेऽपि यायादित्यर्थः ।

उक्तानां मार्गशीर्ष्यादीनां तिसृणां यात्राणां दीर्घकालत्वादौ नियममाह — **मार्गशीर्षं तैषं चान्तरेणेति** । मार्गशीर्षतैषमासयोर्मध्ये, यात्राम् अर्थान्मार्गशीर्षीं, दीर्घकालां यायात्, वर्षाकालस्य दूरविप्रकृष्टतया कृष्यङ्गकर्मणां विलम्बसहत्वेनोपरोधाभावादिति भावः । **चैत्रं वैशाखं चान्तरेणेति** । अनयोर्मध्ये, मध्यमकालां यायात् अर्थाच्चैत्रीं यात्रां न तु मार्गशीर्षीमिव दीर्घकालामित्यर्थः । **ज्येष्ठामूलीयमाषाढं चान्तरेणेति** । तयोर्मध्ये, ह्रस्वकालां यायात् अर्थाज्ज्येष्ठामूलीयां न तु दीर्घकालां मध्यमकालां वा वर्षाकालस्य प्रत्यासन्नत्वेन तत्कर्मोपरोधप्रसङ्गादिति भावः । कालह्रस्वत्वपरिच्छेदगमकं यातुर्विशेषणमाह — **उपोषिष्यन्निति** । उप समीपे शत्रुविषयं गत्वा तदाहमात्रं क्षिप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रायशश्चाचार्याः परव्यसने यातव्यम् इत्युपदिशन्ति । शक्त्युदये यातव्यमनैकान्तिकत्वाद् व्यसनानाम् इति कौटल्यः । यदा वा प्रयातः कर्शयितुमुच्छेत्तुं वा शक्नुयादमित्रं, तदा यायात् । अत्युष्णोपक्षीणे कालेऽहस्तिबलप्रायो यायात् । हस्तिनो ह्यन्तस्स्वेदाः कुष्ठिनो भवन्ति, अनवगाहमानास्तोयमपिबन्तश्चान्तरवक्षारा-

---

सुकरं करिष्यन् न तु ततोऽधिकं युद्धादिकर्म अधिककालसापेक्षं करिष्यन्नित्यर्थः । इह मार्गशीर्षं तैषमित्यादयो मासार्थाः शब्दाः मार्गशीर्षी तैषीमित्यादिरीत्या स्त्रीप्रत्ययान्ता मूलकोशेषु पठ्यन्ते । तदा मार्गशीर्ष्यादिशब्दाः मृगशीर्षयुक्तपौर्णमासीविशेषाभिधायिनस्तद्युक्तमासविशेषोपलक्षका द्रष्टव्याः । इत्थं मार्गशीर्ष्यादिकास्त्रिविधा यात्रा अभिधाय परव्यसनकालं नाम चतुर्थीमपि यात्रामाह — **व्यसने चतुर्थीमिति** । परव्यसनदर्शने चतुर्थीं मार्गशीर्ष्यादिविलक्षणप्रकारां मार्गशीर्षादिकालनियमरहितां यात्रां यायादित्यर्थः । इदं च व्यसनाभियानं षाड्गुण्याधिकरणगते विगृह्ययानप्रकरणे वितत्याभिहितमित्याह — **व्यसनाभियानमित्यादि** ।

व्यसनाभियानपक्षश्चायमाचार्याणामेवेत्याह — **प्रायशश्चाचार्या** इत्यादि ।

स्वपक्षमाह — **शक्त्युदय** इति । परापेक्षया विजिगीषोः शक्त्यभ्युच्चये सति, यातव्यं, शक्त्युदयस्यैकान्तफलसाधकत्वादित्यभिप्रायः । परव्यसनानि त्वप्रयोजकान्यनेवम्भूतत्वादित्याह — **अनैकान्तिकत्वाद् व्यसनानामिति** । परस्य व्यसनसत्त्वेऽप्यात्मनः शक्त्युदयाभावे फलासिद्ध्या परस्य व्यसनाभावेऽप्यात्मनः शक्त्युदयसत्त्वे फलसिद्ध्या च परव्यसनानां फलाननुविहितस्वान्वयव्यतिरेकत्वादित्यर्थः । इति कौटल्यः मन्यते ।

शक्त्यभ्युच्चयाभावेऽपि शत्रुकर्शनोच्छेदनान्यतरानुष्ठानमात्रपर्याप्तशक्तियोगमात्मनो यदा पश्यति, तदा यायादिति पक्षान्तरमाह — **यदा वा प्रयात** इत्यादि ।

अथ बलानुरोधेन कालनियममाह — **अत्युष्णोपक्षीण** इति । अत्युष्णपर्यवसिते, काले ग्रीष्मादौ, अहस्तिबलप्रायो यायात् हस्त्यतिरिक्तखरोष्ट्रादिबलबहुलो यायात् हस्तिबलबहुलस्तु न यायादित्यर्थः । हस्तिबलबहुलस्यायाने कारणमाह — **हस्तिनो ह्यित्यादि** । गजा हि बहिरनिर्गच्छद्भिरन्तःस्थितैः स्वेदैर्दूषितत्वचः कुष्ठरोगिणो भवन्ति, जले च स्नानाकरणात् तत्पानाकरणा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्चान्धीभवन्ति । तस्मात् प्रभूतोदके देशे, वर्षति च हस्तिबलप्रायः यायात् । विपर्यये खरोष्ट्राश्वबलप्रायः । देशमल्पवर्षपङ्कं वर्षति मरुप्रायं चतुरङ्गबलो यायात् ।

समाविषमानिम्नस्थलह्रस्वदीर्घवशेन वाध्वनो यात्रां विभजेत् ।
सर्वा वा ह्रस्वकालाः स्युर्यातव्याः कार्यलाघवात् ।
दीर्घाः कार्यगुरुत्वाद्वा वर्षावासः परत्र च ॥

इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे प्रथमोऽध्यायः
शक्तिदेशकालबलाबलज्ञानं यात्राकालाः,
आदितः द्वाविंशतिशततमोऽध्यायः ॥

च्चोपजातान्तर्दाहा अन्धतां प्राप्नुवन्तीत्यर्थः । तस्मादिति । उष्णकालयानस्य हस्त्यनर्थावहत्वात्, प्रभूतोदके प्रचुरजले देशे, वर्षति च अर्थात् काले, हस्तिबलप्रायः, यायात् । विपर्यय इति । अप्रभूतोदके देशे अवर्षाकाले च, खरोष्ट्राश्वबलप्रायः, यायात् । यस्मिन् वृष्टिनिमित्तः पङ्कोऽल्पो भवति, तं तथाविधं मरुप्रायं देशं वर्षाकालेऽपि हस्त्यश्वरथपादातरूपचतुर्विधसैन्ययुक्तो गच्छन्न दुष्यतीत्याह — देशमल्पवर्षपङ्कमित्यादि ।

अध्वनः समत्वविषमत्वादिभिरपि यात्राया ह्रस्वकालत्वादिविभागो भवतीत्याह — समेत्यादि । इह समादिशब्दा भावप्रधानाः, समत्वमदन्तुरत्वं, विषमत्वं दन्तुरत्वं, निम्नत्वं जलरूपत्वं, स्थलत्वमजलरूपत्वं, ह्रस्वत्वं ह्रस्वकालत्वं, दीर्घत्वं दीर्घकालत्वं, तद्वशेन वा तदनुरोधेन वा, अध्वनो यात्रां विभजेत् । तत्र स्थलत्वान्ता अध्वधर्माः, अन्यौ यात्राधर्मौ ॥

कार्यवशात् सर्वासामपि यात्राणां ह्रस्वकालत्वदीर्घकालत्वे भवत इत्याह—सर्वा वेत्यादि । या एता अध्वसमत्वविषमत्वादिवशोपजातह्रस्वभावदीर्घभावा उक्ताः, ताः सर्वा अपि, यातव्याः यात्राः, कार्यलाघवात् कार्यस्य क्षिप्रनिर्वर्तनात्, ह्रस्वकालाः, स्युः । कार्यगुरुत्वाद् वा कार्यस्य चिरनिर्वर्तनाच्च, दीर्घाः दीर्घकालाः स्युः । वर्षावासः परत्र चेति । किञ्च वर्षासु वासः स्वदेशकार्यः परविषय एव कार्यवशात् कर्तव्यः स्यादित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अभियास्यत्कर्मणि नवमाधिकरणे
प्रथमोऽध्यायः शक्तिदेशकालबलाबलज्ञानं यात्राकालाः,
आदितो द्वाविंशत्यधिकशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१३७—१३९. प्रक. बलोपादानकालाः, सप्ताहगुणाः, प्रतिबलकर्म च ।

मौलभृतकश्रेणीमित्रामित्राटवीबलानां समुदानकालाः ।

मूलरक्षणादतिरिक्तं मौलबलम्, अत्यावापयुक्ता वा मौला मूले विकुर्वीरन् इति, बहुलानुरक्तमौलबलः सारबलो वा प्रतियोद्धा न्यायामेन योद्धव्यम् इति, प्रकृष्टेऽध्वनि काले वा क्षयव्ययसहत्वान्मौलानाम् इति, बहुलानुरक्तसम्पाते च यातव्यस्योपजापभयादन्यसैन्यानां भृतादीनामविश्वासे, बलक्षये वा सर्वसैन्यानाम् इति, मौलबलकालः ।

बलोपादानकाला इति सूत्रम् । बलानां मौलभृतादीनाम् उपादानस्य यथाकार्यं विनियोगस्य काला उच्यन्त इति सूत्रार्थः । अभियास्यता यात्राकालवद् बलोपादानकाला अपि ज्ञातव्या इति तत्कथनम् ।

के ते काला इत्याह — **मौलेत्यादि** । मौलबलं स्थानीयभवं बलं, भृतकबलं भृतिस्वीकृतं बलं, श्रेणीबलं जानपदायुधीयगणरूपं बलं, मित्रबलम्, अमित्रबलम्, अटवीबलम् आटविकबलम्, इत्येतेषां षड्विधानां, समुदानकालाः कार्यविनियोगकालाः ।

तेषु मौलबलसमुदानकालस्य निमित्तान्याह — **मूलरक्षणादतिरिक्तमित्यादि** । अयमर्थः — स्थानीयरक्षार्थं यावदपेक्षितं ततोऽधिकं मौलबलं विद्यत इत्यस्मिन् निमित्ते; अथवा अत्यावापयुक्ता अतिमात्रद्रोहचिन्तायुक्ता मौलपुरुषाः मूले विकारं कुर्युः अत इमे आत्मना सहैव नेया इत्यस्मिन् निमित्ते; प्रभूतमनुरागि च मौलबलमुपादायागतः प्रत्यर्थी शूरसैन्ययुक्तो वा सः, अतः प्रयत्नेन युद्धं कर्तव्यं, तत्र मौलबलमेव समर्थं भवतीत्येतस्मिन् निमित्ते; बहुयोजनविप्रकृष्टे देशे दीर्घे वा काले शत्रुणा सह युद्धं भवेत्, तत्रावश्यम्भाविनौ क्षयव्ययौ मौलबलान्येव सोढुं शक्नुयुरित्यस्मिन् निमित्ते; बहुलाः स्वाम्यनुरागिणः शत्रुदूताः सम्पतिता अवश्यमुपजापं कुर्युः, भृतादीनि मौलव्यतिरिक्तान्यविश्वास्यानि, अतो मौलबलमेवानुपजाप्यत्वादुपादेयमित्येतस्मिन् निमित्ते; अथवा सर्वाणि भृतादिसैन्यानि प्राप्तयुग्यपुरुषापचयलक्षणशक्तिक्षयत्वात् पलायिष्यन्त इत्येतस्मिन् निमित्ते च, मौलबलस्य विनियोगकालः प्राप्तो मन्तव्य इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रभूतं मे भृतबलमल्पं च मौलबलम् इति, परस्याल्पं विरक्तं वा मौलबलं, फल्गुप्रायमसारं वा भृतसैन्यम् इति, मन्त्रेण योद्धव्यमल्पव्यायामेन इति, ह्रस्वो देशः कालो वा तनुक्षयव्ययः इति, अल्पसम्पातं शान्तोपजापं विश्वस्तं वा मे सैन्यम् इति, परस्याल्पः प्रसारो हन्तव्यः इति, भृतबलकालः।

प्रभूतं मे श्रेणीबलं शक्यं मूले यात्रायां चाधातुम् इति, ह्रस्वप्रवासः, श्रेणीबलप्रायः प्रतियोद्धा, मन्त्रव्यायामाभ्यां प्रतियोद्दुधुः कामो, दण्डबलव्यवहारः इति श्रेणीबलकालः।

प्रभूतं मे मित्रबलं शक्यं मूले यात्रायां चाधातुम्, अल्पः प्रवासो मन्त्रयुद्धाच्च भूयो व्यायामयुद्धम् इति, मित्रबलेन वा पूर्वमटवीं नगरी-

---

भृतबलकालस्य निमित्तान्याह— प्रभूतं मे भृतबलमित्यादि। अयमर्थः —मम भृतसैन्यं प्रचुरं, मौलसैन्यमल्पमित्येतस्मिन् निमित्ते; अथवा शत्रोर्मौलसैन्यमल्पं विरक्तं वा वर्तते, अतो भृतबलमेवालं कार्यसाधनायेत्यस्मिन् निमित्ते; अथवा अल्पं दुर्बलं च परस्य भृतसैन्यमित्यस्मिन् निमित्ते; मन्त्रेण तूष्णींयुद्धात्मनाल्पश्रमेण योद्धव्यमित्यस्मिन् निमित्ते; अदूरो गन्तव्यदेशः कालश्च कार्यसिद्धयेऽपेक्षितोऽल्पत्वादल्पक्षयव्ययः इत्यस्मिन् निमित्ते; अल्पपरदूतागमनं शमितोपजापम् उत्पन्नानुपजाप्यत्वविश्वासं वा मे सैन्यमित्यस्मिन् निमित्ते; परस्य तृणकाष्ठादिप्रवेशनमल्पमेव विहन्तव्यं, तच्च भृतबलेनैव विघातयितुं शक्यमित्येतस्मिन् निमित्ते च, भृतबलस्य विनियोगकालो बोद्धव्यः।

श्रेणीबलकालमाह— प्रभूतं मे श्रेणीबलमित्यादि। अयमर्थः — श्रेणीबलं मे प्रचुरतया स्थानीयरक्षायां शत्रुं प्रत्यभियाने चोभयत्र विनियोक्तुं शक्यमित्येतस्मिन् निमित्ते; अदूरदेशं प्रयाणमदीर्घकालमित्यस्मिन् निमित्ते वा; प्रत्यर्थी श्रेणीबलबहुलः श्रेणीबलेनैव प्रतियोद्धव्य इत्यस्मिन् निमित्ते वा; प्रत्यर्थी मन्त्रेण तूष्णींयुद्धलक्षणेन व्यायामेन प्रकाशयुद्धलक्षणेन च प्रतियोद्दुधुकाम इत्यस्मिन् निमित्ते वा; प्रत्यर्थी दण्डभीतनृपान्तरार्पितेन बलेन निर्व्याय्युद्धव्यवहार इत्यस्मिन् निमित्ते वा श्रेणीबलस्य विनियोगकालः इति।

मित्रबलकालमाह—प्रभूतं मे मित्रबलमित्यादि। अयमर्थः —मम मित्रबलं प्रभूतत्वात् स्थानये रक्षार्थं यात्रायां पराभियोगार्थं च निवेशयितुं शक्यमित्यस्मिन् निमित्ते; अविप्रकृष्टदेशकालत्वादल्पं प्रयाणं, तूष्णींयुद्धाच्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थानमासारं वा योधयित्वा पश्चात् स्वबलेन योधयिष्यामि, मित्रसाधारणं वा मे कार्यं, मित्रायत्ता वा मे कार्यसिद्धिः, आसन्नमनुग्राह्यं वा मे मित्रम्, अत्यावापं वास्य साधयिष्यामि इति मित्रबलकालः।

प्रभूतं मे शत्रुबलं शत्रुबलेन योधयिष्यामि नगरस्थानम्, अटवीं वा। तत्र मे श्ववराहयोः कलहे चण्डालस्येवान्यतरसिद्धिर्भविष्यति; आसाराणामटवीनां वा कण्टकमर्दनमेतत् करिष्यामि; अत्युपचितं वा कोपभयान्नित्यमासन्नमरिबलं वासयेदन्यत्राभ्यन्तरकोपशङ्कायाः; शत्रुयुद्धावरयुद्धकालश्च। इत्यमित्रबलकालः।

बहुतरं प्रकाशयुद्धम्, अतो नातिक्षयव्ययसम्भावनेत्यस्मिन् निमित्ते; परस्याटविकं बलं वा परस्य मित्रबलं वा तन्नगरावस्थितं स्वमित्रबलेन पूर्वं योधयित्वा पश्चात् स्वबलेन योधयिष्यामीत्यस्मिन् निमित्ते; मम यत् कार्यं तद् मित्रस्यापि साधारणमित्यस्मिन् वा निमित्ते; मम कार्यसिद्धिर्मित्रे आयत्तेत्यस्मिन् वा निमित्ते; मम मित्रमन्तरङ्गं मयोपकर्तव्यमित्यस्मिन् वा निमित्ते; मित्रस्य अत्यावापम् अर्थाद् दूष्यबलं शत्रुबलेन व्यापादयिष्यामीत्यस्मिन् वा निमित्ते; मित्रबलस्य विनियोगकाल इति।

अमित्रबलकालमाह — **प्रभूतं मे शत्रुबलमित्यादि**। अयमर्थः — मम शत्रुबलं दण्डोपनतं प्रभूतं नगरावस्थितं शत्रुबलेन योधयिष्यामि, आटविकं वा शत्रुबलेन योधयिष्यामि, तथोभयोः शत्रुबलयोरायोधनघटनेऽन्यतरवधलक्षणं ममेष्टं सिध्यति यथा श्ववराहाशिनश्चण्डालस्य श्ववराहयोर्युध्यमानयोरन्यतरवध ईप्सितः सिध्यति तद्वद् इत्यस्मिन् वा निमित्ते; मित्रबलानामाटविकानां च स्वकीयानां ये कण्टका अमित्रबलगतास्तेषां मर्दनसाधनमेतद् अमित्रबलोपादानं करिष्यामीत्यस्मिन् वा निमित्ते; अत्यन्तोपचययुक्तं शत्रुबलम् आत्मना नित्यमनधिष्ठितं विकुर्वीतेति शङ्कायां मन्त्रिपुरोहितसेनापतियुवराजादिविकारलक्षणाभ्यन्तरकोपविरहे च सति तत् सर्वदा स्वान्तिक एव वासयितुमर्हमित्यस्मिन् वा निमित्ते; अमित्रबलस्य विनियोगकाल इति। अन्यमप्यमित्रबलकालमाह — **शत्रुयुद्धावरयुद्धकालश्चेति**। शत्रोः स्वशत्रुणा सह यदि प्रवृत्तं युद्धं तर्हि तस्मात् समाप्तात् परो यो युद्धोचितः कालः सोऽपि अमित्रबलकाल इत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेनाटवीबलकालो व्याख्यातः ।

मार्गदेशिकं परभूमियोग्यमरियुद्धप्रतिलोममटवीबलप्रायः शत्रुर्वा बिल्वं बिल्वेन हन्यताम् अल्पः प्रसारो हन्तव्यः इत्यटवीबलकालः ।

सैन्यमनेकमनेकजातीयस्थमुक्तमनुक्तं वा बिलोपार्थं यदुत्तिष्ठति, तदौत्साहिकम् । भक्तवेतनबिलोपविष्टिप्रतापकरं भेद्यं परेषाम्, अभेद्यं तुल्यदेशजातिशिल्पप्रायं संहतं महत् । इति बलोपादानकालाः ।

तेषां कुप्यभूतमित्राटवीबलं बिलोपभूतं वा कुर्यात् ।

यान्यमित्रबलकालस्य निमित्तान्युक्तानि तान्येवाटवीबलकालस्यापीत्यतिदेशभङ्गचोपदिशति — तेनेत्यादि ।

तत्र विशेषमाह — मार्गदेशिकमित्यादि । अयमर्थः — परभूमियानमार्गप्रदर्शनमिति वा, परभूमियुद्धानुरूपायुधशिक्षोपेतमिति वा, अरेर्युद्धे विषये विजिगीषुनियोगात् प्रागेव सिद्धप्रातिपक्ष्यमिति वा, आटविकबलबहुलः शत्रुः अतः स तुल्यजातीयेनाटविकबलेनैव बिल्वफलमिव बिल्वफलेन हन्यतामिति वा, शत्रोस्तृणकाष्ठादिप्रवेशनं स्वल्पमेव विहन्तव्यं तच्चाटविकबलेनैव विघातयितुं शक्यमिति वैतेषु निमित्तेषु आटविकबलस्य विनियोगकालः । इत्थं मौलादीनां षण्णां बलानामुपादानकालो दर्शितः ।

सम्प्रत्यौत्साहिकं नाम सप्तममपि बलमुपादेयमस्तीत्याह — सैन्यमनेकमित्यादि । अयमर्थः — सैन्यम्, अनेकम् एको मुख्योऽधिष्ठाता तद्रहितम्, अनेकजातीयस्थं नानाप्रकारदेशावस्थायि, उक्तमनुक्तं वा राज्ञानुज्ञातमननुज्ञातं वा, यद् बिलोपार्थम् उत्तिष्ठति परविषयलुण्टनार्थं स्वयमेव समुदितं भवति, तद् औत्साहिकं स्वोत्साहमात्रप्रवृत्तत्वादौत्साहिकसंज्ञम् । तच्च भेद्यमभेद्यमिति द्विप्रकारमित्याह — भक्तवेतनेत्यादि । भक्तेन प्रत्यहदेयतण्डुलादिना वेतनेन प्रतिमासदेयहिरण्यादिना च बिलोपं शत्रुजनपदलुण्टनं विष्टिं दुर्गादिकर्म प्रतापं राजाज्ञानुष्ठानं च करोतीति तथाभूतं, परेषां भेद्यं शक्यभेदनम् । अभेद्यं पराशक्यभेदनं तु, तुल्यदेशजातिशिल्पप्रायं देशजातिशिल्पैर्ये तुल्यास्तद्बाहुल्ययुक्तम् अत एव संहतं नित्योपगतसंघातावस्थम्, अत एव महत् शक्तितः प्रशस्तम् । तस्मादिदमपि यथाकालमुपादेयमित्यर्थात् सिद्धम् । इति बलोपादानकाला इति । व्याख्याता इति शेषः ।

मौलादीनां सप्तानां मध्ये द्वयोर्भूतौ विशेषमाह — तेषामिति । मौलादीनां मध्ये, अमित्राटवीबलम् अमित्रबलम् आटविकबलं च, कुप्यभूतं कुप्यं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अमित्रस्य वा बलकाले प्रत्युत्पन्ने शत्रुमवगृह्णीयात्। अन्यत्र वा प्रेषयेत्। अफलं वा कुर्यात्। विक्षिप्तं वा वासयेत्। काले वातिक्रान्ते विसृजेत्। परस्य चैतद् बलसमुदानं विघातयेद्, आत्मनः सम्पादयेत्।

पूर्वपूर्वं चैषां श्रेयः सन्नाहयितुम्।

तद्भावभावित्वान्नित्यसत्कारानुगमाच्च मौलबलं भृतबलाच्छ्रेयः।

वस्त्रास्तरणादि तद्रूपभृतियुक्तं, विलोपभृतं वा शत्रुविषयपरिलुण्टनलब्धद्रव्यात्मकभृतियुक्तं वा, कुर्यात्।

अमित्रबलविषयमेव विशेषान्तरमाह — अमित्रस्य वेति। शत्रोः, बलकाले प्रत्युत्पन्ने स्वशत्रुयुद्धप्राप्त्या स्वबलोपादानावसरे प्राप्ते, शत्रुं स्वसाह्याय पूर्वमागतं शत्रुसैन्यम्, अवगृह्णीयात् स्वकार्यस्य सावशेषत्वं वदन् स्ववश एव स्थापयेत् नतु तस्मिन्नवसरे विसृजेदित्यर्थः। अन्यत्र वा प्रेषयेत् स्वस्यैव कार्यान्तरमपदिश्येति शेषः। अफलं वा कुर्यात् पणितसाहाय्यदानप्रतिफलहीनं वा कुर्यात्, शत्रुबलं सद्यो विसृजन्निति शेषः। विक्षिप्तं वा बहुत्र विप्रकीर्णं वा, वासयेत्, सद्यस्समुत्थापनसौकर्यभङ्गार्थमिति शेषः। काले वा अतिक्रान्ते साहाय्यसापेक्षे कालेऽतीते, विसृजेत्। एवं निरूपितं बलोपादानं परकीयमुपघातेन योजयेत्, आत्मायं च परारब्धविघातप्रतिविधानेन सम्पन्नं कुर्याद् विजिगीषुरित्याह — परस्य चैतदित्यादि।

अथ सन्नाहगुणा इति सूत्रम्। सन्नाहस्य बलानामुद्योगस्य गुणाः श्रेयस्त्वभेदाः कथ्यन्त इति सूत्रार्थः। उपात्तानां बलानां सन्नाहे शेषतया प्राप्ते तत्तारतम्यस्य निरूपणं प्राप्तावसरमिति प्रकरणसङ्गतिः।

पूर्वं पूर्वं चैषामिति। मौलभृतादीनामौत्साहिकान्तानां सप्तानां बलानां मध्ये पूर्वं पूर्वं बलं, सन्नाहयितुं, श्रेयः उत्तरमुत्तरमपेक्ष्य प्रशस्ततरं सन्नाहे कार्यसाधकतरम्।

तदेव श्रेयस्त्वं मौलादीनां सहेतुकं क्रमेण निरूपयिष्यन् प्रथमं मौलबलस्य निरूपयति — तद्भावेत्यादि। तद्भावभावित्वात् तस्य स्वामिनः सत्त्वे सत्त्वाद् अर्थात् तदसत्त्वे चासत्त्वात्, नित्यसत्कारानुगमाच्च स्वामिनो मौलेषु विषये सत्कार आदरः मौलानां स्वामिनि सत्कारोऽनुरागः तस्य नित्यस्य आगमापायरहितस्य अनुगमाद् अविच्छिन्नानुवर्तनाच्च, नित्यसत्कारा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नित्यानन्तरं क्षिप्रोत्थायि वश्यं च भृतबलं श्रेणीबलाच्छ्रेयः । जानपदमेकार्थोपगतं तुल्यसङ्घर्षामर्षसिद्धिलाभं च श्रेणीबलं मित्रबलाच्छ्रेयः । अपरिमितदेशकालमेकार्थोपगमाच्च । मित्रबलममित्रबलाच्छ्रेयः ।

आर्याधिष्ठितममित्रबलमटवीबलाच्छ्रेयः । तदुभयं विलोपार्थम् । अविलोपे व्यसने च ताभ्यामहिभयं स्यात् ।

ब्राह्मणक्षत्रियवैश्यशूद्रसैन्यानां तेजःप्राधान्यात् पूर्वपूर्वं श्रेयः सन्नाहयितुम् इत्याचार्याः ।

नुरागाच्चेति पाठे अनुरागस्य स्वशब्दत एवोपदानं बोद्धव्यम्, मौलबलं, भृतबलात्, श्रेयः ।

नित्यानन्तरमिति । सर्वदैव व्यवधानरहितं पार्श्वस्थमित्यर्थः, अत एव क्षिप्रोत्थायि अविलम्बसज्जीभावि, वश्यं च स्वायत्तं च, भृतबलं, श्रेणीबलाद् अर्थादतथाविधस्वभावात्, श्रेयः ।

जानपदमिति । स्वामिजनपदस्थायि, नतु मित्रबलमिवातथाभूतम्, एकार्थोपगतं सहभोग्यैकफलोद्देशोपयातं, तुल्यसङ्घर्षामर्षसिद्धिलाभं यद्विषयस्पर्धाक्रोधवान् स्वामी तद्विषयस्पर्धाक्रोधयुक्तं स्वामितुल्यसिद्धिलाभं च, श्रेणीबलं, मित्रबलाद् अनेवम्भूतस्वभावात्, श्रेयः । नन्वेकार्थोपगतं नाम मित्रबलमस्ति, तच्चैवम्भूतमेवेति कथं तदपेक्षया श्रेणीबलस्य श्रेयस्त्वमिति चेत् तत्राह—**अपरिमितदेशकालमित्यादि** । श्रेणीबलम्, एकार्थोपगमात् मित्रबलाच्च श्रेयः एकार्थोपगतान्मित्रबलादपि प्रशस्ततरम्, कस्मात्, यस्मात् तद् अपरिमितदेशकालं साहाय्यदाने देशकालप्रतिनियमनिरपेक्षं नतु मित्रबलमिव तत्सापेक्षमित्यर्थः । **मित्रबलमित्यादि** । स्पष्टार्थम् ।

आर्याधिष्ठितमिति । आर्येण सद्गुणयोगविश्वसनीयेन नायकेनाधिष्ठितम्, अमित्रबलम्, अटवीबलात्, श्रेयः । विनियोगे विशेषमाह—**तदुभयमिति** । अमित्रबलम् अटवीबलमिति द्वयं, विलोपार्थं विलोपमात्रप्रयोजनकं परविषयपरिलुण्टनमात्रे विनियोक्तव्यमित्यर्थः । अविलोपे विलोपातिरिक्ते युद्धादौ, व्यसने च स्वविपत्समये च, विनियुज्यमानाभ्यामिति शेषः, ताभ्यां निमित्तभूताभ्याम्, अहिभयं स्वपक्षकलहः, स्यात् ।

अथ बलस्य जातिप्रयुक्तं श्रेयस्त्वमाह—**ब्राह्मणक्षत्रियवैश्यशूद्रसैन्यानामिति** । तेषां मध्ये, तेजःप्राधान्यात् तेज इह न शौर्यं ब्राह्मणे तदं-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटल्यः। प्रणिपातेन ब्राह्मणबलं परोऽभिहारयेत्। प्रहरणविद्याविनीतं तु क्षत्रियबलं श्रेयः, बहुलसारं वा वैश्यशूद्रबलमिति।

तस्माद् 'एवंबलः परः, तस्यैतत् प्रतिबलम्' इति बलसमुद्दानं कुर्यात्।

हस्तियन्त्रशकटगर्भकुन्तप्रासहाटकवेणुशल्यवद्धस्तिबलस्य प्रतिबलम्।

तदेव पाषाणलगुडावरणाङ्कुशकचग्रहणीप्रायं रथबलस्य प्रतिबलम्।

भावात्, किन्तु धार्मिकत्वकृतज्ञत्वादिगुणसम्पत्। तस्य प्राधान्यात् मुख्यतया गणनीयत्वात्, पूर्वं पूर्वं सन्नाहयितुं श्रेयः। इत्याचार्याः, मन्यन्त इति शेषः।

तन्मतं निराचष्टे — **नेति कौटल्य** इति। तत्र हेतुमाह — प्रणिपातेन, ब्राह्मणबलं, परः शत्रुः, अभिहारयेत् स्वायत्तीकुर्यात्। किं तर्हि श्रेय इत्याह—**प्रहरणविद्याविनीतं त्विति**। शस्त्रविद्याशिक्षितं, क्षत्रियबलं श्रेयः बहुलसारं वा प्रवीरप्रचुरं वा, वैश्यशूद्रबलं, श्रेयः। इतिशब्दः श्रेयस्त्वनिरूपणसमाप्तौ।

प्रतिबलकर्मेति सूत्रम्। सामर्थ्यादिना परबलस्यानुरूपं बलं प्रतिबलं तस्य कर्म करणप्रकारोऽभिधीयत इति सूत्रार्थः। सन्नाहगुणवत् प्रतिबलकर्मणोऽपि बलशेषत्वादिह निरूपणसङ्गतिः।

तस्मादिति। यथोक्तसन्नाहगुणावगमानन्तरमित्यर्थः, एवम्बलः परः एवम्प्रकारबलयुक्तः शत्रुः, तस्यैतत् प्रतिबलं तथाविधस्य शत्रोरिदमनुरूपं प्रतियोधनक्षमं बलम्, इति, ज्ञात्वेति शेषः, बलसमुद्दानं बलस्योपादानं, कुर्यात्।

तत्र हस्तिबलस्य प्रतिबलमाह — **हस्तियन्त्रशकटगर्भेत्यादि**। हस्तीत्यादिपदे प्रशंसायां मतुप्। प्रशस्तहस्त्यादियुक्तमित्यर्थः। तत्र यन्त्रं जामदग्न्यादि, शकटगर्भः शकटरूपो मध्यः, शकटस्येव गर्भो यस्येति वा, कुन्तः 'हस्ताः सप्तोत्तमः कुन्त' इत्यायुधागाराध्यक्षे व्याख्यातलक्षणः, प्रासश्चतुर्विंशत्यङ्गुलः सर्वलोहमयः, हाटकं त्रिकण्टकं कुन्ततुल्यप्रमाणं, वेणुर्दीर्घप्रतोदः, शल्यः सर्वतोऽयश्शङ्कुमान् लोहदण्डः। एवम्भूतं बलं, हस्तिबलस्य प्रतिबलम्।

रथबलस्य प्रतिबलमाह — **तदेवेति**। हस्तिबलप्रतिबलमेव, पाषाणादिप्रायं पाषाणो महाशिला लगुडो ह्रस्वगदा आवरणं प्रसिद्धम् अङ्कुशो दीर्घ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदेवाश्वानां प्रतिबलम् ।

वर्मिणो वा हस्तिनोऽश्वा वा वर्मिणः कवचिनो रथा आवरणिनः पत्तयश्चतुरङ्गबलस्य प्रतिबलम् ॥

एवं बलसमुद्दानं परसैन्यनिवारणम् ।
विभवेन स्वसैन्यानां कुर्यादङ्गविकल्पशः ॥

इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमेऽधिकरणे द्वितीयोऽध्यायः
बलोपादानकालाः सन्नाहगुणाः प्रतिबलकर्म,
आदितस्त्रयोविंशतिशततमोऽध्यायः ॥

लोहमयः सृणिः कचग्रहणी दीर्घफलः साङ्कुशो वेणुः एवम्प्रायं, रथबलस्य प्रतिबलम् ।

अश्वानामाह — **तदेवेति** । तदेव हस्तिप्रतिबलमेव, अश्वानां प्रतिबलम् ।

वर्मवन्तो गजास्तथाभूता अश्वाः, कवचयुक्ता रथाः, आवरणवन्तः पदातयश्च हस्त्यश्वरथपदात्यात्मकस्य चतुरङ्गसैन्यस्य यथाक्रमं सामान्यतः प्रतिबलं भवतीत्याह — **वर्मिणो वा हस्तिन** इत्यादि ॥

एवं बलसमुद्दानमिति । यथोक्तसन्नाहगुणप्रतिबलकर्मप्रकारज्ञानपूर्वं बलानामुपादानं, परसैन्यनिवारणं शत्रुसैन्यप्रतियोधनशक्तं, विभवेन स्वसैन्यानां मौलभृतादिस्वकीयसैन्यसम्पदानुरूप्येण, अङ्गविकल्पशः हस्त्यश्वादिरूपसेनाङ्गबाहुल्याल्पत्वविभागानुरोधेन, कुर्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अभियास्यत्कर्मणि नवमेऽधिकरणे
द्वितीयोऽध्यायः बलोपादानकालाः सन्नाहगुणाः प्रतिबलकर्म,
आदितस्त्रयोविंशत्यधिकशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४०, १४१. प्रक. पश्चात्कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारश्च ।

अल्पः पश्चात्कोपो महान् पुरस्ताल्लाभः इति । अल्पः पश्चात्कोपो गरीयान् । अल्पं पश्चात्कोपं प्रयातस्य दूष्यामित्राटविका हि सर्वतः समेधयन्ति, प्रकृतिकोपो वा । लब्धमपि च महान्तं पुरस्ताल्लाभम् एवंभूते भृत्यमित्रक्षयव्यया ग्रसन्ते । तस्मात् सहस्रैकीयः पुरस्ताल्लाभस्यायोगः, शतैकीयो वा पश्चात्कोप इति न यायात् । सूचीमुखा ह्यनर्था इति लोकप्रवादः ।

पश्चात्कोपचिन्तेति सूत्रम् । पुरस्ताल्लाभमुद्दिश्य प्रस्थिते विजिगीषौ पश्चात् पार्ष्णिग्राहाटविकदूष्यादिभिरुत्पाद्यमानो दाहविलोपादिरनर्थः पश्चात्कोपः, तस्य चिन्ता पुरस्ताल्लाभापेक्षया गुरुलघुभावविचारः क्रियत इति सूत्रार्थः । समुदात्तबलेनापि यानं पश्चात्कोपानर्थस्याभावनिश्चये सत्येव कर्तव्यम् इति तच्चिन्तात्रारभ्यते ।

अल्प इत्यादि । गरीयानित्युत्तरवाक्यगतं सामर्थ्यादिहापकृष्य संबध्यते । इतिशब्दानन्तरं च विचार्यत इति शेषः । किं याने सति जायमानः स्वल्पः पश्चात्कोपो गुरुतरत्वेन गणनीयः (पुरस्ताल्लाभमप्युपेक्ष्यावर्जनीयत्वेनापेक्षणीयः) उताहो प्रभूतः पुरस्ताल्लाभो गुरुतरत्वेन गणनीयः (पश्चात्कोपमप्युपेक्ष्योपादेयत्वेनापेक्षणीयः) इति विचार्यत इत्यर्थः । तत्राल्पः पश्चात्कोप एव महतः पुरस्ताल्लाभाद् गुरुतर इति निश्चयमाह — **अल्पः पश्चात्कोप** इत्यादि । तत्र हेतुमाह — **अल्पं पश्चात्कोपमित्यादि** । स्वल्पमपि हि पश्चात् पार्ष्णिग्राहमात्रेणोत्पादितं कोपं प्रयातस्य विजिगीषोर्दूष्या अमित्रा आटविकाश्च पुरः पार्श्वतश्च वर्धयन्ति, मन्त्रिपुरोहिताद्याभ्यन्तरप्रकृतिकोपो वा तं वर्धयतीत्यर्थः । **लब्धमपि चे**ति । अगणितपश्चात्कोपेन विजिगीषुणा यानं कृत्वार्जितमपि, महान्तं प्रभूतं, पुरस्ताल्लाभम्, एवम्भूते पश्चात्कोपे वृद्धिप्राप्ते सति, भृत्यमित्रक्षयव्ययाः भृत्येषु मित्रेषु च विषये क्षयव्ययाः कोपप्रशमनार्थाः, ग्रसन्ते कवलयन्ति न शेषयन्तीत्यर्थः । एवञ्च सिद्धं प्रभूतस्यापि पुरस्ताल्लाभस्य पश्चात्कोपापेक्षं फल्गुत्वमवच्छिन्दन् यानं प्रतिषेधति — **तस्मादिति** । यानलब्धप्रभूतसर्वलाभग्रसनात्, पुरस्ताल्लाभस्य आयोगः सिद्धिः, सहस्रैकीयः सहस्रे एकांशमात्रः, पर्यवस्यतीति शेषः । कदासौ सहस्रैकीयत्वकल्पनेत्याह — **शतैकीयो वा पश्चात्कोप इति** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पश्चात्कोपे सामदानभेददण्डान् प्रयुञ्जीत । पुरस्ताल्लाभे सेनापतिं कुमारं वा दण्डचारिणं कुर्वीत ।

बलवान् वा राजा पश्चात्कोपावग्रहसमर्थः पुरस्ताल्लाभमादातुं यायात् । अभ्यन्तरकोपशङ्कायां शङ्कितानादाय यायात् ।

बाह्यकोपशङ्कायां वा पुत्रदारमेषामभ्यन्तरावग्रहं कृत्वा शून्य-

---

पश्चात्कोपजन्योऽनर्थः शते एकांशमात्रो यदि गण्यते तदेत्यर्थः । तथाच पश्चात्कोपाद् दशगुणं पुरस्ताल्लाभस्य फल्गुत्वमित्याशयः । **इति न यायादिति** । उक्ताद्धेतोः पश्चात्कोपशङ्कायां यानं न कुर्यादित्यर्थः । अपरो व्याख्याप्रकारः—एवञ्च सिद्धं पश्चात्कोपस्य गरीयस्त्वं पुरस्ताल्लाभफल्गुत्वावच्छेदपूर्वमवच्छिनत्ति — **तस्मादिति** । यानलब्धसर्वलाभग्रसनात्, पुरस्ताल्लाभस्य आयोगः सिद्धिः, सहस्रैकीयः, गण्यते चेदिति शेषः । पश्चात्कोपः शतैकीयः, गणनीय इति शेषः । शेषं समानम् । अल्पोऽपि पश्चात्कोपः प्रवृद्धो भवतीत्युपदेशं द्रढयितुं लोकप्रवादं दर्शयति — **सूचीमुखा हीत्यादि** । सूचीमुखाः अत्यल्पारम्भाः अर्थादुत्तरकालबहुलाः ।

पश्चात्कोपसम्भावनायामपि यथा यानमनुष्ठीयेत तथाह — **पश्चात्कोप** इति । तस्मिन् सति, सामदानभेददण्डान् प्रयुञ्जीत प्रयुज्य पश्चात्कोपं शमयेत् स्वयमप्रयात एव सन्नित्यर्थः । कस्तर्हि पुरस्ताल्लाभं प्रति यायादित्यपेक्षायामाह — **पुरस्ताल्लाभ** इति । पुरस्ताल्लाभसाधनार्थं, सेनापतिं, कुमारं वा, दण्डचारिणं कुर्यात् सैन्यप्रणेतारं कृत्वा यानं कारयेदित्यर्थः ।

यदि बहुलबलयोगी राजा तर्हि पश्चात्कोपप्रतिविधानार्थं बलैकदेशं समर्थं नियुज्य पुरस्ताल्लाभग्रहणाय स्वयमेव वा यायादित्याह — **बलवान् वेत्यादि** । एष पश्चात्कोपे विधिः । अभ्यन्तरकोपे त्वाह — **अभ्यन्तरकोपशङ्कायामिति** । मन्त्रिपुरोहितसेनापतियुवराजानामन्यतमकोपः अभ्यन्तरकोपः तस्य शङ्कायां, शङ्कितान् येषां कोपः संभावितस्तानमात्यादीन्, आदाय यायात् आत्मना सहैव गृहीत्वा यायात्, स्वसान्निध्यैकावग्राह्यत्वात् तत्कोपस्येत्यभिप्रायः ।

बाह्यकोपशङ्कायां वेति । राष्ट्रमुख्यान्तपालाटविकदण्डोपनतानामन्यतमकोपो बाह्यकोपो वक्ष्यमाणः तच्छङ्कायां, पुत्रदारम् एषां राष्ट्रमुख्यादीनां पुत्रान् दारांश्च, अभ्यन्तरावग्रहम् अमात्यादिप्रतिबद्धं, कृत्वा, यायादिति वक्ष्यमाणेन संबन्धः । बाह्याभ्यन्तरोभयशङ्कासाधारणमाह — **शून्य-**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पालमनेकबलवर्गमनेकमुख्यं च स्थापयित्वा यायात्। न वा यायात्। 'अभ्यन्तरकोपो बाह्यकोपात् पापीयान्' इत्युक्तं पुरस्तात्।

मन्त्रिपुरोहितसेनापतियुवराजानामन्यतमकोपोऽभ्यन्तरकोपः। तमात्मदोषत्यागेन परशक्त्यपराधवशेन वा साधयेत्।

महापराधेऽपि पुरोहिते संरोधनमवस्रावणं वा सिद्धिः, युवराजे संरोधनं निग्रहो वा गुणवत्यन्यस्मिन् सति पुत्रे।

ताभ्यां मन्त्रिसेनापती व्याख्यातौ।

पुत्रं भ्रातरमन्यं वा कुल्यं राज्यग्राहिणमुत्साहेन साधयेत्।

पालमिति। शून्यपालं शून्यं शत्रवभियोगप्रयातस्वामिकं स्थानीयं तत्पालकम्, अनेकबलवर्गं परस्परासंहत्यर्थं मौलभृतादिनानाजातीयसैन्यवर्गयुक्तम्, अनेकमुख्यम् अनेके मुख्याः सैन्याध्यक्षा यस्य तं तथाभूतं, स्थापयित्वा, यायात्। एवं करणेऽप्यभ्यन्तरकोपसाधनमनैकान्तिकमित्यभिप्रायेणाह— **नवा यायादिति**। अभ्यन्तरकोपस्याशक्यप्रतिविधानतामयाने हेतुं द्योतयितुं बाह्यकोपात् पापीयस्त्वं पूर्वोक्तं स्मारयति—**अभ्यन्तरकोप** इत्यादि। 'नवा यायादि'त्येतदनन्तरम् 'अहिभयाद्' इत्यधिकपाठो नयचन्द्रिकाया अभिमत इव प्रतीयते।

कोऽसावभ्यन्तरकोप इत्याह — **मन्त्रिपुरोहितेत्यादि**। **तमिति**। अभ्यन्तरकोपम्, आत्मदोषत्यागेन स्वदोष आभ्यन्तरकोपस्य कारणं चेत् तत्त्यागेन, साधयेत् प्रतिविदध्यात्। परशक्त्यपराधवशेन वा मन्त्रिपुरोहितादिदोष आभ्यन्तरकोपस्य कारणं चेत् मन्त्रिपुरोहितादीनां शक्त्यपराधानुरोधेन वा, साधयेत् वधबन्धार्थदण्डैः दण्डयेत्।

पुरोहितादिषु दण्डदानप्रकारमाह — **महापराधेऽपीति**। तथाभूतेऽपि पुरोहिते, संरोधनं बन्धनम्, अवस्रावणं वा देशान्निर्वासनं वा, सिद्धिः दण्डः, नतु वधो ब्राह्मणत्वादित्यभिप्रायः। युवराजे विषये, संरोधनं, निग्रहो वा वधो वा, सिद्धिः। कदायं वधपक्षस्तत्राह — **गुणवत्यन्यस्मिन् सति पुत्र इति**। गुणवत्पुत्रान्तरसद्भावे।

ताभ्यामिति। उक्तदण्डाभ्यां पुरोहितयुवराजाभ्यां यद्वा उक्ताभ्यां संरोधननिग्रहाभ्यां, मन्त्रिसेनापती व्याख्यातौ उक्तदण्डौ वेदितव्यौ, तयोरपि संरोधनम्, अब्राह्मणत्वे निग्रहश्च यथापराधं भवत इत्यभिप्रायः।

आभ्यन्तरकोपस्य प्रकारान्तराण्याह — **पुत्रमित्यादि**। तं, भ्रातरम्, अन्यं वा कुल्यं स्वकुलीनं, राज्यग्राहिणं राज्यजिघृक्षुम्, उत्साहेन साधयेत्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्साहाभावे गृहीतानुवर्तनसान्धिकर्मभ्यामरिसन्धानभयात् । अन्येभ्यस्तद्विधेभ्यो वा भूमिदानैर्विश्वासयेदेनम् । तद्विशिष्टं स्वयंग्राहं दण्डं वा प्रेषयेत्, सामन्ताटविकान् वा । तैर्विगृहीतमतिसन्दध्यात् । अवरुद्धादानं पारग्रामिकं वा योगमातिष्ठेत् ।

एतेन मन्त्रिसेनापती व्याख्यातौ ।

मन्त्र्यादिवर्जानामन्तरमात्यानामन्यतमकोपोऽन्तरमात्यकोपः । तत्रापि यथार्हमुपायान् प्रयुञ्जीत ।

राष्ट्रमुख्यान्तपालाटविकदण्डोपनतानामन्यतमकोपो बाह्यकोपः । तमन्योन्येनावग्राहयेत् । अतिदुर्गप्रतिस्तब्धं वा सामन्ताटविकतत्कुली-

---

सैनापत्याद्यधिकारनियोजनेन प्रोत्साह्य शमयेत् । उत्साहाभावे उत्साहाशक्तौ, गृहीतानुवर्तनसन्धिकर्मभ्यां तत्परिगृहीतभूम्यादिभोगानुवृत्त्यनुमत्या सन्धिकर्मणा च, साधयेत्, कुतः, अरिसन्धानभयात् 'असाधने स शत्रुणा सह सन्दध्यादि'ति भयात् । अन्येभ्यस्तद्विधेभ्यो वेति । कुल्यान्तरेभ्यः, भूमिदानैः, एनं विश्वासयेत् । तद्विशिष्टं तेन कुल्येन युक्तं, स्वयङ्ग्राहं दण्डं वा 'येन यल्लभ्यते तत् तस्य स्वम्' इति परिभाष्य युध्यमानं बलं स्वयंग्राहदण्डः तं वा, प्रेषयेत् क्वचिदभियोगार्थम् । सामन्ताटविकान् वा तद्विशिष्टान्, प्रेषयेत् । तैः तथा प्रेषितैः स्वयंग्राहदण्डसामन्ताटविकैः, विगृहीतं विरोधितं, कृत्वेति शेषः, अतिसन्दध्याद् बन्धयेदित्यर्थः । अतिसन्धानप्रकारमाह — अवरुद्धादानमिति । अवरुद्धस्य स्वयंग्राहदण्डादिभिर्बद्धस्य ग्रहणं, पारग्रामिकं तदाख्यं, योगं वा दुर्गलम्भोपायोक्तम्, आतिष्ठेद् अनुतिष्ठेत् ।

उक्तं कुल्यस्य साधनोपायं मन्त्रिसेनपात्योरतिदिशति—एतेनेत्यादि । इत्थं मन्त्र्यादिचतुष्टयान्यतमकोपलक्षण आभ्यन्तरकोपस्तत्परिहारश्चोक्तः ।

अन्तरमात्यकोपलक्षणमाभ्यन्तरकोपस्य प्रकारान्तरं परिभाषते — मन्त्र्यादिवर्जानामित्यादि । मन्त्रिपुरोहितसेनापतियुवराजव्यतिरिक्ताः येऽन्तरमात्या दौवारिकान्तर्वंशिकादयः तेषामन्यतमस्य कोपोऽन्तरमात्यकोप इति व्यपदिश्यते । तत्प्रशमनेऽपि पूर्वोक्तानुपायान् यथायोगं प्रयुञ्जीतेत्यर्थः ।

अथ बाह्यकोपं तत्परिहारं च निरूपयति — राष्ट्रमुख्यान्तपालाटविकदण्डोपनतानामिति । एषां मध्ये, अन्यतमकोपः, बाह्यकोपः तदाख्यः । तम्, अन्योन्येन अवग्राहयेत् राष्ट्रमुख्यस्य कोपमन्तपालादिभिः अन्तपालादीनां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नावरुद्धानामन्यतमेनावग्राहयेत् । मित्रेणोपग्राहयेद् वा, यथा नामित्रं गच्छेत् ।

अमित्राद् वा सत्री भेदयेदेनम्—'अयं त्वा योगपुरुषं मन्यमानो भर्तर्येव विक्रमयिष्यति, अवाप्तार्थो दण्डचारिणममित्राटविकेषु कृच्छ्रे वा प्रवासे योक्ष्यति, विपुत्रदारमन्ते वा वासयिष्यति, प्रतिहतविक्रमं त्वां भर्तरि पण्यं करिष्यति, त्वया वा सन्धिं कृत्वा भर्तारमेव प्रसादयिष्यति, मित्रमुपकृष्टं वास्य गच्छेद्' इति ।

प्रतिपन्नमिष्टाभिप्रायैः पूजयेत् ।

कोपं राष्ट्रमुख्येनेत्येवं परस्परेण शमयेत् । तस्यावग्रहीतुमशक्यतायामाह — अतिदुर्गप्रतिस्तब्धं वेति । प्रबलदुर्गावष्टम्भं राष्ट्रमुख्यादिं, सामन्ताटविकतत्कुलीनावरुद्धानामन्यतमेन सामन्तेन आटविकेन तत्कुलीनो यस्तदवरुद्धस्तेन वा, अवग्राहयेत् बन्धयेत् । अथवा, मित्रेण स्वीयेन, उपग्राहयेत् संगमयेत् प्राप्तसख्यं कारयेत्, किमर्थं, यथा नामित्रं गच्छेद् यथा स शत्रुणा संगतो न स्यादित्येतदर्थमित्यर्थः ।

अमित्रसंगमनवारणस्यान्यमुपायमाह — अमित्राद्वेति । सत्री गूढपुरुषः, एनं बाह्यं राष्ट्रमुख्याद्यन्यतमम्, अमित्राद्, भेदयेत् । किमुक्त्वा भेदयेदित्याह — अयं त्वेत्यादि । अयमर्थः— यं त्वं गन्तुमिच्छसि सोऽयं त्वां परस्य गूढपुरुषं मन्यमानो 'भर्तर्येव विक्रमस्व' इति चोदयिष्यति, भर्तृविक्रमणदृष्टप्रयोजनः दुष्करे दूरदेशप्रवासकरणीये अमित्राटविकसाधनार्थेऽभियोगे वा त्वां स्वसेनाप्रणेतारं कृत्वा नियोजयिष्यति; तव पुत्रान् दारांश्च स्ववशे स्थापयित्वा तद्विरहितमेव त्वां विषयान्ते वा वासयिष्यति; दृष्टभर्तृविक्रमप्रतिघातं त्वां स्वामिने विक्रेष्यते; त्वामेव वा पणस्थानीयं स्वामिनेऽर्पयित्वा सन्धिकरणेन स्वामिनं प्रसादयिष्यति; स्वामिन एव वा केनचिन्मित्रेण सह त्वां पणीकृत्य सन्धिं कारयिष्यति; इत्युक्त्वेति ।

प्रतिपन्नमिति । अङ्गीकृतभेदोपदेशम्, इष्टाभिप्रायैः तदीप्सितार्थलाभैः पूजयेत् ।

अप्रतिपन्नस्य शत्रुसंगमविघटनोपायमाह — अप्रतिपन्नस्येति । अनङ्गीकृतभेदोपदेशस्य, संश्रयं भेदयेत् संश्रयभेदनेन तत्संगमं विघटयेदित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अप्रतिपन्नस्य संश्रयं भेदयेद्—असौ ते योगपुरुषः प्रणिहितः इति ।

सत्री चैनमभित्यक्तशासनैर्घातयेद्, गूढपुरुषैर्वा । सहप्रस्थायिनो वास्य प्रवीरपुरुषान् यथाभिप्रायकरणेनावाहयेत् । तेन प्रणिहितान् सत्री ब्रूयात् । इति सिद्धिः । परस्य चैनान् कोपानुत्थापयेत् । आत्मनश्च शमयेत् ।

यः कोपं कर्तुं शमयितुं वा शक्तः, तत्रोपजापः कार्यः । यः सत्यसन्धः शक्तः कर्मणि फलावाप्तौ चानुग्रहीतुं विनिपाते च त्रातुं, तत्र प्रतिजापः कार्यः । तर्कयितव्यश्च — कल्याणबुद्धिरुताहो शठ इति ।

किमित्युक्त्वेत्याह — **असौ ते योगपुरुषः प्रणिहित** इतीति । यस्त्वां संश्रयितुमुपस्थितः, स परप्रेषितो गूढपुरुष इत्युक्त्वा ।

सत्री चेति । स च, एनम् अप्रतिपन्नं बाह्यं परसंश्रयिणम्, अभित्यक्तशासनैः वध्यतया निश्चिताः पुरुषा अभित्यक्ताः तद्धस्तप्रेषितैर्गूढलेखैः 'अमित्रो गूढं त्वया हन्यताम्' इत्येतादृशार्थप्रतिपादकैः, घातयेत्, अर्थादमित्रेणैव विदिततल्लेखार्थेन । गूढपुरुषैर्वा घातयेद्, अर्थाद् विजिगीषुप्रयुक्तैः । **सहप्रस्थायिनो वास्येति** । ये शत्रुं संश्रयितुं बाह्येन सह प्रस्थिताः तान्, प्रवीरपुरुषान्, यथाभिप्रायकरणेन तदिष्टार्थप्रदानेन, आवाहयेत् स्वपक्षमानयेत् । वाहयेदिति पाठेऽप्ययमेवार्थः । सहप्रस्थायिनश्चेदावाहयितुमशक्यास्तदा किं कर्तव्यमित्याह — **तेन प्रणिहितान् सत्री ब्रूयादिति** । 'ते प्रवीरपुरुषा विजिगीषुणा त्वां हन्तुं प्रणिहिता गूढपुरुषाः' इति सत्री अमित्रं बोधयेदित्यर्थः । **इति सिद्धिरिति** । अनेन प्रकारेण कोपप्रतीकार इत्यर्थः । तानिमान् आभ्यन्तरबाह्यकोपान् शत्रुपक्षे जनयेत्, स्वपक्षे च शत्रुजनितान् प्रतिकुर्यादित्याह— **परस्य चैनानित्यादि** ।

य एष उपजापः कोपोत्पादार्थो भेदः स कुत्र प्रयोक्तव्य इत्याकाङ्क्षायामाह — **यः कोपमित्यादि** । कोपोत्पादनप्रशमनयोरुभयोरपि यः शक्तः तस्मिन्नेवोपजापः कर्तव्यः । उपजापाभ्युपगमलक्षणः प्रतिजापः कुत्र कर्तव्य इत्याह — **य इत्यादि** । यः सत्यसन्धः विश्वसनीयः, कर्मणि क्रियानुष्ठाने, फलावाप्तौ अनुग्रहीतुं च प्रतिजापितुरुपकर्तुं च, विनिपाते त्रातुं च विपत्तौ रक्षितुं च, शक्तः, तत्र प्रतिजापः कार्यः । उपजपितुर्वञ्चकत्वसम्भवात् स प्रतिजपित्रा 'वञ्चको नवे'ति परीक्षणीय इत्याह—**तर्कयितव्यश्चेत्यादि** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शठो हि बाह्योऽभ्यन्तरमेवमुपजपति — भर्तारं चेद्धत्वा मां प्रतिपादयिष्यति शत्रुवधो भूमिलाभश्च मे द्विविधो लाभो भविष्यति, अथवा शत्रुरेनमाहनिष्यति हतबन्धुपक्षस्तुल्यदोषदण्डेन वा उद्विग्नश्च, मे भूयान् कृत्यपक्षो भविष्यति तद्विधे वान्यस्मिन्नपि शङ्कितो भविष्यति अन्यमन्यं चास्य मुख्यमभित्यक्तशासनेन घातयिष्यामि इति ।

अभ्यन्तरो वा शठो बाह्यमेवमुपजपति — कोशमस्य हरिष्यामि, दण्डं वास्य हनिष्यामि, दुष्टं वा भर्तारमनेन घातयिष्यामि, प्रतिपन्नं बाह्यमित्राटविकेषु विक्रमयिष्यामि चक्रमस्य सज्यतां वैरमस्य प्रसज्यतां ततः स्वाधीनो मे भविष्यति, ततो भर्तारमेव प्रसादयिष्यामि, स्वयं वा राज्यं ग्रहीष्यामि, वद्ध्वा वा बाह्यभूमिं भर्तृभूमिं चोभयमवाप्स्यामि, विरुद्धं वावाहयित्वा बाह्यं विश्वस्तं घातयिष्यामि शून्यं वास्य मूलं हरिष्यामि इति ।

उपजपिता नाम बाह्यो वाभ्यन्तरमुपजपति अभ्यन्तरो वा बाह्यम् । तत्र बाह्यस्योपजपितुः शठस्याभिसन्धीनाह— शठो हि बाह्य इत्यादि । स हि, अभ्यन्तरं वक्ष्यमाणैरभिसन्धिप्रकारैरुपजपति । तानाह —भर्तारमित्यादि । अन्तिम इतिशब्दस्त्रिषु सम्बध्यते । तेनायमर्थः—मयोपजपितोऽभ्यन्तरो मन्त्री स्वामिनं हत्वा तत्स्थाने मां निवेशयिष्यति चेत्, शत्रुवधो भूमिलाभश्चेति द्विप्रकारो लाभो मे भविष्यतीति; अथवा शत्रुश्चेद् मान्त्रिणं हनिष्यति, तर्हि हतस्य मन्त्रिणो बन्धुवर्गः मन्त्रिवधेनोद्विग्नो मन्त्रितुल्यदोषः कुद्धलुब्धादिवर्गश्चेत्येवं कृत्यपक्षो मे बहुतरः सिध्येदिति; विजिगीषुस्तज्जातीयेऽन्यस्मिन्नपि अविश्वस्तो भविष्यति; तेनान्यमन्यं च विजिगीषोर्मुख्यम् अभित्यक्तहस्तद्वारप्रेषितेन कूटलेखेन विजिगीषुवधबन्धादिकर्तव्यतोपदेशकेन घातयिष्यामीति ।

अभ्यन्तरस्योपजपितुः शठस्याभिसन्धीनाह — अभ्यन्तरो वा शठ इत्यादि । अयमर्थः—कोशमस्य बाह्यस्य हरिष्यामि; अथवा बलमस्य हनिष्यामि; अथवा दुष्टं मे भर्तारमनेन घातयिष्यामि; अथवा प्रतिपन्नमद्भर्तृघाताभ्युपगमं बाह्यं प्रथममामित्रेष्वाटविकेषु च विक्रान्तं कारयित्वा तैः सहास्य सैन्ये सक्ते प्रकर्षेण रूढे चास्य वैरे ममायं विधेयो भविष्यति, तेन मयि भर्तरि प्रसादो भविष्यति; अथवा स्वयं बाह्यस्य विधेयीभूतस्य राज्यं ग्रही-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अप्रतिपन्नस्य संश्रयं भेदयेद्—असौ ते योगपुरुषः प्रणिहितः इति ।

सत्री चैनमभित्यक्तशासनैर्घातयेद्, गूढपुरुषैर्वा । सहप्रस्थायिनो वास्य प्रवीरपुरुषान् यथाभिप्रायकरणेनावाहयेत् । तेन प्रणिहितान् सत्री ब्रूयात् । इति सिद्धिः । परस्य चैनान् कोपानुत्थापयेत् । आत्मनश्च शमयेत् ।

यः कोपं कर्तुं शमयितुं वा शक्तः, तत्रोपजापः कार्यः । यः सत्यसन्धः शक्तः कर्मणि फलावाप्तौ चानुग्रहीतुं विनिपाते च त्रातुं, तत्र प्रतिजापः कार्यः । तर्कयितव्यश्च — कल्याणबुद्धिरुताहो शठ इति ।

किमित्युक्त्वेत्याह — **असौ ते योगपुरुषः प्रणिहित** इतीति । यस्त्वां संश्रयितुमुपस्थितः, स परप्रेषितो गूढपुरुष इत्युक्त्वा ।

सत्री चेति । स च, एनम् अप्रतिपन्नं बाह्यं परसंश्रयिणम्, अभित्यक्तशासनैः वध्यतया निश्चिताः पुरुषा अभित्यक्ताः तद्धस्तप्रेषितैर्गूढलेखैः 'अमित्रो गूढं त्वया हन्यताम्' इत्येतादृशार्थप्रतिपादकैः, घातयेत्, अर्थादमित्रेणैव विदिततल्लेखार्थेन । गूढपुरुषैर्वा घातयेद्, अर्थाद् विजिगीषुप्रयुक्तैः । **सहप्रस्थायिनो वास्येति** । ये शत्रुं संश्रयितुं बाह्येन सह प्रस्थिताः तान्, प्रवीरपुरुषान्, यथाभिप्रायकरणेन तदिष्टार्थप्रदानेन, आवाहयेत् स्वपक्षमानयेत् । वाहयेदिति पाठेऽप्ययमेवार्थः । सहप्रस्थायिनश्चेदावाहयितुमशक्यास्तदा किं कर्तव्यमित्याह — **तेन प्रणिहितान् सत्री ब्रूयादिति** । 'ते प्रवीरपुरुषा विजिगीषुणा त्वां हन्तुं प्रणिहिता गूढपुरुषाः' इति सत्री अमित्रं बोधयेदित्यर्थः । **इति सिद्धिरिति** । अनेन प्रकारेण कोपप्रतीकार इत्यर्थः । तानिमान् आभ्यन्तरबाह्यकोपान् शत्रुपक्षे जनयेत्, स्वपक्षे च शत्रुजनितान् प्रतिकुर्यादित्याह— **परस्य चैनानित्यादि** ।

य एष उपजापः कोपोत्पादार्थो भेदः स कुत्र प्रयोक्तव्य इत्याकाङ्क्षायामाह — **यः कोपमित्यादि** । कोपोत्पादनप्रशमनयोरुभयोरपि यः शक्तः तस्मिन्नेवोपजापः कर्तव्यः । उपजापाभ्युपगमलक्षणः प्रतिजापः कुत्र कर्तव्य इत्याह — **य इत्यादि** । यः सत्यसन्धः विश्वसनीयः, कर्मणि क्रियानुष्ठाने, फलावाप्तौ अनुग्रहीतुं च प्रतिजापितुरुपकर्तुं च, विनिपाते त्रातुं च विपत्तौ रक्षितुं च, शक्तः, तत्र प्रतिजापः कार्यः । उपजपितुर्वञ्चकत्वसम्भवात् स प्रतिजपित्रा 'वञ्चको नवे'ति परीक्षणीय इत्याह—**तर्कयितव्यश्चेत्यादि** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शठो हि बाह्योऽभ्यन्तरमेवमुपजपति — भर्तारं चेद्धत्वा मां प्रतिपादयिष्यति शत्रुवधो भूमिलाभश्च मे द्विविधो लाभो भविष्यति, अथवा शत्रुरेनमाहनिष्यति हतबन्धुपक्षस्तुल्यदोषदण्डेन वा उद्विग्नश्च, मे भूयान् कृत्यपक्षो भविष्यति तद्विधे वान्यस्मिन्नपि शङ्कितो भविष्यति अन्यमन्यं चास्य मुख्यमभित्यक्तशासनेन घातयिष्यामि इति ।

अभ्यन्तरो वा शठो बाह्यमेवमुपजपति — कोशमस्य हरिष्यामि, दण्डं वास्य हनिष्यामि, दुष्टं वा भर्तारमनेन घातयिष्यामि, प्रतिपन्नं बाह्यमभित्राटविकेषु विक्रमयिष्यामि चक्रमस्य सज्यतां वैरमस्य प्रसज्यतां ततः स्वाधीनो मे भविष्यति, ततो भर्तारमेव प्रसादयिष्यामि, स्वयं वा राज्यं ग्रहीष्यामि, बद्ध्वा वा बाह्यभूमिं भर्तृभूमिं चोभयमवाप्स्यामि, विरुद्धं वावाहयित्वा बाह्यं विश्वस्तं घातयिष्यामि शून्यं वास्य मूलं हरिष्यामि इति ।

उपजपिता नाम बाह्यो बाभ्यन्तरमुपजपति अभ्यन्तरो वा बाह्यम् । तत्र बाह्यस्योपजपितुः शठस्याभिसन्धीनाह — शठो हि बाह्य इत्यादि । स हि, अभ्यन्तरं वक्ष्यमाणैरभिसन्धिप्रकारैरुपजपति । तानाह — भर्तारमित्यादि । अन्तिम इतिशब्दस्त्रिषु सम्बध्यते । तेनायमर्थः — मयोपजपितोऽभ्यन्तरो मन्त्री स्वामिनं हत्वा तत्स्थाने मां निवेशयिष्यति चेत्, शत्रुवधो भूमिलाभश्चेति द्विप्रकारो लाभो मे भविष्यतीति; अथवा शत्रुश्चेद् मान्त्रिणं हनिष्यति, तर्हि हतस्य मन्त्रिणो बन्धुवर्गः मन्त्रिवधेनोद्विग्नो मन्त्रितुल्यदोषः क्रुद्धलुब्धादिवर्गश्चेत्येवं कृत्यपक्षो मे बहुतरः सिध्येदिति; विजिगीषुस्तज्जातीयेऽन्यस्मिन्नपि अविश्वस्तो भविष्यति; तेनान्यमन्यं च विजिगीषोर्मुख्यम् अभित्यक्तहस्तद्वारप्रेषितेन कूटलेखेन विजिगीषुवधबन्धादिकर्तव्यतोपदेशकेन घातयिष्यामीति ।

अभ्यन्तरस्योपजपितुः शठस्याभिसन्धीनाह — अभ्यन्तरो वा शठ इत्यादि । अयमर्थः — कोशमस्य बाह्यस्य हरिष्यामि; अथवा बलमस्य हनिष्यामि; अथवा दुष्टं मे भर्तारमनेन घातयिष्यामि; अथवा प्रतिपन्नमद्भर्तृघाताभ्युपगमं बाह्यं प्रथममभित्रेष्वाटविकेषु च विक्रान्तं कारयित्वा तैः सहास्य सैन्ये सक्ते प्रकर्षेण रूढे चास्य वैरे ममायं विधेयो भविष्यति, तेन मयि भर्तृप्रसादो भविष्यति; अथवा स्वयं बाह्यस्य विधेयीभूतस्य राज्यं ग्रही-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कल्याणबुद्धिस्तु सहजीव्यर्थमुपजपति । कल्याणबुद्धिना सन्दधीत । शठं 'तथा' इति प्रतिगृह्यातिसन्दध्यात् । इति ॥

एवमुपलभ्य,

परे परेभ्यः स्वे स्वेभ्यः स्वे परेभ्यः स्वतः परे ।
रक्ष्याः स्वेभ्यः परेभ्यश्च नित्यमात्मा विपश्चिता ॥

इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे तृतीयोऽध्यायः
पश्चात्कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारश्च,
आदितश्चतुर्विंशतिशतः ॥

ष्यामि; बद्ध्वा वा बाह्यं तस्य भूमिं भर्तुर्भूमिं चेत्युभयं शासनीयमवाप्स्यामि; अथवास्य विरोधिनं यंकमप्यानीय तेन बाह्यं विश्वस्तं घातयिष्यामि; अथवा बाह्यस्य स्थानीयमन्याभियोगव्यासङ्गासन्निहितस्वामिकं हरिष्यामि; इत्येतैरभिसन्धिप्रकारैः शठोऽभ्यन्तरो बाह्यमुपजपेदिति ।

कल्याणबुद्धिस्त्विति । अशठस्तु, सहजीवी संश्लिष्यैव जीवितुं शीलवान् ननु विरुध्य, अत एव अर्थं हितम्, उपजपति, नानर्थम् । ततश्च कल्याणबुद्धिना सह, सन्दधीत सन्धिं कुर्यात् । शठं, तथेति प्रतिगृह्य 'यथा त्वयोच्यते तथा करोमि' इति तद्वचनमङ्गीकृत्य, अतिसन्दध्याद् वञ्चयेत् । इतिशब्द उपायोपदेशसमाप्तौ ॥

एवमुपलभ्येति वक्ष्यमाणश्लोकान्वयि ।

परे इति । विपश्चिता कार्यतत्त्वविदुषा विजिगीषुणा, एवम् उपलभ्य शठत्वकल्याणबुद्धित्वे निश्चित्य, परे परेभ्यो रक्ष्याः शठत्वादिनात्मविदिताः परे परेभ्यो न प्रकाश्याः । स्वे स्वीयास्तथात्मविदिताः, स्वेभ्यो रक्ष्याः न प्रकाश्याः । स्वे तथात्मविदिताः, परेभ्यो रक्ष्याः न प्रकाश्याः । परे तथाविदिताः, स्वतः स्वेभ्यः, रक्ष्याः न प्रकाश्याः । आत्मा स्वेभ्यः परेभ्यश्च नित्यं रक्ष्यः आत्मनः परान् स्वांश्च प्रति योऽभिप्रायोऽनुकूलः प्रतिकूलो वा स स्वेभ्यः परेभ्यश्च कदापि न प्रकाश्य इत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायामभियास्यत्कर्मणि नवमेऽधिकरणे तृतीयोऽध्यायः
पश्चात्कोपचिन्ता बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारश्च,
आदितश्चतुर्विंशत्यधिकशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४२. प्रक. क्षयव्ययलाभविपरिमर्शः ।

युग्यपुरुषापचयः क्षयः । हिरण्यधान्यापचयो व्ययः ।
ताभ्यां बहुगुणविशिष्टे लाभे यायात् ।

आदेयः, प्रत्यादेयः, प्रसादकः, प्रकोपको, ह्रस्वकालः, तनुक्षयः, अल्पव्ययो, महान्, वृद्धयुदयः, कल्यो, धर्म्यः, पुरोगश्चेति लाभसम्पत् ।

सुप्राप्यानुपाल्यः परेषामप्रत्यादेय इति आदेयः ।
विपर्यये प्रत्यादेयः । तमाददानस्तत्रस्थो वा विनाशं प्राप्नोति ।
यदि वा पश्येत् — 'प्रत्यादेयमादाय कोशदण्डनिचयरक्षाविधानान्यवस्रावयिष्यामि, खनिद्रव्यहस्तिबनसेतुबन्धवणिक्पथानुद्धृत-

क्षयव्ययलाभविपरिमर्श इति सूत्रम् । युग्यपुरुषापचयः क्षयः धान्यहिरण्यापचयो व्ययः लाभो यानफलं भूम्यादिप्राप्तिः तेषां विपरिमर्शः गौरवलाघवविचारः क्रियत इति सूत्रार्थः । यानहेतुकयोर्बाह्याभ्यन्तरकोपयोर्निरूपणानन्तरं क्षयव्ययावपि तत्त्वाविशेषान्निरूपणीयतया प्राप्ताविति सङ्गतिः ।

प्रथमं क्षयव्ययोः स्वरूपमाह — **युग्यपुरुषापचय** इति । युग्यानि वाहनानि पुरुषाः कर्मकरादयः तेषामपचयः, क्षयः । हिरण्यधान्यापचयः हिरण्यं धनादि धान्यं व्रीह्यादि तयोरपचयः, व्ययः ।

ताभ्यामिति । क्षयव्ययापेक्षया, बहुगुणविशिष्टे आदेयत्वप्रत्यादेयत्वादिभिर्द्वादशभिर्गुणैर्युक्ते, लाभे सति, यायात् ।

तान् गुणानुद्दिशति — **आदेय** इत्यादि । इति लाभसम्पत्, उक्तद्वादशप्रकारो लाभस्य गुण इत्यर्थः ।

आदेयादिषु लक्षणीयेषु प्रथममादेयं लक्षयति — **सुप्राप्यानुपाल्य** इत्यादि । यः सुखेन प्राप्तुं शक्यः, प्राप्तश्च सुखेनानुपालयितुं शक्यः, कालान्तरे परैः प्रत्यादातुमशक्यश्च, स आदेयशब्दित इत्यर्थः ।

प्रत्यादेयं लक्षयति — **विपर्यय** इत्यादि । सुप्राप्यानुपाल्य एव परैः प्रत्यादातुं शक्यः प्रत्यादेय इत्यर्थः । **तमिति** । प्रत्यादेयं भूम्यादिलाभम् आददानः, तत्रस्थो वा तत्रैव स्थित्वोपजीवन् वा, विनाशं प्राप्नोति ।

विषयविशेषे तमप्यादद्यादित्याह — **यदि वा पश्येदित्यादि** । अयमर्थः — प्रत्यादेये गृहीते तेन तल्लाभनाशात् परस्य कोशं दण्डं व्रीह्यादिसञ्चयं दुर्गप्राकारादिरक्षाविधानं च हीनमापादयिष्यामि, तेन परस्य खनिं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सारान् करिष्यामि; प्रकृतीरस्य कर्शयिष्यामि; आवाहयिष्यामि, आयोगेनाराधयिष्यामि वा, ताः परः प्रतियोगेन कोपयिष्यति; प्रतिपक्षे वास्य पण्यमेनं करिष्यामि; मित्रमवरुद्धं वास्य प्रतिपादयिष्यामि; मित्रस्य स्वस्य वा देशस्य पीडामत्रस्थस्तस्करेभ्यः परेभ्यश्च प्रतिकरिष्यामि; मित्रमाश्रयं वास्य वैगुण्यं ग्राहयिष्यामि, तदमित्रविरक्तं तत्कुलीनं प्रतिपत्स्यते; सत्कृत्य वास्मै भूमिं दास्यामि, इति, संहितसमुत्थितं मित्रं मे चिराय भविष्यति' इति प्रत्यादेयमपि लाभमाददीत। इत्यादेयप्रत्यादेयौ व्याख्यातौ।

अधार्मिकाद् धार्मिकस्य लाभो लभ्यमानः स्वेषां परेषां च प्रसादको भवति। विपरीतः प्रकोपक इति। मन्त्रिणामुपदेशाल्लाभोऽलभ्य-

---

द्रव्यवनं हास्तिवनं सेतुबन्धं वणिक्पथं चोद्धृतसारं कृत्वा क्षयप्राप्तं करिष्यामि, तेन परस्य प्रकृतीस्तदुपजीविनीरुपजीव्यहान्या कर्शयिष्यामि; लब्धभूमावेव वा तत्फलभोगार्थं परस्य प्रकृतीरानीय वासयिष्यामि, आयोगेन च तदीयसर्वोपचयभोगाश्यनुज्ञानलक्षणेन ताः प्रीणयिष्यामि, परो मद्गृहीतभूमिप्रत्यादानानन्तरं मद्विहितानुग्रहविपरीताचरणलक्षणेन प्रतियोगेन प्रकृतिकोपमात्मानर्थावहं जनयिष्यति; परस्य प्रतिपक्षाय वा परं लाभापहारक्षीणं द्रव्यग्रहणेनार्पयिष्यामि, अस्य लाभापहारक्षीणस्य परस्य स्थाने स्वमित्रम् अवरुद्धं पुत्रादिं वा निवेशयिष्यामि; स्वमित्रस्य स्वस्य वा देशस्य चोरेभ्यः शत्रुभ्यश्च जातां पीडां लब्धभूमिस्थितो भूत्वा प्रतिकर्तुं शक्ष्यामि; अथवा परस्य मित्रम् आश्रयभूतं मध्यमं वा लब्धभूमिस्थितो भूत्वा परस्य युक्तकरग्राहित्वादिगुणहीनतां प्रजापीडकत्वं च बोधयिष्यामि, तथा बोधितं च तत् परस्य मित्रं परस्मिन् विरक्तं भूत्वा परस्य कुलीनं पुत्रादिमवरुद्धं तद्राज्यग्राहित्वेन प्रतिपत्स्यते; गृहीतामेव वा परस्य भूमिं परस्य कन्यादानादिसत्कारपूर्वं दास्यामि; इत्यनेनप्रकारेण सत्कृत्य भूमिप्रत्यर्पणलक्षणेन कृतसन्धिकं मया सह सम्भूय व्यापृतं मम चिरस्थायि मित्रं भविष्यति; इत्येवंरूपान् हेतून् यदि पश्येत् तर्हि प्रत्यादेयमपि लाभं गृह्णीयादिति। इत्यादेयप्रत्यादेयावित्यादि। अनेन प्रकारेणादेयानादेयौ लाभौ भावाभावरूपतया सह निरूपितावित्यर्थः।

प्रसादकप्रकोपकौ निरूपयति — अधार्मिकादित्यादि। अधार्मिकसकाशाद् धार्मिकेण लभ्यमानो लाभः धार्मिकपक्ष्याणामधार्मिकपक्ष्याणां चोभ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानः कोपको भवति, 'अयमस्माभिः क्षयव्ययौ ग्राहितः' इति । दूष्यमन्त्रिणामनादराल्लाभो लभ्यमानः कोपको भवति, 'सिद्धार्थोऽयमस्मान् विनाशयिष्यति' इति । विपरीतः प्रसादकः । इति प्रसादककोपकौ व्याख्यातौ ।

गमनमात्रसाध्यत्वाद् ह्रस्वकालः ।
मन्त्रसाध्यत्वात् तनुक्षयः ।
भक्तमात्रव्ययत्वादल्पव्ययः ।
तदात्ववैपुल्यान्महान् ।
अर्थानुबन्धकत्वाद् वृद्ध्युदयः ।

येषां प्रीतिं जनयतीति स प्रसादक उच्यते । उक्तवैपरीत्येन धार्मिकसकाशादधार्मिकेण लभ्यमानो लाभ उभयेषामपि द्वेषं जनयतीति स प्रकोपक इत्युच्यत इत्यर्थः । कोपकस्यान्यौ प्रकारावाह — **मन्त्रिणामित्यादि** । मन्त्र्युपदेशानुसारेण कस्यचिल्लाभस्यार्थे समुद्यमे कृतेऽप्यलब्धः स लाभः स्वामिनः प्रद्वेषकरो भवति, 'अयमस्माभिर्वृथा क्षयव्ययौ ग्राहित' इति मन्त्रिणां शङ्काजनकश्च भवतीत्यर्थः । **दूष्यमन्त्रिणामिति** । दूष्या ये मन्त्रिणस्तेषाम् , अनादराद् अवज्ञानाद् , लाभः लभ्यमानः, कोपकः शङ्काकरो भवति । शङ्कायास्वरूपमाह — **सिद्धार्थोऽयमित्यादि** । **विपरीतः प्रसादक इति** । मन्त्र्युपदेशाल्लभ्यमानो लाभः, दूष्यमन्त्रिणामनादरादलभ्यमानो लाभश्च, प्रसादजनको भवति । **इति प्रसादकेत्यादि** । व्याख्यातौ पूर्ववत् सह निरूपितौ ।

अथ लाभस्याभिसन्धियोग्यत्वप्रयोजकान् ह्रस्वकालत्वादिगुणानाह— **गमनमात्रसाध्यत्वादित्यादि** । अचिरव्यापारनिष्पाद्यो लाभो ह्रस्वकाल इत्यर्थः ।

मन्त्रसाध्यत्वादिति । मन्त्रेण उपजापादिना प्रधानभूतेनाल्पयुद्धवत्तयाल्पयुग्यपुरुषापचयवता साध्यत्वात् , तनुक्षयो नाम लाभः ।

भक्तमात्रव्ययत्वादित्यादि । धनग्रहणानपेक्षभक्तदानमात्रतृप्तसैन्यसाध्योऽल्पव्ययो नाम ।

तदात्ववैपुल्यादित्यादि । तत्काल एव प्रचुरतया लभ्यमानो लाभो महान् नाम ।

अर्थानुबन्धकत्वादित्यादि । तत्काललभ्यार्थानुबन्ध्युत्तरकाललभ्यार्थको वृद्ध्युदयो नाम ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निरावाधकत्वात् कल्यः ।

प्रशस्तोपादानाद् धर्म्यः ।

सामवायिकानामनिर्बन्धगामित्वात् पुरोग इति ।

तुल्ये लाभे, देशकालौ शक्त्युपायौ प्रियाप्रियौ जवाजवौ सामीप्यविप्रकर्षौ तदात्वानुबन्धौ सारत्वसातत्ये बाहुल्यबाहुगुण्ये च विमृश्य बहुगुणयुक्तं लाभमाददीत ।

लाभविघ्नाः — कामः कोपः साध्वसं कारुण्यं ह्रीः अनार्यभावो मानः सानुक्रोशता परलोकापेक्षा दाम्भिकत्वम् अत्याशित्वं

निरावाधकत्वादित्यादि । उत्तरकालनिरुपद्रवः कल्यः ।

प्रशस्तोपादानाद् धर्म्य इति । प्रशस्तं यदुपादानं प्रकाशयुद्धेनार्जनं तेन विषयीकृतो लाभो धर्मानपेतत्वाद् धर्म्यः ।

सामवायिकानामित्यादि । सम्भूययायिनां परस्परभागप्रकर्षानियमोपस्थितः प्रकृष्टो लाभः पुरोग इत्युच्यते ।

अथ लाभसाम्ये तद्विशेषोपादानस्य निमित्तान्याह — तुल्ये इत्यादि । देशकालादिनिमित्तपर्यालोचनया यस्मिन् लाभे बहुगुणयोगं पश्यति तमुपाददीतेत्यर्थः । तत्र देशस्य कालस्य चैकस्मिन्नेव द्रव्ये गुणविशेषाधानहेतुत्वं प्रसिद्धम् । शक्तिषु मन्त्रप्रभावोत्साहलक्षणासु पूर्वपूर्वसाध्यो लाभ उत्तरोत्तरसाध्यात् प्रशस्तः । तथा सामादिषु । हिरण्यलाभः सर्वप्रियत्वाद् बहुगुणो, न तथान्यलाभः । जवाजवौ सिद्धिशैघ्र्यविलम्बौ, शीघ्रसिद्धिको हि विलम्बसिद्धिकात् प्रशस्तः । स्वभूमिप्रत्यासन्ना भूमिर्विप्रकृष्टभूम्यपेक्षया श्रेयसीति सामीप्यविप्रकर्षौ गुणप्रयोजकौ । तत्कालमात्रपर्यवसायिनो लाभादुत्तरकालानुबन्धयुक्तः प्रशस्त इति तदात्वानुबन्धौ गुणहेतू । सारत्वसातत्ये श्रेयस्त्वप्रयोजके, यथा रत्नादेः सारत्वं लवणादेः सातत्यम् । बाहुल्यं संख्यातः परिमाणतश्च बहुत्वं बाहुगुण्यं संख्याद्यबाहुल्येऽपि बहुगुणयोगः ते अपि विमर्शनीये श्रेयस्त्वहेतुत्वात् ।

लाभविघ्नानाह — लाभेत्यादि । कामः स्त्रीप्रसङ्गः स खलूत्साहपरिपन्थित्वाल्लाभं विहन्ति । कोपः रभसप्रवृत्तिहेतुत्वात् । साध्वसम् अप्रगल्भत्वं शत्रुमित्रादिषु यथार्हव्यवहारविरोधित्वात् । कारुण्यं बहुप्राणिवधशङ्कया युद्धप्रवृत्तिप्रतिबन्धकत्वात् । ह्रीः लज्जा सापराधेऽपि सान्त्ववादिन्यभियोगप्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दैन्यम् असूया हस्तगतावमानो दौरात्मिकमविश्वासो भयमनिकारः शीतोष्णवर्षाणामाक्षम्यं मङ्गलतिथिनक्षत्रेष्टित्वमिति ॥

नक्षत्रमतिपृच्छन्तं बालमर्थोऽतिवर्तते ।
अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारकाः ॥
नाधनाः प्राप्नुवन्त्यर्थान् नरा यत्नशतैरपि ।
अर्थैरर्थाः प्रबध्यन्ते गजाः प्रतिगजैरिव ॥

इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे
चतुर्थोऽध्यायः क्षयव्ययलाभविपरिमर्शः,
आदितः पञ्चविंशशतः ॥

बन्धात् । अनार्यभावः नृसंशत्वं विश्वासघातादिप्रवर्तकत्वात् । मानः 'अहं महानि'त्यहङ्कारः सहायविघटकत्वात् । सानुक्रोशता अनुक्रोश उपहाराद्यर्पणनिमित्ता दया तैक्ष्ण्यविषये मृदुवृत्तिप्रयोजकत्वात् । परलोकापेक्षा परलोकविघातकपापयोगशङ्कया दाहविलोपादिवैमुख्यापादकत्वात् । दाम्भिकत्वं विश्वस्तवञ्चकत्वम् । अत्याशित्वं न्यायप्राप्ताभ्यधिकलाभभक्षकत्वम् । दैन्यम् अधमेषु साह्ययाच्ञा । असूया दृष्टगुणेषु मन्त्र्यमात्यप्रभृतिषु दोषारोपः । हस्तगतावमानः हस्तप्राप्तस्यार्थस्यावज्ञानम् । दौरात्मिकं पीड्यापीड्यसाधारणपीडोत्पादकत्वम् । अविश्वासः विश्वसनीयेऽपि विश्वासाकरणम् । भयम् अभियोगे पराजयशङ्का । परस्य तिरस्क्रिया निकारः तदकरणमनिकारः, अप्रतिकार इति पाठे सिद्धिप्राक्कालपरापतितविनिपातप्रतिक्रियाननुष्ठानम् । शीतोष्णवर्षाणाम् आक्षम्यं शीतोष्णवर्षासहिष्णुत्वम् । मङ्गलतिथिनक्षत्रेष्टित्वं कार्यारम्भानुकूलशोभनातिथिनक्षत्रापेक्षकत्वम् । दाम्भिकत्वादीनां लाभविघातकत्वं सहायविघटकत्वप्रवृत्तिप्रतिबन्धकत्वादिना यथायथं बोद्धव्यम् ॥

विंशेषु विंशतावुक्तेषु अन्तिमस्यातिपातिककार्यविषयतां वक्तुमाह — **नक्षत्रमिति** । नक्षत्रम् अतिपृच्छन्तम् अतिमात्रं पृच्छन्तं गृहपटलप्रज्वलितवह्निप्रशमनजातीये सद्यःकरणीयेऽपि कार्ये 'नक्षत्रं कार्यारम्भानुकूलं नवे'त्यनुयुञ्जानं, बालम् अप्राज्ञम्, अर्थः प्रवृत्तिफलम्, अतिवर्तते अतिक्रम्य गच्छति । कुतः, हि यतः, अर्थस्य साध्यस्य फलस्य, अर्थः धनादि, नक्षत्रम् । इह नक्षत्रशब्देन सिद्ध्युपकरणं लक्ष्यते साधनं भवतीत्यर्थः । तारकाः किं करिष्यन्ति तत्रासाधिका इत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लाभसाधनेषु धनस्य मुख्यत्वमाविष्कर्तुमाह — **नाधना** इति । अधनाः धनरूपसाधनरहिताः, नराः यत्नशतैरपि कृतैः, अर्थान् शत्रुजयादिरूपान्, न प्राप्नुवन्ति । अर्थाभावेऽर्थासिद्धिलक्षणं व्यतिरेकमुक्त्वा तत्सत्त्वे तत्सिद्धिलक्षणमन्वयमाह—**अर्थैरिति** । तैः, अर्थाः प्रबध्यन्ते प्रकर्षेण साध्यतया संबद्धा वर्तन्ते । तत्रोपमामाह—**गजाः प्रतिगजैरिवेति** । यथा गजाः प्रतिगजैः साधनभूतैः साध्यतया संबद्धास्तद्वत् । नाधना इत्यस्य स्थाने साधना इति पाठे तु मत्वर्थलक्षणया धनादिसाधनवन्त इत्यर्थं कल्पयित्वा त एव यत्नशतैरपि कृतैरर्थान् प्राप्नुवन्ति, न तु धनादिसाधनरहिता इति कथञ्चिद् व्याख्येयम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामभियास्यत्कर्मणि नवमेऽधिकरणे
चतुर्थोऽध्यायः क्षयव्ययलाभविपरिमर्शः,
आदितः पञ्चविंशत्यधिकशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४३. प्रक. बाह्याभ्यन्तराश्चापदः ।

सन्ध्यादीनामयथोद्देशावस्थापनमपनयः । तस्मादापदः सम्भवन्ति ।

बाह्योत्पत्तिरभ्यन्तरप्रतिजापा । अभ्यन्तरोत्पत्तिर्बाह्यप्रतिजापा । बाह्योत्पत्तिर्बाह्यप्रतिजापा । अभ्यन्तरोत्पत्तिरभ्यन्तरप्रतिजापा । **इत्यापदः** ।

यत्र बाह्या अभ्यन्तरानुपजपन्ति, अभ्यन्तरा वा बाह्यान् तत्रोभययोगे प्रतिजपतः सिद्धिर्विशेषवती । सुव्याजा हि प्रतिजपितारो

बाह्याभ्यन्तराश्चापद इति सूत्रम् । बाह्याः राष्ट्रमुख्यान्तपालादिप्रभवाः अभ्यन्तरा मन्त्रिपुरोहितादिप्रभवाः इत्युभयविधा आपदः चकारात् तत्प्रतिविधानं चोच्यन्त इति सूत्रार्थः ।

तासां कारणमाह — **सन्ध्यादीनामिति** । सन्धिविग्रहादीनां षण्णां गुणानाम्, अयथोद्देशावस्थापनं स्वस्वविषयातिक्रमेण प्रयोगः, अपनयः इति नाम्नोच्यत इति शेषः । तस्माद् अपनयाद्, आपदः, संभवन्ति ।

बाह्याभ्यन्तरयोरापदोरुपजपितृप्रतिजपितृभेदात् प्रत्येकं द्वैविध्यं दर्शयन्नापदां चातुर्विध्यमाह — **बाह्योत्पत्तिरिति** । बाह्याद् राष्ट्रमुख्यादेरुपजापकाद् उत्पत्तिर्यस्याः सा तथाभूता अभ्यन्तरप्रतिजापा अभ्यन्तरो मन्त्र्यादिः प्रतिजापः प्रतिजपिता यथोपजापानुष्ठानाभ्युपगन्ता यस्याः सा तथाभूता विपत् प्रथमा । अभ्यन्तरोत्पत्तिः मन्त्र्याद्यभ्यन्तरोपजपितृका, बाह्यप्रतिजापा राष्ट्रमुख्यान्तपालादिप्रतिजपितृका द्वितीया । **बाह्योत्पत्तिर्बाह्यप्रतिजापेति** । बाह्योपजपितृका बाह्यप्रतिजपितृका तृतीया । अभ्यन्तरोत्पत्तिरभ्यन्तरप्रतिजपितृकेति चतुर्थी । **इत्यापद** इति । उभयजातीयोपजपितृप्रतिजपितृके द्वे एकजातीयोपजपितृप्रतिजपितृके द्वे इत्याहृत्य चतूरूपा आपद इत्यर्थः ।

तासूभययोगवत्योराद्ययोर्विपदोः परिहारार्थम् उपजपितृसमाधानात् प्रतिजपितुः समाधानं प्रशस्तमित्याह — **यत्र बाह्या** इत्यादि । सिद्धिः साम्नादानादिना समाधानम् । विशेषवती श्रेयसी । श्रेयस्त्वे हेतुमाह — **सुव्याजा हीति** । हि यतः, प्रतिजपितारः सुव्याजाः, व्याजा उपजपितृप्रयुक्तो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवन्ति, नोपजपितारः। तेषु प्रशान्तेषु नान्याञ् शक्नुयुरुपजपितुमुपजपितारः। कृच्छ्रोपजापा हि बाह्यानामभ्यन्तरास्तेषामितरे वा। महतश्च प्रयत्नस्य वधः, परेषाम् अर्थानुबन्धश्चात्मनोऽन्य इति।

अभ्यन्तरेषु प्रतिजपत्सु सामदाने प्रयुञ्जीत। स्थानमानकर्म सान्त्वम्। अनुग्रहपरिहारौ कर्मस्वायोगो वा दानम्।

पजापाङ्गीकारकारणानि धनग्रहणादीनि तानि सुखोपलभ्यानि सुबहूनि च येषां ते तथाभूताः, भवन्ति। उपजपितारः, न सुव्याजाः अचिन्त्योपजपनकारणा इत्यर्थः। प्रतिजपितुरेकैकस्य प्रशमने कृतेऽपि नवनवप्रतिजपितृप्रादुर्भावे प्रशमयितव्यापरिसमाप्तिः प्रसज्येतेत्याशङ्कायामाह — तेष्वित्यादि। प्रतिजपितृषु केषुचित् कृतसमाधानेषु उपजपितारोऽन्यानुपजपितुमुपजापोद्वेदभयादपारयन्तः स्वयमेव शाम्येयुरित्यभिप्रायः। अशक्यश्च कर्तुमुपजापो बाह्यैराभ्यन्तराणाम्, आभ्यन्तरैश्च बाह्यानामसामानाधिकरण्यादित्यभिप्रायवानाह — **कृच्छ्रोपजापा** हीत्यादि। यद्युपजप्यमानैरन्यैरुपजापो नाभ्युपगम्येत नीयेत चोद्वेदं, तर्हि उपजपितुरुपजपनविषयोऽतिमहान् यत्नो निष्फलः स्यात्, उपजाप्यानां स्वामिप्रसादरूपार्थानुवृत्तिः सिध्येद्, आत्मनः स्वामिप्रकोपानर्थश्चोत्पद्येतेत्याह — **महतश्चेत्यादि**। वधो घातः नैष्फल्यम्। आत्मनः स्वस्य उपजपितुः। अन्यः अर्थानुबन्धादितरः अनर्थानुबन्ध इत्यर्थः। इदमादर्शविशेषावेक्षितपाठानुरोधि व्याख्यानम्। माधवस्तु 'महतश्च प्रयत्नस्य वधः परेषामर्थानुबन्धश्चात्मनः' इति पाठमाश्रित्यान्यथा व्याचष्टे। तद्यथा — 'यदि बाह्याभ्यन्तराणामन्योन्यस्योपजापो दुष्करस्तर्हि त्याज्य एवायमित्यत्राह — **महतश्चेत्यादि**। उपजापेन परोत्साहवधः स्वोत्साहफलातिशयश्च स्यादिति भावः' इति।

प्रतिजपितृप्रशमनोपायान् — **अभ्यन्तरेष्वित्यादि**। मन्त्र्यादिषु, प्रतिजपत्सु बाह्यकृतोपजापानुष्ठानाभ्युपगन्तृषु, सामदाने, प्रयुञ्जीत प्रयुज्य तान् प्रशमयेत्। तत्र साम्नः प्रकारमाह — **स्थानमानकर्म सान्त्वमिति**। विशिष्टाधिकारयोजनलक्षणं स्थानकर्म छत्रचामरादिप्रतिपादनलक्षणं मानकर्म च सान्त्वापरपर्यायं सामेत्यर्थः। दानस्याह — **अनुग्रहपरिहारावित्यादि**। अनुग्रहो धनदानं परिहारः आदेयाग्रहणं करमोक्षणं वा तौ, कर्मसु आयोगो वा विशिष्टेषु कर्मसु समग्रफलग्रहणाभ्यनुज्ञा वा, दानम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बाह्येषु प्रतिजपत्सु भेददण्डौ प्रयुञ्जीत । सत्रिणो मित्रव्यञ्जना वा बाह्यानां चारमेषां ब्रूयुः 'अयं वो राजा दूष्यव्यञ्जनैरतिसन्धातुकामो, बुध्यध्वम्' इति । दूष्येषु वा दूष्यव्यञ्जनाः प्रणिहिता दूष्यान् बाह्यैर्भेदयेयुः, बाह्यान् वा दूष्यैः । दूष्यानुप्रविष्टा वा तीक्ष्णाः शस्त्ररसाभ्यां हन्युः । आहूय वा बाह्यान् घातयेयुरिति ।

यत्र बाह्या बाह्यानुपजपन्ति, अभ्यन्तरान् अभ्यन्तरा वा, तत्रै-

---

अभ्यन्तरप्रतिजपितृविषयं प्रशमोपायमुक्त्वा बाह्यविषयमाह— **बाह्येष्विति** । राष्ट्रमुख्याटविकादिषु, प्रतिजपत्सु, भेददण्डौ प्रयुञ्जीत भेददण्डयोः प्रयोगेण तान् प्रशमयेदित्यर्थः । तत्र भेदप्रयोगप्रकारमाह — **सत्रिण** इति । ते, एषां बाह्यानां प्रतिजपतां, मित्रव्यञ्जनाः मित्रभावमभिनयन्तः, चारं राज्ञः कपटप्रयोगं ब्रूयुः । कथमिति, अयं राजा दूष्यव्यञ्जनैः आत्मनः प्रियैरेवाप्रियवेषैर्मन्त्र्यादिभिराभ्यन्तरैरुजपितृभावं गमितैः, वः युष्मान्, अतिसन्धातुकामः वञ्चयितुमिच्छति । बुध्यध्वम् इदं रहस्यं ज्ञात्वा प्रतिजपितृकर्मणि मा प्रवर्तध्वमित्यर्थः । इति । मित्रव्यञ्जनत्वस्वीकारेण भेदनमुक्त्वा दूष्यव्यञ्जनत्वस्वीकारेण भेदनमाह — **दूष्येषु वेति** । राजाप्रियेषु अभ्यन्तरेषु मन्त्र्यादिषु राष्ट्रमुख्यादिषु बाह्येषु वा प्रतिजपत्सु विषये, दूष्यव्यञ्जनाः प्रणिहिताः राजाप्रियवेषतया प्रयुक्ता गूढपुरुषाः, दूष्यान् अर्थात् प्रतिजपतोऽभ्यन्तरान्, बाह्यैर्भेदयेयुः बाह्यैरुपजपितृभिरेव करणभूतैर्भेदयेयुः 'य एते व उपजपितारस्ते राजप्रणिहिता' इति छलोक्त्या तान् प्रतिजपितृकर्मानुष्ठानान्निवर्तयेयुरित्यर्थः । **बाह्यान् वा दूष्यैरिति** । दूष्यैराभ्यन्तरैरुपजपितृभिः करणभूतैर्बाह्यान् प्रतिजपितॄन् भेदयेत्, पूर्ववच्छलोक्त्या तान् प्रतिजपितृकर्मानुष्ठानान्निवर्तयेदित्यर्थः । दण्डप्रयोगप्रकारमाह — **दूष्यानिति** । तान्, अनुप्रविष्टा वा कार्यव्याजेन तैः सह संभूय वा, तीक्ष्णाः, शस्त्ररसाभ्यां हन्युः । **आहूय वेति** । 'भवदनुष्ठेयप्रतिजापकर्मानुगुणमाचरिष्यामि' इति वचनेन विश्वास्य वा, बाह्यान् प्रतिजपितॄन्, घातयेयुः । इति ।

इत्थमुभययोगवत्योराद्ययोरापदोः प्रतिक्रियामुक्त्वा एकयोगवत्योरनन्तरयोराह— **यत्रेत्यादि** । या बाह्योत्पत्तिर्बाह्यप्रतिजापा, या चाभ्यन्तरोत्पत्तिराभ्यन्तरप्रतिजापा, तयोरुभयोरपि उपजपितृसमाहितिः प्रशस्तेत्यर्थः । तत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कान्तयोग उपजपितुः सिद्धिर्विशेषवती । दोषशुद्धौ हि दूष्या न विद्यन्ते । दूष्यशुद्धौ हि दोषः पुनरन्यान् दूषयति ।

तस्माद् बाह्येषूपजपत्सु भेददण्डौ प्रयुञ्जीत । सत्रिणो मित्रव्यञ्जना वा ब्रूयुः—'अयं वो राजा स्वयमादातुकामः, विगृहीताः स्थानेन राज्ञा, बुध्यध्वम्' इति । प्रतिजपितुर्वाततो दूतदण्डाननुप्रविष्टास्तीक्ष्णाः शस्त्ररसादिभिरेषां छिद्रेषु प्रहरेयुः । ततः सत्रिणः प्रतिजापितारमभिशंसेयुः ।

अभ्यन्तरानभ्यन्तरेषूपजपत्सु यथार्हमुपायं प्रयुञ्जीत । तुष्टालिङ्गमतुष्टं विपरीतं वा साम प्रयुञ्जीत ।

हतुमाह — दोषशुद्धौ हीति । दोष उपजापः तस्योपजपितृदमनेन प्रतिषेधसिद्धौ, दूष्या न विद्यन्ते नैव स्युः, उपजापेन हि दूष्याणामभिनिर्वृत्तिः सा कथमुपजापाभावे स्यादिति भावः । दूष्यशुद्धौ हीति । दूष्या उपजापदूषितबुद्धयः प्रतिजपितारः तेषां शुद्धौ समाधाने तु कृते, दोषः उपजापः, पुनः भूयः, अन्यान् दूषयति, उपजपितारोऽप्रशान्तत्वान्नवनवान् दूष्यान् उपजापकरणेनाभिनिर्वर्तयेयुरिति भावः ।

तस्मादिति । उपजपितुरेव शोध्यत्वाद्, बाह्येषु उपजपत्सु, भेददण्डौ प्रयुञ्जीत भेदं दण्डं च प्रयुज्योपजापं प्रतिकुर्यात् । भेदप्रकारमाह—सत्रिणो मित्रव्यञ्जना वेति । ते, ब्रूयुः अर्थादुपजपितॄन् । किमिति, अयं राजा, वः युष्मान्, स्वयम् आदातुकामः प्रतिजपितृद्वारेण ग्रहीतुमिच्छति । अनेन राज्ञा, विगृहीताः, स्थ भवथ । बुध्यध्वं जागृत, न कश्चिदपि विश्वस्योपजपतेत्यर्थः । इति । दण्डप्रकारमाह — प्रतिजपितुर्वेति । प्रतिजापकसकाशाद् वा, अततः उपजपितारमुद्दिश्य संभाषार्थं गच्छतः, अथवा प्रतिजपितुरिति षष्ठ्यन्तं बोध्यम् । तत इति तु अव्ययं यत्रोपजपिता तत्रेत्यर्थः, प्रोस्थतानिति च शेषः । दूतदण्डान् दूतान् दण्डांश्च, अनुप्रविष्टाः, भूत्वेति शेषः, तीक्ष्णाः, शस्त्ररसादिभिः, एषाम् उपजपितॄणां, छिद्रेषु प्रहरेयुः प्रमादस्थानान्युपलभ्य तान् हन्युरित्यर्थः । तत इति । उपजपितृवधानन्तरं, सत्रिणः, प्रतिजपितारम्, अभिशंसेयुः 'उपजपितृवधकारयितायमि'ति मिथ्या ख्यापयेयुः उपजिजपिषोः प्रतिजापकेष्वविश्वासार्थमित्यभिप्रायः ।

इत्थं बाह्येषूपजपत्सु भेददण्डयोः प्रयोगमुक्त्वा अभ्यन्तरेषूपजपत्सु सामादीनुपायान् यथायोग्यं प्रयुञ्जीतेत्याह — अभ्यन्तरानित्यादि । कथ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शौचसामर्थ्यापदेशेन व्यसनाभ्युदयापेक्षणेन वा प्रतिपूजनमिति दानम्।

मित्रव्यञ्जनो वा ब्रूयादेतान् — चित्तज्ञानार्थमुपधास्यति वो राजा, तदस्याख्यातव्यम् इति। परस्पराद् वा भेदयेदेनान् — असौ चासौ च वो राजन्येवमुपजपति। इति भेदः।

दाण्डकर्मिकवच्च दण्डः।

एतासां चतसृणामापदामभ्यन्तरामेव पूर्वं साधयेत्। 'अहिभयादभ्यन्तरकोपो बाह्यकोपात् पापीयान्' इत्युक्तं पुरस्तात्॥

पूर्वां पूर्वां विजानीयाल्लघ्वीमापदमापदाम्।
उत्थितां बलवद्भ्यो वा गुर्वीं लघ्वीं विपर्यये॥

इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे
पञ्चमोऽध्यायः बाह्याभ्यन्तराश्चापदः,
आदितः षड्विंशतिशततमः॥

म्भूतं साम प्रयोक्तव्यमित्याह—**तुष्टलिङ्गमित्यादि**। तुष्टिसूचकं वस्तुतोऽतुष्टं साम वा, तद्विपरीतम् अतुष्टिसूचकं वस्तुतस्तुष्टं साम वा प्रयुञ्जीतेत्यर्थः।

दानप्रकारमाह — **शौचेत्यादि**। शौचं सामर्थ्यं च निमित्तीकृत्य वा बन्धुवियोगादिव्यसनावसरं पुत्रजन्माद्यभ्युदयावसरं वापेक्ष्य वस्त्राभरणादिना यत् सत्करणं तज्जातीयं दानं प्रयुञ्जीतेत्यर्थः।

भेदप्रकारमाह — **मित्रव्यञ्जनो वेति**। तथाभूतो वा सत्री, एतान् अभ्यन्तरानुपजपितॄन्, ब्रूयात्, कथमिति, 'चित्तज्ञानार्थं राजा वः युष्मान् उपधास्यति अर्थाद्युपधया परीक्षिष्यते, तत् स्वचित्तम्, अस्य राज्ञः आख्यातव्यम्' इति। एवं ह्युच्यमानाः प्रतिजापकाः उपजापं भयान्नाभ्युपगच्छेयुरित्याशयः। प्रकारान्तरमाह — **परस्पराद् वेति**। मिथो वा, भेदयेत्, एनान् अभ्यन्तरान्, कथमुक्त्वा, असौ च, असौ च, राजनि राज्ञः सकाशे, एवम् अनेन प्रकारेण, वः उपजपति युष्मान् प्रति दोषं बोधयति। इति। इति भेदः एवम्प्रकारो भेदः प्रयोक्तव्य इत्यर्थः।

दण्डप्रकारमाह — **दाण्डकर्मिकवच्च दण्ड इति**। दाण्डकर्मिकोक्त उपांशुदण्ड इह प्रयोक्तव्य इत्यर्थः।

इत्थं निरूपितप्रकारासु चतसृष्वापत्सु अभ्यन्तरा कृच्छ्रप्रतिकार्यत्वादनर्थातिशयहेतुत्वाच्च प्रथमं प्रतिकर्तव्येत्याह — **एतासां चतसृणामित्यादि**॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वामिति । आपदां 'बाह्योत्पत्तिरभ्यन्तरप्रतिजापा' इत्यादिनोक्तानां चतसृणां मध्ये, पूर्वां पूर्वां, लघ्वीम् उत्तरोत्तरापेक्षया, विजानीयात्, अर्थाच्च पूर्वपूर्वापेक्षयोत्तरोत्तरां गुर्वीम् । अयमुत्सर्गः । अस्यापवादमाह — **उत्थिता-मित्यादि** । पूर्वा वा भवत्तरा वा या बलवद्भ्य उपजपितृभ्य उत्पन्ना तां पूर्वामपि दुर्बलोपजपितृकोत्तरापेक्षया गुर्वीं विजानीयात्, दुर्बलेभ्यश्चोपजपितृभ्य उत्पन्नामुत्तरामपि प्रबलोपजपितृकपूर्वापेक्षया लघ्वीं विजानीयादित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अभियास्यत्कर्मणि नवमेऽधिकरणे
पञ्चमोऽध्यायः बाह्याभ्यन्तराश्चापदः,
आदितः षड्विंशत्यधिकशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४४. प्रक. दूष्यशत्रुसंयुक्ताः।

दूष्येभ्यः शत्रुभ्यश्च द्विविधाः शुद्धाः।

दूष्यशुद्धायां पौरेषु जानपदेषु वा दण्डवर्जानुपायान् प्रयुञ्जीत। दण्डो हि महाजने क्षेप्तुमशक्यः, क्षिप्तो वा तं चार्थं न कुर्यात्। अन्यं चानर्थमुत्पादयेत्। मुख्येषु त्वेषां दाण्डकार्मिकवच्चेष्टेतेति।

शत्रुशुद्धायां यतः शत्रुः प्रधानः कार्यो वा, ततः सामादिभिः सिद्धिं लिप्सेत।

दूष्यशत्रुसंयुक्ता इति सूत्रम्। पूर्वसूत्रमिहानुवर्तते। दूष्याः राजावग्रहचारिणो मुख्याः शत्रवः सहजकृत्रिमादयः तत्संयुक्तास्तत्संबद्धास्तदुत्पन्नाः बाह्याभ्यन्तरा आपदस्तत्प्रतीकारश्चाभिधीयन्ते इति सूत्रार्थः।

तासां शुद्धमिश्रभेदं मनसि निधाय शुद्धा विभजते — **दूष्येभ्य** इत्यादि। दूष्येभ्य एव केवलेभ्य उत्थिताः शत्रुभ्य एव केवलेभ्य उत्थिता इति द्विप्रकाराः शुद्धा इत्यर्थः।

दूष्यशुद्धायाः प्रतीकारमाह — **दूष्यशुद्धायामिति**। तस्यां विषये, पौरेषु, जानपदेषु वा, दण्डवर्जान् उपायान् सामदानभेदान्, प्रयुञ्जीत। दण्डस्य वर्जने हेतुमाह — **दण्डो हीत्यादि**। स हि महाजने पौरजानपदसमूहलक्षणे प्रयोक्तुं न शक्यस्तद्विरोधोत्पादकत्वात्, प्रयुक्तो वा साध्यमर्थं न साधयेद् अनर्थं च नवमुत्थापयेदित्यर्थः। सामादिभिरशान्तौ किं कर्तव्यं तत्राह — **मुख्येषु त्वेषामित्यादि**। ये पौरजानपदानामुपजपितारो मुख्याः, तेषु दाण्डकार्मिकोक्तं विधिमुपांशुदण्डप्रयोगलक्षणमाचरेत्। तावतैव ते शाम्येयुरित्यभिप्रायः।

शत्रुशुद्धायां प्रतीकारमाह — **शत्रुशुद्धायामिति**। शत्रुमात्रोत्पादितायां मित्रसङ्घररहितायामापदि अर्थात् स्वयमेव शत्रुणा साक्षादुत्पादितायां तन्मन्त्र्युत्पादितायां तदमात्योत्पादितायां तन्मन्त्रितदमात्योभयोत्पादितायां चेति चतुष्प्रकारायां, यतः शत्रुः यस्मिन्नधीनः सामन्तः, यतः प्रधानः यस्मिन्नधीनो मन्त्री, यतः कार्यो वा अमात्यादिर्वा यस्मिन्नधीनः, ततः सामादिभिः सिद्धिं लिप्सेत तान् सामदानादिभिरभिमुखीकृत्य चतुर्षु पूर्वोक्तापत्प्रकारेषु यथाक्रमं प्रतीकारमन्विच्छेदित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वामिन्यायत्ता प्रधानासिद्धिः, मन्त्रिष्वायत्तायत्तसिद्धिः, उभयायत्ता प्रधानायत्तसिद्धिः ।

दूष्यादूष्याणामामिश्रितत्वादामिश्रा । आमिश्रायामदूष्यतः सिद्धिः । आलम्बनाभावे ह्यालम्बिता न विद्यते । मित्रामित्राणामेकीभावात् परमिश्रा । परमिश्रायां मित्रतः सिद्धिः । सुकरो हि मित्रेण सन्धिर्नामित्रेणेति ।

मित्रं चेन्न सन्धिमिच्छेत्, अभीक्ष्णमुपजपेत्, ततः सात्रिभिरमित्राद् भेदयित्वा मित्रं लभेत । मित्रामित्रसङ्घस्य वा योऽन्तस्थायी तं लभेत । अन्तस्थायिनि लब्धे मध्यस्थायिनो भिद्यन्ते । मध्यस्था-

---

कस्मिन्नधीनः प्रधानः कस्मिन्नधीनः कार्य इति विवरीतुमाह — **स्वामिन्यायत्तेत्यादि** । प्रधानसिद्धिः प्रधानप्रतिक्रिया । आयत्तसिद्धिः कार्यशब्दितस्यामात्यस्य प्रतिक्रिया । उभयायत्ता स्वामिमन्त्र्युभयमुखसाध्या । प्रधानायत्तसिद्धिः प्रधानायत्तयोः संहत्यापदुत्पादकयोर्मन्त्र्यमात्ययोः प्रतिक्रिया । ननु स्वयमेव साक्षादापदुत्पादकः शत्रुर्यस्मिन्नधीनः स कस्मान्नोक्तः । उच्यते । स हि शत्रोर्मित्रं वा मित्रमित्रं वा मध्यमादिर्वा स्यादित्यनियत आपदनुत्पादकश्च; नियतस्त्विह वक्तुं प्रक्रान्त आपदुत्पादकश्चेत्यदोषः ।

आमिश्रामाह — **दूष्यादूष्याणामामिश्रितत्वादिति** । दूष्यादूष्यैरुभयैर्मिलित्वा जनितत्वाद्, आमिश्रा तदाख्या दूष्यशुद्धा । **आमिश्रायामिति** । तस्याम्, अदूष्यतः, सिद्धिः प्रतिक्रिया कार्या । प्रतिक्रियया ह्यदूष्ये दूष्यालम्बनभूते शान्ते तमालम्ब्य चेष्टमानो दूष्यः स्वयमेव शाम्यतीत्याह — **आलम्बनाभाव इत्यादि** । मिश्रान्तरमाह — **मित्रामित्राणामिति** । मित्राणाममित्राणां च, एकीभावात् मिश्रणात्, जनितेति शेषः, परमिश्रा शत्रुमिश्रा नाम । **परमिश्रायामिति** । तस्यां, मित्रतः, सिद्धिः प्रतिक्रिया । तत्र हेतुमाह — **सुकरो हीत्यादि** ।

सन्धिमनभिलषति मित्रे तत् पुनःपुनरुपजप्य ततः सात्रिभिरमित्राद् भेदयित्वा स्ववशे कुर्यादित्याह — **मित्रं चेदित्यादि** । भूम्येकान्तरत्वभूम्यनन्तरत्वक्रमेण सन्निविष्टस्य मित्रामित्राणां सङ्घस्यावसाने यस्तिष्ठति तं लभेतेत्याह — **मित्रामित्रसङ्घस्य वेत्यादि** । अन्तस्थायिनि लब्धे मध्यस्थायिनः सर्वे भिन्ना भवन्तीत्याह — **अन्तस्थायिनीत्यादि** । यः सङ्घस्य मध्ये तिष्ठति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यिनं वा लभेत । मध्यस्थायिनि वा लब्धे नान्तस्थायिनः संहन्यन्ते । यथा चैषामाश्रयभेदः तानुपायान् प्रयुञ्जीत ।

धार्मिकं जातिकुलश्रुतवृत्तस्तवेन सम्बन्धेन पूर्वेषां त्रैकाल्योपकारानपकाराभ्यां वा सान्त्वयेत् ।

निवृत्तोत्साहं विग्रहश्रान्तं प्रतिहतोपायं क्षयव्ययाभ्यां प्रवासेन चोपतप्तं शौचेनान्यं लिप्समानमन्यस्माद् वा शङ्कमानं मैत्रीप्रधानं वा कल्याणबुद्धिं साम्ना साधयेत् ।

लुब्धं क्षीणं वा तपस्विमुख्यावस्थापनापूर्वं दानेन साधयेत् ।

तत् पञ्चविधं देयविसर्गो, गृहीतानुवर्तनम्, आत्तप्रतिदानं,

तं वा लभेत, तेन चान्तस्थायिनः सर्वे भिन्ना भवन्तीत्याह — **मध्यस्थायिनं** वेत्यादि । न संहन्यन्ते परस्परस्माद् भिद्यन्ते । सर्वथा च मित्रामित्रा यैरुपायप्रकारैराश्रयाद् भिन्ना भवेयुस्तानुपायप्रकारान् प्रयुञ्जीतेत्याह — **यथा चैषा**मित्यादि ।

धार्मिकविषयं साम्नः प्रकारमाह — **धार्मिकमित्यादि** । तं, जातिकुलश्रुतवृत्तस्तवेन जातेरसङ्करविशुद्धत्वादिना कुलस्योदितोदिततत्वादिना श्रुतस्य नानाशास्त्रविषयत्वादिना वृत्तस्य विहितानुष्ठाननिष्ठत्वादिना च यः स्तवः तेन, संबन्धेन योनिविद्यादिनिमित्तेन, पूर्वेषां कुलवृद्धानां, त्रैकाल्योपकारानपकाराभ्यां कालत्रयेऽप्युपकर्तृत्वानपकर्तृत्वाभ्यां वा सान्त्वयेत् ।

सामसाध्यमाह — **निवृत्तोत्साहमिति** । निरुत्साहं, विग्रहश्रान्तं चिरयुद्धकरणखिन्नं, प्रतिहतोपायं विफलितसामाद्युपायप्रयोगं, क्षयव्ययाभ्यां युग्यपुरुषापचयहिरण्यधान्याद्यपचयाभ्यां, प्रवासेन च दूराध्वगतागतेन च, उपतप्तं सन्तप्तं, शौचेनान्यं लिप्समानं शुचित्वगुणापेक्षया क्रमप्यन्यं मित्रत्वेन लब्धुमिच्छन्तम्, अन्यस्माद् वा शङ्कमानं पराविश्वासिनं वा, मैत्रीप्रधानं वा सर्वत्र मित्रभावेन व्यवहार एव परम इति मन्यमानं, कल्याणबुद्धिम् अशठं, साम्ना साधयेत् ।

दानसाध्यमाह — **लुब्धमिति** । गृध्नुं, क्षीणं वा अर्थकृशं वा, तपस्विमुख्यावस्थापनापूर्वं तपस्विनां मुख्यानां च अवस्थापना दानविश्वासार्थं स्थेयीकरणं तत्पूर्वकं, दानेन, साधयेत् ।

दानस्य पञ्च प्रकारानाह — **तत् पञ्चविधमित्यादि** । देयविसर्गः गृहीतभूमौ ब्रह्मदेयादेर्यथापूर्वविमोक्षणम् । गृहीतानुवर्तनं गृहीतस्य पूर्वपुरुषैः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वद्रव्यदानम् अपूर्वं, परस्वेषु स्वयंग्राहदानं चेति दानकर्म ।

परस्परद्वेषवैरभूमिहरणशङ्कितम् अतोऽन्यतमेन भेदयेत् । भीरुं वा प्रतिघातेन, 'कृतसन्धिरेष त्वयि कर्म करिष्यति, मित्रमस्य निसृष्टं; सन्धौ वा नाभ्यन्तर' इति ।

यस्य वा स्वदेशाद् अन्यदेशाद् वा पण्यानि पण्यागारतयागच्छेयुः, तान्यस्य 'यातव्याल्लब्धानि' इति सत्रिणश्चारयेयुः । बहुलीभूते शासनमभिव्यक्तेन प्रेषयेत् —'एतत् ते पण्यं, पण्यागारं वा मया ते प्रेषितं, सामवायिकेषु विक्रमस्व, अपगच्छ वा, ततः पणशेषमवाप्स्यसि' इति । ततः सत्रिणः परेषु ग्राहयेयुरेतद् अरिप्रदत्तम् इति ।

पूर्वमात्तस्य भूम्यादेर्भोगाप्रतिषेधः । आत्तप्रतिदानं गृहीतस्य भूम्यादेः प्रत्यर्पणम् । स्वद्रव्यदानमपूर्वं स्वद्रव्यस्यैवादत्तपूर्वस्य प्रतिनवं दानम् । परस्वेषु स्वयंग्राहदानं 'शत्रुदेशावस्कन्दने तदीयद्रव्येषु त्वया ह्रियमाणं द्रव्यं तवैव भविष्यती'त्येवं रूपं दानम् ।

भेदनमेवाह — **परस्परद्वेषवैरभूमिहरणशङ्कितमित्यादि** । तत्कालापकारजो द्वेषः चिरानुवृत्तापकारप्ररूढं वैरं मित्रामित्राणां मध्ये परस्परद्वेषशङ्काविषयभूतं परस्परवैरशङ्काविषयभूतं परस्परभूमिहरणशङ्काविषयभूतं च, अतोऽन्यतमेन एषां द्वेषादीनामेकतमेन, भेदयेत् । भेदनस्य प्रकारान्तराण्याह— **भीरुं वेति** । तं, प्रतिघातेन शत्रुबलीयस्तया त्वदभियोगः प्रतिहतो भविष्यतीति प्रतिघातबिभीषिकया, भेदयेत् । कृतसन्धिः विजिगीषुणा कृतसन्धानः, एषः, त्वयि, कर्म अभियोगं, करिष्यति । करिष्यतीति कथं ज्ञायते, तत्राह— **मित्रमिति** । मित्रमस्य, निसृष्टं सन्धिकरणार्थं विजिगीषुसकाशे प्रेषितम् । इत्युक्त्वा भेदयेत् । सन्धौ मित्रामित्रैः क्रियमाणे इति शेषः, त्वं, नाभ्यन्तरः बहिष्कृत इत्यर्थः, इत्युक्त्वा वा भेदयेत् ।

प्रकारान्तरमाह — **यस्य वेत्यादि** । मित्रामित्राणामन्यतमस्य यस्य, स्वदेशाद्, अन्यदेशाद् वा, पण्यानि, पण्यागारतया पण्यागाराङ्गतया, आगच्छेयुः, तानि अस्य, यातव्यात् लब्धानि यातव्येनैव गूढकृतसन्धिना प्रहितानि, इति अनेन प्रकारेण, सत्रिणः, चारयेयुः मृषा वृत्तान्तं प्रवर्तयेयुः । बहुलीभूते मिथ्यावृत्तान्तेऽस्मिन् सर्वतः प्रसृते सति, शासनं मिथ्यालेखम्, अभिव्यक्तेन निश्चितवध्यभावोऽभिव्यक्तः तस्य हस्ते दत्त्वेत्यर्थः, प्रेषयेत् । कीदृगर्थकं शासनमित्याह — **एतदिति** । एतत् ते पण्यं यत्किञ्चिदल्पं मया प्रेषितं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शत्रुप्रख्यातं वा पण्यमविज्ञातं विजिगीषुं गच्छेत् । तदस्य वैदेहकव्यञ्जनाः शत्रुमुख्येषु विक्रीणीरन् । ततः सत्रिणः परेषु ग्राहयेयुः—'एतत् पण्यमरिप्रदत्तम्' इति ।

महापराधानर्थमानाभ्यामुपगृह्य वा शस्त्ररसाग्निभिरमित्रे प्रणिदध्यात् । अथैकममात्यं निष्पातयेत् । तस्य पुत्रदारमुपगृह्य रात्रौ हतमिति ख्यापयेत् । अथामात्यः शत्रोस्तानेकैकशः प्ररूपयेत् । ते चेद्

पण्यागारं वा प्रभूतपण्यवर्गवत्तया पण्यगृहसदृशं पण्यशकटादि वा मया ते प्रेषितं, सामवायिकेषु सम्भूयोत्थायिषु मच्छत्रुसाह्यकारिषु, विक्रमस्व अभियुङ्क्ष्व, अथवा, अपगच्छ तेभ्योऽपसर, अर्थान्मदुपकारार्थं, ततः विक्रमणापसरणान्यतरानुष्ठानानन्तरं, पणशेषं पणितार्थावशिष्टमर्थम्, अवाप्स्यसि मत्सकाशादधिगमिष्यसि । इति एवम्प्रकारार्थकमित्यर्थः । तत इति । प्रेषणानन्तरं, सत्रिणः, परेषु अन्येषु सामवायिकेषु, एतत् कूटशासनम्, अरिप्रदत्तमिति विजिगीषुणा प्रतिपादितमिति, अपदिश्येति शेषः, ग्राहयेयुः ।

प्रकारान्तरमाह — शत्रुप्रख्यातं वेति । शत्रुरिह सामवायिकान्यतमः तत्सम्बन्धित्वेन प्रख्यातं, पण्यं रत्नादि, अविज्ञातं गूढं यथा भवति तथा, विजिगीषुं गच्छेद् विजिगीषोरेव केनाप्युपायेन वशं प्राप्नुयात् । तद् अस्य, वैदेहकव्यञ्जनाः वणिग्वेषाः गूढपुरुषाः, शत्रुमुख्येषु शत्रुधर्माणो येऽन्ये सामवायिकास्तेषां मुख्येषु, विक्रीणीरन् । ततः तत्, सत्रिणः, परेषु सामवायिकान्तरेषु, ग्राहयेयुः रक्षिपुरुषैर्ग्राहितं कुर्युः । कथं कृत्वा, एतत् पण्यम् अरिप्रदत्तम् अरिणा विजिगीषुणा विक्रयार्थं प्रेषितम्, इति अनेन प्रकारेणापदिश्य । एवं कृते 'सामवायिकान्यतमो विजिगीषुणा सह कृतसन्धिरि'ति सामवायिकान्तराणां बुद्धिरुत्पद्येतेत्यभिप्रायः ।

अन्यं प्रकारमाह — महापराधानिति । महान् अपराधो यैरात्मनः कृतस्तथाभूतान् अमात्यान्, अर्थमानाभ्यां भूहिरण्यादिदानेन छत्रचामरादिदानेन च, उपगृह्य स्ववशीकृत्य, शस्त्ररसादिना अमित्रे प्रणिदध्यात् 'युष्माभिः शत्रुः शस्त्रेण विषेणाग्निना वा हन्तव्यः' इत्यादिश्य गूढं प्रेषयेत् । प्रेषणे क्रममाह—अथेति । प्रथमम्, एकम् अमात्यं, निष्पातयेत् स्वान्तिकान्निष्पात्य शत्रुपार्श्वं प्रापयेत् । तस्य पुत्रदारं पुत्रान् दारांश्च, उपगृह्य छन्नरक्षितं कृत्वा, रात्रौ, हतमिति राज्ञा व्यापादितम् इति, ख्यापयेत् मृषाप्रवादमुत्पादयेत् । एतच्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथोक्तं कुर्युः, न चैनान् ग्राहयेत् । अशक्तिमतो वा ग्राहयेत् । आत्मभावोपगतो मुख्यादस्यात्मानं रक्षणीयं कथयेत्; अथामित्रशासनम् मुख्यायोपघाताय प्रेषितमुभयवेतनो ग्राहयेत् ।

उत्साहशक्तिमतो वा प्रेषयेत्— 'अमुष्य राज्यं गृहाण यथास्थितो न सन्धिः' इति । ततः सत्रिणः परेषु ग्राहयेयुः ।

एकस्य स्कन्धावारं विवधमासारं वा घातयेयुः, इतरेषु मैत्रीं ब्रुवाणाः । तं सत्रिणः —'त्वमेतेषां घातयितव्यः' इत्युपजपेयुः ।

निष्पतितं प्रति शत्रोर्विजिगीषुद्वेषविश्वासार्थम् । अथ शत्रावात्मास्पदलाभानन्तरम्, अमात्यः पूर्वनिष्पतितः, शत्रोः, तान् अन्यानमात्यान्, एकैकशः एकैककमेण प्ररूपयेद् 'विजिगीषुद्वेषनिष्पतिता एते भवत्पार्श्वोपस्थानयोग्या' इत्येवं प्रदर्शयेत् । ते निष्पतिता अमात्याः, यथोक्तं कुर्युश्चेत् शस्त्रादिना शत्रुं हन्युश्चेत्, एनान्, न च ग्राहयेद् उभयवेतनमुखेन नैव ग्राहयेत् । अशक्तिमतो वा यथोक्तशत्रुघातासमर्थान् वा, ग्राहयेत्, महापराधतया तेषां वध्यत्वादित्यभिप्रायः । एवं विजिगीषुनिष्पतितोऽमात्यः सामवायिकमुख्यं यथा भेदयेत्, तथाह — आत्मभावोपगत इत्यादि । अयमर्थः — शत्रवात्मत्वं गतोऽमात्यः 'सामवायिकमुख्यसकाशात् त्वया स्वात्मा रक्षणीयस्तस्याविश्वास्यत्वाद्' इत्येवं शत्रुमुपजपेत् । पश्चाच्चामित्रशासनं कूटकृतम् अमुख्योपघातादेशकं मुख्याय प्रेषितम् उभयवेतनो रक्षिपुरुषैर्ग्राहयेदिति । 'अमुख्याये'ति पाठेऽपि तुल्योऽर्थः ।

प्रकारान्तरमाह — उत्साहेत्यादि । शासनमिति पूर्वतः संबध्यते । उत्साहशक्तिमतो वा विक्रमशक्तियुक्तस्य वा सामवायिकान्यतमस्य, शासनं कूटानिर्मितं, प्रेषयेत् । तत् कीदृगर्थकम्, अमुष्य सामवायिकमुख्यस्य, राज्यं गृहाण, यथास्थितो न सन्धिः स्थितप्रकारः सन्धिर्नाङ्गीकृतः । इति ईदृशार्थकमित्यर्थः । ततः पश्चात्, सत्रिणः, परेषु सामवायिकान्तरेषु, ग्राहयेयुः अर्थात् तदेव शासनम् ।

अन्यं पक्षमाह — एकस्येति । सामवायिकान्यतमस्य, स्कन्धावारं सेनानिवेशं, विवधं स्वदेशधान्याद्यागमम्, आसारं वा सुहृद्बलागमं वा, घातयेयुः वारयेयुः, अर्थात् सत्रिणः । कथम्भूताः, इतरेषु मैत्रीं ब्रुवाणाः सामवायिकान्तरेषु मित्रभावं वदन्तः अर्थात् तेभ्यो गोपनाय । तमिति । तं च सामवायिकान्यतमं, सत्रिणः, उपजपेयुः, कथमुपजपेयुः, त्वम्, एतेषां सामवायिकानां, पातयितव्यः । तत् कुत एतैस्ते सन्धिरिति भावः । इति अनेन प्रकारेण ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्य वा प्रवीरपुरुषो हस्ती हयो वा म्रियेत, गूढपुरुषैर्हन्येत ह्रियेत वा, तं सत्रिणः परस्परोपहतं ब्रूयुः। ततः शासनमभिशस्तस्य प्रेषयेत्—'भूयः कुरु ततः पणशेषमवाप्स्यसि' इति। तदुभयवेतना ग्राहयेयुः।

भिन्नेष्वन्यतमं लभेत।

तेन सेनापतिकुमारदण्डचारिणो व्याख्याताः।

साङ्घिकं च भेदं प्रयुञ्जीत। इति भेदकर्म।

तीक्ष्णमुत्साहिनं व्यसनिनं स्थितशत्रुं वा गूढपुरुषाः शस्त्राग्निरसादिभिः साधयेयुः। सौकर्यतो वा तेषामन्यतमः। तीक्ष्णो ह्येकः

प्रकारान्तरमाह—**यस्य** वेति। यस्य सामवायिकान्यतमस्य सम्बन्धी, प्रवीरपुरुषः, हस्ती हयो वा म्रियेत, स्वयमिति शेषः, गूढपुरुषैः हन्येत ह्रियेत वा, तं सामवायिकान्यतमं, सत्रिणः, परस्परोपहतं ब्रूयुः सामवायिकान्तरैरेव परस्परेण हतं बोधयेयुः, अर्थात् प्रवीरादिम्। ततः पश्चात्, शासनं कूटलेखम्, अभिशस्तस्य आरोपितहननदोषस्य सामवायिकस्य, प्रेषयेत्। शासनार्थमाह — भूयः पुनरपि, कुरु प्रवीरपुरुषादिं घातय, ततः पणशेषम् अवाप्स्यसि। इति अनेन प्रकारेण लिखितार्थमित्यर्थः। **तदिति**। तच्च शासनम्, उभयवेतनाः विजिगीषोरभिशस्तसामवायिकाच्चोभयतो भृतिग्राहिणः, ग्राहयेयुः अर्थाद् गूढपुरुषैः।

भिन्नेष्वन्यतमं लभेतेति। उक्तैर्भेदनोपायैर्भेदं प्राप्तेषु सामवायिकेषु एकतमं स्वायत्तं कुर्याद् विजिगीषुः।

यदिदमुपदिष्टं भेदनोपायजातं, तत् सेनापतियुवराजसैन्यचारिणां भेदनेऽपि यथायोगम् उपयोक्तव्यमित्याशयेनाह — **तेनेत्यादि**।

सङ्घवृत्ताधिकरणे वक्ष्यमाणो भेदप्रकारोऽप्यत्र प्रयोक्तव्य इत्याह — **साङ्घिकं चेत्यादि**। **इति भेदकर्मेति**। व्याख्यातमिति शेषः।

अथ दण्डविधिप्रकारं तत्प्रयोगविषयं चाह— **तीक्ष्णमित्यादि**। तीक्ष्णम् अतिमात्रामर्षम्, उत्साहिनं विक्रमिणं, व्यसनिनं मृगयादिप्रसक्तं, स्थितशत्रुं वा दुर्गवन्तं शत्रुं वा, गूढपुरुषाः, शस्त्राग्निरसादिभिः, साधयेयुः हन्युः, अर्थात् सम्भूय। तेष्वन्यतमेन येन शक्ततरतया घातः सुकरः, स वा तान् हन्यादित्याह — **सौकर्यतो वेत्यादि**। तमेवान्यतमं विवृणोति —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शस्त्ररसाग्निभिः साधयेत् । अयं सर्वसन्दोहकर्म विशिष्टं वा करोति । इत्युपायचतुर्वर्गः ।

पूर्वः पूर्वश्चास्य लघिष्ठः । सान्त्वमेकगुणम् । दानं द्विगुणं सान्त्वपूर्वम् । भेदस्त्रिगुणः सान्त्वदानपूर्वः । दण्डश्चतुर्गुणः सान्त्वदानभेदपूर्वः ।

इत्यभियुञ्जानेषूक्तम् । स्वभूमिष्ठेषु तु त एवोपायाः । विशेषस्तु । स्वभूमिष्ठानामन्यतमस्य पण्यागारैरभिज्ञातान् दूतमुख्यानभीक्ष्णं प्रेषयेत्, त एनं सन्धौ परहिंसायां वा योजयेयुः, अप्रतिपद्यमानं

तीक्ष्णो हीति । स हि गूढपुरुषविशेषरूपः, एकः असहायः सन्, शस्त्ररसाग्निभिः, साधयेत् अमर्षिविक्रमिप्रभृतीन् हन्यात् । न केवलं सर्वविधगूढपुरुषसमुदायसाध्यं कर्मायमेकाकी करोति, किन्तु तदपेक्षयोत्कृष्टमपि कर्म करोतीत्याह—अयमित्यादि । इत्युपायचतुर्वर्ग इति । उपायसंबन्धी चतुर्वर्गः सामदानभेददण्डचतुष्टयात्मा, निरूपित इति शेषः ।

पूर्व इति । अस्य उपायवर्गस्य मध्ये, पूर्वः पूर्व उपायः, लघिष्ठः उत्तरोत्तरापेक्षयाल्पावयवत्वादनायासप्रयोज्यः । अल्पावयवतां विवृणोति—सान्त्वमिति । साम, एकगुणम् एक आत्मैवैको गुणोऽवयवो यस्य तत् तथाभूतम् । दानं हि, द्विगुणं सान्त्वपूर्वं सान्त्वदानोभयावयवकम् । भेदः, त्रिगुणः सान्त्वदानपूर्वः सान्त्वदानभेदत्रितयावयवकः । दण्डः, चतुर्गुणः सान्त्वदानभेदपूर्वः सान्त्वदानभेददण्डाख्यचतुर्गुणोपेतः ।

इत्यभियुञ्जानेषूक्तमिति । ये मित्रामित्राः यातव्यमभियोक्तुं प्रस्थिताः कृताशिविराः, तेषु विषये सामादिविधानमनेन प्रकारेणोक्तमित्यर्थः । तेष्वप्रस्थितेषु स्वस्वभूमिस्थितेष्वपि त इमे उपायप्रयोगाः समाना इत्याह—स्वभूमिष्ठेषु त्वित्यादि । तुश्चार्थे । विशेषास्त्विति । तत्र विशेषस्तु अभिधीयत इति शेषः । स्वभूमिष्ठानामिति । सम्भूयप्रस्थानात् प्राक् स्वस्वभूमिस्थितानां मित्रामित्राणाम्, अन्यतमस्य, पण्यागारैः प्रभूतैः मणिमुक्तादिभिः पण्यैः सहितानिति शेषः, अभिज्ञातान् परविदितान्, दूतमुख्यान्, अभीक्ष्णं पुनः-पुनः, प्रेषयेत् विजिगीषुः । ते प्रेषिताश्च दूताः, एनं मित्रामित्रान्यतमं, सन्धौ परहिंसायां वा योजयेयुः 'विजिगीषुणा सन्धत्स्व तद्विरोधिषु च विक्रमस्व' इति चोदयेयुरित्यर्थः । अप्रतिपद्यमानमिति । सन्धिमनभ्युपगच्छन्तमेव तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानं कृतो नः सन्धिः इत्यावेदयेयुः । तमितरेषामुभयवेतनाः सङ्क्रामयेयुः—अयं वो राजा दुष्टः इति ।

यस्य वा यस्माद् भयं वैरं द्वेषो वा, तं तस्माद् भेदयेयुः—'अयं ते शत्रुणा सन्धत्ते, पुरा त्वामतिसन्धत्ते, क्षिप्रतरं सन्धीयस्व, निग्रहे चास्य प्रयतस्व' । इति ।

आवाहविवाहाभ्यां वा कृत्वा संयोगमसंयुक्तान् भेदयेत् ।

सामन्ताटविकतत्कुलीनावरुद्धैश्चैषां राज्यं निघातयेत् । सार्थव्रजाटवीर्वा । दण्डं वाभिसृतम् । परस्परापाश्रयाश्चैषां जातिसङ्घाश्छिद्रेषु प्रहरेयुः । गूढाश्चाग्निरसशस्त्रेण ॥

मित्रामित्रान्यतमं, 'कृतो नः सन्धिरि'ति, आवेदयेयुः मिथ्या वदेयुः । तमिति । तं विजिगीषुणा सह कृतसन्धित्वेन मिथ्याप्रख्यायमानं मित्रामित्राद्यन्यतमम्, अथवा मिथ्याकथ्यमानं सन्धिम्, इतरेषां तदन्येषां मित्रामित्राणाम्, उभयवेतनाः विजिगीषुसकाशात् मित्रामित्रान्यतमसकाशाच्चोभयतो वेतनग्राहिणः, संक्रामयेयुः बोधयेयुः । कथम्, अयं वो राजा दुष्ट इति युष्माकमन्योन्यसन्धेयानामन्यतमोऽयं नृपतिः, दुष्टः स्वयं विजिगीषुणा सन्धिं कृत्वा प्रच्छादनाद् दुर्जनः, इति अनेन प्रकारेण वदन्त इति शेषः । एवं बोधिता मित्रामित्राः स्वान्यतमात् तस्माद् भिद्येरन्नित्यभिप्रायः ।

अन्यं प्रकारमाह—**यस्य वेति** । यस्य यस्माद् भयं वैरं द्वेषो वा, यस्मिन्नित्यर्थः, तं भयवैरद्वेषान्यतमवन्तं, तस्माद् भयवैरद्वेषगोचराद्, भेदयेयुः, अर्थाद् गूढपुरुषाः । कथमुक्त्वा, अयं ते शत्रुणा विजिगीषुणा सह, सन्धत्ते, त्वां, पुरा अतिसन्धत्ते अतिसन्धास्यते, क्षिप्रतरम् अतिशीघ्रं, सन्धीयस्व विजिगीषुणा संहितो भव, निग्रहे चास्य प्रयतस्व त्वदतिसन्धित्सोरेतस्य मित्रामित्रान्यतमस्यापकारे प्रकर्षेण यत्नं कुरु, इति एवम्, उक्त्वेति शेषः ।

अन्यं दण्डप्रकारमाह—**आवाहविवाहाभ्यां वेति** । आवाहः कन्यास्वीकरणं विवाहः कन्यादानं ताभ्यां वा, संयोगं सम्बन्धं, कृत्वा, असंयुक्तान् सम्बन्धरहितान्, भेदयेत् । त इमे स्वभूमिष्ठेषु भेदनप्रकाराः ।

अथ दण्डप्रकारमाह—**सामन्तेत्यादि** । सामन्तैर्भूम्यनन्तरैः आटविकैररण्यपतिभिः तत्कुलीनैः तेषां मित्रामित्राणां कुलभवैः अवरुद्धैर्नियन्त्रितैस्तत्पुत्रैश्च, एषां मित्रामित्राणां, राज्यं पुरजनपदादिकं, निघातयेद्, अर्थाद् विजिगीषुः । सार्थव्रजाटवीर्वेति माधवपाठः, सार्थान् वणिक्सम्भारवाहिपशुबृन्दानि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वितंसगिलवच्चारीन् योगैराचरितैः शठः ।
घातयेत् परमिश्रायां विश्वासेनामिषेण च ॥

इति कौटलीयार्थशास्त्रेऽभियास्यत्कर्माणि नवमाधिकरणे
षष्ठोऽध्यायः दूष्यशत्रुसंयुक्ताः,
आदितः सप्तविंशतिशततमः ॥

व्रजान् गोमहिषादीन् अटवीः द्रव्यहस्तिवनानि च, निघातयेत् । दण्डं वाभिसृतं वनाजीवादिप्रसक्तं सैन्यं च, निघातयेत् । 'सार्थव्रजाटवीभिर्वे'ति मूलादर्शदृष्टे तृतीयान्तपाठे सार्थादिभिः अभिसृतं रक्षकत्वेनाश्रितं, दण्डं च निघातयेदिति योज्यम् । किन्तु तत्र द्वितीयो वाशब्दश्चकारार्थः । **परस्परापाश्रयाश्चेति** । अन्योन्योपोद्बलिताश्च, जातिसङ्घाः सङ्घवृत्ते वक्ष्यमाणा विच्छिलिकादयः, एषां मित्रामित्राणां, छिद्रेषु प्रमादस्थानेषु, प्रहरेयुः अर्थादेनान् । गूढाश्च तीक्ष्णरसदादयो गूढपुरुषाश्च, अग्निरसशस्त्रेण वह्निविषायुधैः, प्रहरेयुः ॥

वक्तव्यशेषं वदन् प्रकरणमुपसंहरति — **वितंसेत्यादि** । परमिश्रायां मित्रामित्रमिश्रणजनितायामापदि, शठः विजिगीषुर्गूढवृत्तिः सन्, वितंसगिलवत् 'वितंसः पक्षिविश्वासार्थपक्षिरूपालेख्ययोगी देहाच्छादनपटः' इति माधवः, गिलः भक्ष आमिषं ताभ्यां तुल्यं वर्तमानैः, योगैः कपटोपायैः, आचरितैः प्रयुक्तैः, विश्वासेन स्वस्मिन् विश्वासोत्पादनेन, आमिषेण च सारपण्यादिदानेन च, अरीन्, घातयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामभियास्यत्कर्मणि नवमेऽधिकरणे
षष्ठोऽध्यायः दूष्यशत्रुसंयुक्ताः, आदितः
सप्तविंशत्युत्तरशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४५,१४६. प्रक. अर्थानर्थसंशययुक्ताः, तासामुपाय-विकल्पजाः सिद्धयश्च ।

कामादिरुत्सेकः स्वाः प्रकृतीः कोपयति ; अपनयो बाह्याः । तदुभयमासुरी वृत्तिः । स्वजनविकारः कोपः परवृद्धिहेतुष्वापद् अर्थोऽनर्थः संशय इति ।

योऽर्थः शत्रुवृद्धिमप्राप्तः करोति, प्राप्तः प्रत्यादेयः परेषां भवति, प्राप्यमाणो वा क्षयव्ययोदयो भवति, स भवत्यापदर्थः । यथा—सामन्तानामामिषभूतः; सामन्तव्यसनजो लाभः; शत्रुप्रार्थितो वा स्वभावा-

---

अर्थानर्थसंशययुक्ता इति सूत्रम् । अर्थो हिरण्यभूम्यादिः, अनर्थस्तन्नाशः शरीरनाशश्च, संशयः अर्थानर्थयोः सन्देहः तैः फलभूतैर्युक्ताः प्रकृतत्वादापद उच्यन्त इति सूत्रार्थः । बाह्योपजापाभ्यन्तरप्रतिजापादयो या आपदः पूर्वमुक्ताः तासामापत्त्वमर्थानर्थप्रयोजकत्वादिति निरूपयितुं प्रकरणमिदमारभ्यते ।

कामादिरुत्सेक इति । कामक्रोधादिर्दोषः, स्वाः प्रकृतीः मन्त्र्याद्याभ्यन्तरप्रकृतीः, कोपयति विकारयति, अपनयः सन्धिविग्रहादीनामयथावत्प्रयोगः, बाह्या राष्ट्रमुख्यान्तपालादिरूपा बाह्यप्रकृतीः, कोपयति । तद् उभयं कामादिरपनयश्चेत्येतद् द्वयम्, आसुरी वृत्तिः असुरयोग्यो धर्मः, मायावृत्तिर्वा । अतोऽस्य वर्जने महान् यत्नो राजभिः कर्तव्य इत्यभिप्रायः । अस्य स्वजनकोपहेतोः पूर्वमुक्तस्येदं पुनर्वचनमासुरवृत्तित्वेन निन्दार्थम् । **स्वजनेत्यादि** । तदुभयप्रभवः स्वजनविकारलक्षणो यः कोपः स एव शत्रुवृद्धिनिमित्तेषु जायमानेषु आपद्रूपतां प्रतिपद्यते । सा चापद् अर्थरूपा अनर्थरूपा तदुभयसंशयरूपा चेत्यर्थः ।

तत्र कोऽसावापदर्थ इत्याह — **योऽर्थ** इत्यादि । योऽर्थः उपेक्षावशात् स्वहस्तमप्राप्तः सन् शत्रोरेव वृद्धिं करोति सोऽर्थ एक आपदर्थो भवति, योऽर्थः स्वहस्तप्राप्तोऽपि परैः प्रत्यादेयो भवति सोऽपर आपदर्थः, यो वार्थः प्राप्यमाणतायामतिप्रवृद्धक्षयव्ययवयोगी भवति सोऽन्य आपदर्थ इत्यर्थः । तमुदाहृत्य दर्शयति — **यथेत्यादि** । सामन्तानाम् आमिषभूतः बहुसामन्तभोग्य एकेन गृहीतो लाभः । स हि तैः सम्भूयाभियोगिभिः प्रत्यादेयत्वादापदर्थो भवति । **सामन्तव्यसनजो लाभ** इति । सामन्तस्य गुणप्रातिलोम्यादिव्यसनदशायां तस्मादपहृतो लाभः, स हि तद्व्यसनापगमे प्रत्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धिगम्यो लाभः; पश्चात्कोपेन पार्ष्णिग्राहेण वा विगृहीतः पुरस्ता-ल्लाभः; मित्रोच्छेदेन सन्धिव्यतिक्रमेण वा मण्डलविरुद्धो लाभ इत्या-पदर्थः ।

स्वतः परतो वा भयोत्पत्तिरित्यनर्थः ।

तयोः 'अर्थो न वे'ति, 'अनर्थो न वा' इति, 'अर्थोऽनर्थः' इति, 'अनर्थः अर्थः' इति, संशयः ।

शत्रुमित्रमुत्साहयितुमर्थो न वेति संशयः । शत्रुबलमर्थमाना-भ्यामावाहयितुमनर्थो न वेति संशयः । बलवत्सामन्तां भूमिमादातु-मर्थोऽनर्थः इति संशयः । ज्यायसा सम्भूययानमनर्थोऽर्थ इति संशयः ।

देयत्वादापदर्थः । शत्रुप्रार्थितो वेत्यादि । स्वभावात् प्रार्थनां विनैव लब्धुं योग्य एव शत्रुणा प्रार्थितः प्रत्यादेयत्वादापदर्थः । शत्रुप्रार्थ्य इति पाठे शत्रुकाम्य इत्यर्थः । पश्चात्कोपेनेति । मूले दूष्यादिकोपेन, पार्ष्णिग्राहेण वा पृष्ठशत्रुणा वा, विगृहीतः बाधितः, पुरस्ताल्लाभः यातव्यसकाशलभ्यो लाभः, आपदर्थः । मित्रोच्छेदेनेति । मित्रस्य दुर्गहरणादिना, सन्धिव्यतिक्रमेण कृतसन्ध्युल्लङ्घनेन वा निमित्तेन, मण्डलविरुद्धः राजमण्डलानुज्ञातः, लाभः । इत्यापदर्थ इति । एवञ्जातीयो लाभ आपदर्थो विज्ञेय इत्यर्थः ।

अनर्थमाह—स्वत इत्यादि । स्वतः योऽर्थो गृह्यते तस्मात्, परतो वा गृह्यमाणमर्थं निमित्तीकृत्यान्यतो वा, भयोत्पत्तिः, इत्यनर्थः एवम्प्रकारोऽनर्थः ।

उक्तयोरर्थानर्थयोः संशयमाह—तयोरित्यादि । अर्थानर्थयोः, अर्थो न वेति संशयः अर्थस्य किं भाव उताभाव इत्येवमाकारः अर्थतदभावकोटिकः संशय एकः । अनर्थो नवेति किमनर्थस्य भाव उताभाव इति अनर्थतदभाव-कोटिको द्वितीयः । अर्थोऽनर्थ इति किम् अर्थः उतानर्थ इति अर्थानर्थकोटि-कस्तृतीयः, अनर्थोऽर्थ इति किमनर्थ उतार्थ इति अनर्थार्थकोटिकश्चतुर्थः ।

इमान् क्रमेणोदाहरति—शत्रुमित्रमिति । शत्रोर्मित्रम्, उत्साहयितुं शत्रावभियोजयितुं शत्रावभियोजनमित्यर्थः, अर्थो नवेति अर्थभावाभावकोटिकः संशयः । शत्रुबलमित्यादि । शत्रोः सैन्यम्, अर्थमानाभ्यां भूम्यादिदानबहु-मानाभ्याम्, आवाहयितुम् आहातुम्, अनर्थो नवेति अनर्थभावाभावको-टिकः । बलवत्सामन्तामिति । प्रबलप्रत्यमित्रां, भूमिम्, आदातुम्, अर्थो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेषामर्थसंशयमुपगच्छेत् ।

अर्थोऽर्थानुबन्धः, अर्थो निरनुबन्धः, अर्थोऽनर्थानुबन्धः, अनर्थोऽर्थानुबन्धः, अनर्थो निरनुबन्धः, अनर्थोऽनर्थानुबन्ध इत्यनुबन्धषड्वर्गः ।

शत्रुमुत्पाट्य पार्ष्णिग्राहादानमर्थोऽर्थानुबन्धः ।

उदासीनस्य दण्डानुग्रहः फलेन अर्थो निरनुबन्धः ।

परस्यान्तरुच्छेदनमर्थोऽनर्थानुबन्धः ।

ऽनर्थ इति अर्थानर्थकोटिकः । ज्यायसेति । बलाधिकेन सह, सम्भूययानं यातव्याभियानम्, अनर्थोऽर्थः अनर्थो वार्थो वा इत्यनर्थार्थकोटिकः संशयः । अत्राद्येऽनर्थस्य द्वितीयेऽर्थस्य तृतीयेऽर्थाभावस्य च शङ्का नेति बोद्धव्यम् ।

तेषामिति । उक्तानां संशयानां मध्ये, अर्थसंशयम् अर्थमात्रविषयमनर्थस्पर्शरहितं संशयम् 'अर्थो न वा' इत्येवंलक्षणं संशयम्, उपगच्छेत् उपगम्य तथाभूते विषये समुद्युञ्जीतेत्यर्थः ।

अथार्थानर्थयोः प्रत्येकमनुबन्धयोगात् तदयोगाच्चानुबन्धनिबन्धनः षड्वर्गो जायत इत्याह — अर्थ इत्यादि । अर्थः 'योऽर्थः शत्रुवृद्धिमप्राप्तः करोति' इत्यादिनोक्त आपदर्थः, तस्य तथाविधेनार्थेनानुबन्धः, अथ तथाविधार्थानुबन्धाभावः, अथ 'स्वतः परतो वा भयोत्पत्तिरित्यनर्थः' इत्युक्तलक्षणेनानर्थेनानुबन्ध इति त्रयः । तथानर्थस्यार्थेनानुबन्धः, अनुबन्धाभावः, अनर्थेनानुबन्ध इति त्रय इत्याहत्य षट् ।

तेष्वाद्यमुदाहरति — शत्रुमुत्पाट्येति । यातव्यमरिमुत्साद्य, पार्ष्णिग्राहादानं पृष्ठशत्रोर्ग्रहणम्, अर्थोऽर्थानुबन्धः ।

द्वितीयमुदाहरति— उदासीनस्येति । तस्य, फलेन धनादिग्रहणेन, दण्डानुग्रहः स्वसैन्यदानेनोपकारः, अर्थो निरनुबन्धः, अर्थस्यानर्थस्य वा तेनानुत्पादादित्यभिप्रायः ।

अर्थमनर्थानुबन्धमुदाहरति—परस्येति । शत्रोः, अन्तरुच्छेदनम् इहान्तरशब्देन 'अरेर्नेतुश्च मध्यस्थो दुर्बलोऽन्तर्धिरुच्यते । प्रतिघातो बलवतः' इति पार्ष्णिग्राहचिन्तोक्तलक्षणोऽन्तर्धिरुच्यते, अन्तर्धेरुच्छेदनम्, अर्थोऽनर्थानुबन्धः बलवतः शत्रोरनिवारणादित्यभिप्रायः । इत्थमर्थत्रिवर्ग उदाहृतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शत्रुप्रतिवेशस्यानुग्रहः कोशदण्डाभ्यामनर्थोऽर्थानुबन्धः ।
हीनशक्तिमुत्साह्य निवृत्तिरनर्थो निरनुबन्धः ।
ज्यायांसमुत्थाप्य निवृत्तिरनर्थोऽनर्थानुबन्धः ।
तस्य पूर्वः पूर्वः श्रेयानुपसम्प्राप्तुम् । इति कार्यावस्थापनम् ।
समन्ततो युगपदर्थोत्पत्तिः समन्ततोर्थापद् भवति ।
सैव पार्ष्णिग्राहविगृहीता समन्ततोर्थसंशयापद् भवति ।

अनर्थत्रिवर्गमुदाहरति — शत्रुप्रतिवेशस्येति । शत्रोः प्रतिवेशः भूम्यनन्तरः तस्य, कोशदण्डाभ्याम् अनुग्रहः शत्रुविरोधे कोशदण्डदानेन सहकरणम्, अनर्थोऽर्थानुबन्धः तदात्वानर्थरूपोऽप्यायतावर्थानुबन्धः शत्रुनिग्रहहेतुत्वात् । ननु अर्थत्रिवर्गेऽर्थोऽर्थानुबन्धः प्रथमं कथितः । तत्क्रमेणेहानर्थोऽनर्थानुबन्धः प्रथमं कथनीयः, न त्वनर्थोऽर्थानुबन्धः इति चेत्, सत्यं, किन्तु 'तस्य पूर्वः पूर्वः श्रेयानुपसम्प्राप्तुम्' इति वक्ष्यति, तदानुगुण्यार्थमत्र क्रमान्यत्वमाहृतम् ।

हीनशक्तिमिति । दुर्बलम्, उत्साह्य 'अहं ते सहकरिष्यामि' इति, शत्रवभियोगे सन्नाह्य, निवृत्तिः ततः स्वयं निवर्तनम्, अनर्थो निरनुबन्धः धनव्ययादिहेतुत्वात् तदात्वेऽनर्थरूपः, तेन शत्रुनिग्रहासिद्धया नार्थानुबन्धो न वा हीनशक्तिकोपस्याकिञ्चित्करतयानर्थानुबन्ध इत्यतो निरनुबन्धश्चेत्यर्थः ।

ज्यायांसमिति । प्रबलम्, उत्थाप्य 'तव सहकारी भविष्यामि' इत्युत्साह्य, निवृत्तिः, अनर्थोऽनर्थानुबन्धः धनव्ययहेतुत्वात् तदात्वेऽनर्थः प्रबलकोपनिमित्तकेनानर्थान्तरेणानुबध्यते चेत्यर्थः ।

तस्येत्यादि । अनुबन्धषड्वर्गस्य मध्ये अर्थत्रिवर्गे पूर्वपूर्व उपादेयतया प्रतिपत्तुमर्हः, अनर्थत्रिवर्गे तु परिहर्तव्यतया प्रतिपत्तुमर्ह इत्यर्थः । **इति कार्यावस्थापनमिति** । कार्ययोरर्थानर्थयोः अवस्थापनं स्वरूपतो व्यवस्थापनम् ।

अथ देशतोऽवस्थापनमाह — **समन्तत इत्यादि** । अग्रतः पृष्ठतः पार्श्वतश्च सर्वतो यौगपद्येनार्थोत्पत्तिः समन्ततोर्थापद् भवति । **सैवेत्यादि** । समन्ततो युगपदर्थोत्पत्तिरेव पार्ष्णिग्राहेण विरोधिता समन्ततोर्थसंशयापद् भवति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तयोर्मित्राक्रन्दोपग्रहात् सिद्धिः ।
समन्ततः शत्रुभ्यो भयोत्पत्तिः समन्ततोनर्थापद् भवति ।
सैव मित्रविगृहीता समन्ततोनर्थसंशयापद् भवति ।
तयोश्चलामित्राक्रन्दोपग्रहात् सिद्धिः । परमिश्राप्रतीकारो वा ।
इतो लाभ इतरतो लाभ इत्युभयतोर्थापद् भवति । तस्यां समन्ततोर्थायां च लाभगुणयुक्तमर्थमादातुं यायात् । तुल्ये लाभगुणे प्रधानमासन्नमनतिपातिनम्, ऊनो वा येन भवेत् तम्, आदातुं यायात् ।

उक्तयोरर्थापदर्थसंशयापदोः प्रतीकारमाह—तयोरिति । समन्ततोर्थापत्समन्ततोर्थसंशयापदोः, मित्राक्रन्दोपग्रहात् मित्रस्य पुरस्तान्मित्रस्य आक्रन्दस्य पृष्ठतोमित्रस्य च उपग्रहात् सन्धानेन सहायीकरणात्, सिद्धिः प्रतिक्रिया ।

समन्ततो युगपच्छत्रुभ्यो भयोत्पत्तिः समन्ततोनर्थापदित्याह — समन्ततः शत्रुभ्य इत्यादि ।

समन्ततोनर्थापदेव मित्रेण स्वानुकूलेन विरोधिता समन्ततोनर्थसंशयापद् भवतीत्याह — सैव मित्रविगृहीतेत्यादि ।

तयोः प्रतीकारमाह — तयोरिति । समन्ततोनर्थापत्समन्ततोनर्थसंशयापदोः, चलामित्राक्रन्दोपग्रहात् चलामित्रस्य दुर्गरहितस्य शत्रोः आक्रन्दस्य पृष्ठतोमित्रस्य च उपग्रहात् स्वानुकूलीकरणात्, सिद्धिः प्रतीकारः । परमिश्राप्रतीकारो वेति । परमिश्राया आपदो यः प्रतीकारः 'परमिश्रायां मित्रतः सिद्धिः' इति दृष्यामित्रसंयुक्तप्रकरणे कथितः, स वा तयोः प्रतीकार इत्यर्थः ।

एकतोऽपरतश्चेत्युभयतो लाभो यस्यां भवति सोभयतोर्थापदित्याह — इतो लाभ इत्यादि । प्रतीकारमाह—तस्यामिति । उभयतोर्थापदि, समन्ततोर्थायां च समन्ततोर्थापदि च, लाभगुणयुक्तम् 'आदेयः प्रत्यादेयः प्रसादक' इत्यादिना क्षयव्ययलाभविपरिमर्शप्रकरणे ये लाभगुणा उक्ताः तैर्युक्तम्, अर्थम्, आदातुं, यायात् । पूर्वमेका प्रतिक्रिया समन्ततोर्थापदि 'तयोर्मित्राक्रन्दोपग्रहात् सिद्धिरि'त्युक्ता, अन्या त्वत्रोपदिष्टा । तुल्ये लाभगुण इति । लाभगुणे समाने, प्रधानं वा प्रशस्ततरफलं वा, आसन्नं वा देशतः सन्निकृष्टं वा, अनतिपातिनं वा कालातिक्रमासहम् आसन्नकालं वा, अतिपातिनमिति पाठे आत्ययिकमित्यर्थः, ऊनो वा येन भवेत् तं यस्मिन्ननुपात्ते हीनत्वमात्मनः यात् तं वा अर्थालाभम्, आदातुं यायात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इतोऽनर्थ इतरतोऽनर्थ इत्युभयतोनर्थापत् । तस्यां समन्ततो-नर्थायां च मित्रेभ्यः सिद्धिं लिप्सेत ।

मित्राभावे प्रकृतीनां लघीयस्यैकतोनर्थां साधयेत् । उभयतो-नर्थां ज्यायस्या । समन्ततोनर्थां मूलेन प्रतिकुर्यात् । अशक्ये सर्वमु-त्सृज्यापगच्छेत् । दृष्टा हि जीवता पुनरापत्तिः, यथा सुयात्रोदय-नाभ्याम् ।

इतो लाभ इतरतो राज्याभिमर्श इत्युभयतोर्थानर्थापद् भवति ।

उभयतोनर्थापदमाह — इतोऽनर्थ इतरतोऽनर्थ इत्यादि । तस्यां प्रतीकारमाह — तस्यामिति । उभयतोनर्थापदि, समन्ततोनर्थायां च, मित्रेभ्यः, सिद्धिं प्रतिक्रियां, लिप्सेत । समन्ततोनर्थायाः 'तयोश्चलामित्राक्रन्दोपग्रहात् सिद्धिरि'ति प्रतिक्रिया पूर्वमभिहिता, प्रतिक्रियान्तरं त्वत्रोच्यते ।

एष एव मित्रद्वारकः प्रतीकारः एकतोनर्थायामपि भवतीत्यभिसन्धि मनसि कुर्वन् मित्राभावपक्षे तस्या उभयतोनर्थायाः समन्ततोनर्थायाश्च प्रती-कारमाह — मित्राभाव इति । मित्रसाहाय्यालाभे, प्रकृतीनां मध्ये, लघी-यस्या लघुतरया प्रकृत्या तथाविधप्रकृतित्यागेनेत्यर्थः, एकतोनर्थां, साधयेत् प्रतिकुर्यात् । उभयतोनर्थां, ज्यायस्या प्रशस्यतरप्रकृतित्यागेन, प्रतिकुर्यात् । समन्ततोनर्थां मूलेन मूलं स्थानीयं तत्त्यागेन प्रतिकुर्यात् । अशक्य इति । प्रतीकारे लघुतरप्रकृत्यादित्यागैरशक्ये सति, सर्वम् उत्सृज्य स्वात्मातिरिक्तं सर्वस्वं परित्यज्य, अपगच्छेत् अन्यत्रापसृत्यात्मानं रक्षेदित्यर्थः । तथात्मर-क्षणस्य प्रयोजनं पुनःस्वपदप्राप्तिरूपं सम्भावितमित्याह — दृष्टा हीति । जीवता विपद्यन्यत्रापसृत्य यत्नेनात्मानं रक्षता, पुनरापत्तिः दृष्टा हि पुनः स्वस्थानमतिलम्भोऽनुभूतो हि । आत्मरक्षणेन स्वपदपुनःप्राप्तिदर्शनस्य ऐति-हासिकमहापुरुषसमुदाचारसिद्धतां दर्शयितुमाह — यथा सुयात्रोदयनाभ्या-मिति । सुयात्रो नलः उदयनो वत्सराजः ताभ्यां विपदि आत्मानं रक्षद्भ्यां पुनरापत्तिर्दृष्टेत्यर्थः । इह 'जीवतः पुनरावृत्तिरि'त्यपि पाठः । तदा तु दृष्टे-त्यस्य लोकः कर्ता गम्यः । यथा सुयात्रोदयनाभ्यामित्यस्य च जीवित्वा पुन-रावृत्तिं प्राप्तवद्भ्यां नलवत्सराजाभ्यां निदर्शनभूताभ्यामित्यर्थः ।

उभयतोर्थानर्थामाह — इतो लाभ इति । एकतो लाभः, इतरतो राज्याभिमर्शः स्वजनपदाक्रमणम्, इति एवमुभयतोऽर्थानर्थाभ्यां युक्तेत्यर्थः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्यामनर्थसाधको योऽर्थः तमादातुं यायात्; अन्यथा हि राज्याभिमर्शं वारयेत्।

एतया समन्ततोर्थानर्थापद् व्याख्याता।

इतोऽनर्थ इतरतोऽर्थसंशय इत्युभयतोनर्थार्थसंशया। तस्यां पूर्वमनर्थं साधयेत्, तत्सिद्धावर्थसंशयम्।

एतया समन्ततोनर्थार्थसंशया व्याख्याता।

इतोऽर्थ इतरतोऽनर्थसंशय इत्युभयतोर्थानर्थसंशयापत्।

एतया समन्ततोर्थानर्थसंशया व्याख्याता।

तस्यां पूर्वां पूर्वां प्रकृतीनामनर्थसंशयान्मोक्षयितुं यतेत। श्रेयो हि मित्रमनर्थसंशये तिष्ठन्न दण्डः, दण्डो वा न कोश इति।

उभयतोर्थानर्थापद् भवति। तत्र प्रतीकारमाह — तस्यामित्यादि। उक्तायामापदि, योऽर्थ आदीयमानोऽनर्थस्यापि प्रतीकारं प्रयोजयेत् तमर्थमादातुं यायात्। स चेदर्थोऽनर्थप्रतीकाराक्षमः तर्हि अर्थलाभमुपेक्ष्य राज्याभिमर्शमेव प्रतिकुर्यादित्यर्थः।

उभयतोर्थानर्थापद उक्तां प्रतिक्रियां समन्ततोर्थानर्थापद्यतिदिशति— एतया समन्ततोर्थेत्यादि।

अनर्थनिश्चयार्थसंशयवतीमाह — इतोऽनर्थ इति। एकतोऽनर्थनिश्चयः अन्यतोऽर्थसंशय इत्युभयवती उभयतोनर्थार्थसंशया नाम। तत्प्रतिक्रियामाह — तस्यामित्यादि। तस्यां प्रथममनर्थं प्रतिकुर्यात्। अनर्थप्रतीकारे जाते पश्चादर्थसंशयं प्रतिकुर्यादित्यर्थः।

उभयतोनर्थार्थसंशयायामुक्तं प्रतिक्रियाक्रमं समन्ततोनर्थार्थसंशयायामतिदिशति — एतया समन्ततोनर्थेत्यादि।

अथानर्थसंशयार्थनिश्चयवतीमापदमाह — इतोऽर्थ इतरतोऽनर्थसंशय इत्यादि।

उभयतोर्थानर्थसंशयया समानलक्षणा समानप्रतीकारा च समन्ततोर्थानर्थसंशयेत्यभिप्रायेणाह — एतया समन्ततोर्थानर्थसंशयेत्यादि।

तत्प्रतीकारमाह — तस्यामित्यादि। उभयतोर्थानर्थसंशयापदि, प्रकृतीनां स्वाम्यमात्यजनपददुर्गकोशदण्डमित्रलक्षणानां मध्ये, पूर्वां पूर्वां प्रकृतिम्, अनर्थसंशयात्, मोक्षयितुं यतेत उत्तरोत्तरस्याः प्रागेव मोचयितुं यत्नं कुर्यात्। पूर्वपूर्वामपेक्ष्योत्तरोत्तरस्या अप्राधान्याद् अप्रधानप्रकृत्यनर्थमोक्षणस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समग्रमोक्षणाभावे प्रकृतीनामवयवान् मोक्षयितुं यतेत । तत्र पुरुषप्रकृतीनां च बहुलमनुरक्तं वा तीक्ष्णलुब्धवर्जम् । द्रव्यप्रकृतीनां सारं महोपकारं वा । सन्धिनासनेन द्वैधीभावेन वा लघूनि विपर्ययैर्गुरूणि ।

क्षयस्थानवृद्धीनां चोत्तरोत्तरं लिप्सेत । प्रातिलोम्येन वा क्षयादीनाम् । आयत्यां विशेषं पश्येत् ।

पश्चात्करणेऽनतिदोषादित्यभिप्रायः । अप्रधानप्रकृत्यनर्थमोक्षणविलम्बस्यानतिपीडावहत्वं प्रधानप्रकृत्यनर्थमोक्षणविलम्बस्यातिपीडावहत्वं च प्रकृतिविशेषनिर्दर्शनेन स्पष्टयति — श्रेयो हीति । अनर्थसंशये तिष्ठत् मित्रं, श्रेयः अनतिपीडाहेतुतया वरमित्यर्थः । न दण्डः दण्डस्त्वनर्थसंशये तिष्ठन्नतिपीडाहेतुतया नैव वरमित्यर्थः । दण्डो वा न कोश इति । दण्डो वानर्थसंशये तिष्ठन् श्रेयान् , न तु कोशोऽनर्थसंशये तिष्ठन्नित्यर्थः । इतिशब्दः प्रकारे, अनेन प्रकारेणान्यस्यापि पूर्वपूर्वस्यानर्थसंशये तिष्ठतः मोक्षणीयत्वमुत्तरोत्तरस्य तदभावश्च बोद्धव्यमित्यभिप्रायः ।

समग्रमोक्षणाभाव इति । प्रकृतयो हि पुरुषा द्रव्याणि च, तेषां सर्वेषां मोक्षणस्याशक्यतायां, प्रकृतीनाम् अवयवान्, मोक्षयितुं यतेत । तत्र विशेषमाह — तत्रेति । अवयवमोचने, पुरुषप्रकृतीनां, बहुलम् अनुरक्तं वा, तीक्ष्णलुब्धवर्जं तीक्ष्णलुब्धाभ्यां वर्जितं, मोक्षयितुं यतेत । द्रव्यप्रकृतीनां मध्ये, सारं महामूल्यं, महोपकारं वा, मोक्षयितुं यतेत । **सन्धिनेत्यादि** । तेन, आसनेन, द्वैधीभावेन वा, लघुभूतेन गुणेनेत्यर्थः, लघूनि लघुद्रव्याणि, मोक्षयितुं यतेत । विपर्ययैः सन्ध्यादिविपर्ययरूपैर्गुणैः अर्थाद् विग्रहयानसमाश्रयरूपैः, गुरूणि गुरुद्रव्याणि, मोक्षयितुं यतेत । एवं तावद् मोक्षयितव्यं मोक्षणौपयिकं चाभिहितम् ।

अथ मोक्षणपरिपाटीमाह — **क्षयस्थानवृद्धीनां चेति** । शक्तिसिद्ध्योरपचयः क्षयः स्थानं साम्यं प्रकृतिस्थता शक्तिसिद्धचोरुपचयो वृद्धिः, क्षयादीनां मध्यात्, उत्तरोत्तरं लिप्सेत क्षयात् स्थानं स्थानाद् वृद्धिं च, प्राप्तुमीहेत, न तु क्षयात् वृद्धिमित्यभिप्रायः । **प्रातिलोम्येन वा क्षयादीनामिति** । प्रातवृद्धिरेव वृद्धेः स्थानं स्थानात् क्षयं च प्रतिलोमगत्या लिप्सेतेत्यर्थः । किमर्थमियं प्रतिलोमगत्या लिप्सेत्याकाङ्क्षायामायतौ वृद्धिविशेषलाभार्थमित्याह — **आयत्यां विशेषं पश्येदिति** । अनया प्रतिलोमगत्या कमपि वृद्धेरतिशयमुत्तरकाले लभेयेति यदि जानीयादित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति देशावस्थापनम् ।

एतेन यात्रादिमध्यान्तेष्वर्थानर्थसंशयानामुपसंप्राप्तिर्व्याख्याता।

निरन्तरयोगित्वाच्चार्थानर्थसंशयानां यात्रादावर्थः श्रेयानुपसम्प्राप्तुं पार्ष्णिग्राहासारप्रतिघाते क्षयव्ययप्रवासप्रत्यादेयमूलरक्षणेषु च भवति। तथानर्थः संशयो वा स्वभूमिष्ठस्य विषह्यो भवति ।

एतेन यात्रामध्येऽर्थानर्थसंशयानामुपसम्प्राप्तिर्व्याख्याता ।

इति देशावस्थापनमिति । अनेन प्रकारेण देशनिमित्तापदां व्यवस्थापनमुक्तमित्यर्थः ।

उक्तं देशनिमित्तापद्विषयं विधिं कालनिमित्तापद्यतिदिशति — **एतेने**त्यादि । उक्तेन देशनिमित्तापत्स्वरूपप्रतिविधानकथनेन, यात्रादिमध्यान्तेषु यात्राया आदौ मध्येऽन्ते च, अर्थानर्थसंशयानाम्, उपसम्प्राप्तिः अर्थात् प्रतिक्रिया च, व्याख्याता उक्तप्राया, देशस्योक्ताः समन्ततोयुगपदर्थोत्पत्त्यादय आपदस्तत्प्रतिक्रियाश्च पार्ष्णिग्राहाक्रन्दमित्रोपग्रहादयो यात्राया आदिमध्यान्तकालेष्वपि भवन्तीति भावः ।

तत्र यात्राया आद्यवस्थायां युगपदर्थाद्युत्पत्तावाह — **निरन्तरे**त्यादि । यात्रादौ यात्राया आरम्भे, अर्थानर्थसंशयानां, निरन्तरयोगित्वात् युगपद् योगे सतीत्यर्थः, अर्थः, उपसंप्रातुम्, आदातुं, श्रेयान् भवति । श्रेयस्त्वं चार्थस्य पार्ष्णिग्राहासारप्रतिघातादिसाधकत्वादित्यभिप्रायेणाह — **पार्ष्णिग्राहासारप्रतिघाते** इति । पार्ष्णिग्राहस्य पृष्ठशत्रोः आसारस्य यातव्यसुहृद्बलस्य च, प्रतिघाते प्रतिघातार्थमित्यर्थः, क्षयव्ययप्रवासप्रत्यादेयमूलरक्षणेषु च क्षयो युग्यपुरुषापचयः व्ययो हिरण्यधान्याद्यपचयः प्रवासो दूराध्वगमनं प्रत्यादेयं यातव्यात् प्रत्यादातुं योग्यं तदपहृतं भूम्यादिकम् अर्थादर्थसाध्यसहायोपग्रहनिर्वर्त्यं प्रत्यादेयप्रत्यादानं मूलरक्षणं स्थानीयस्य रक्षणम् इत्येतेषु च फलभूतेष्वित्यर्थः । अर्थो यथा तथानर्थः संशयो वा यात्रादौ स्वभूमिस्थितस्य विजिगीषोः सुखसाध्यो भवतीत्याह — **तथानर्थ** इत्यादि । विषह्यः सोढुं शक्यः साध्य इत्यर्थः ।

यात्रादाविव यात्रामध्येऽप्यर्थानर्थसंशयानां पार्ष्णिग्राहासारप्रतिबन्धादिप्रयोजनवत्त्वाविशेषादुपसम्प्राप्तिर्बोद्धव्येत्याह — **एतेने**त्यादि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यात्रान्ते तु कर्शनीयमुच्छेदनीयं वा कर्शयित्वोच्छिद्य वार्थः श्रेयानुपसम्प्राप्तुं नानर्थः संशयो वा पराबाधभयात् ।

सामवायिकानामपुरोगस्य तु यात्रामध्यान्तगोऽनर्थः संशयो वा श्रेयानुपसम्प्राप्तुमनिबन्धगामित्वात् ।

अर्थो धर्मः काम इत्यर्थत्रिवर्गः । तस्य पूर्वः पूर्वः श्रेयानुपसम्प्राप्तुम् ।

अनर्थोऽधर्मः शोक इत्यनर्थत्रिवर्गः । तस्य पूर्वः पूर्वः श्रेयान् प्रतिकर्तुम् ।

अर्थोऽनर्थ इति, धर्मोऽधर्म इति, कामः शोक इति संशयत्रिवर्गः । तस्योत्तरपक्षसिद्धौ पूर्वपक्षः श्रेयानुपसम्प्राप्तुम् ।

यात्राया अन्ते तु कर्शनीयमुच्छेदनीयं वा शत्रुं कर्शयित्वोच्छिद्य वा परभूमौ स्थितस्य विजिगीषोरर्थ एवोपसम्प्राप्तियोग्यो भवति, न त्वनर्थः संशयो वा, परस्य रन्ध्रान्वेषिणः सकाशादाबाधस्य सम्भावनादित्याह — **यात्रान्ते त्वित्यादि** ।

सामवायिकानां प्रधानस्यैष विधिः । अप्रधानस्य त्वाह — **सामवायिकानामिति** । तेषाम्, अपुरोगस्य तु अप्रधानस्य तु, यात्रामध्यान्तगः यात्राया मध्येऽन्ते वा सम्भूतः, अनर्थः संशयो वा, उपसम्प्राप्तुं प्रतिकर्तुं, श्रेयान्, कुतः, अनिबन्धगामित्वात् पुरोगस्य पूर्वहतया संप्रतिबन्धत्वेनान्यत्र गन्तुमशक्तत्वेऽपि अपुरोगस्य प्रतिबन्धरहितस्यान्यत्र गतिसम्भवादित्यर्थः ।

अथार्थानर्थसंशयानां प्रत्येकं त्रिवर्गं दर्शयन् वर्ग्याणामितरेतरापेक्षं श्रेयस्त्वमाह — **अर्थ इत्यादि** । अर्थत्रिवर्गः उपादेयत्रिवर्गः । **तस्येति** । अर्थत्रिवर्गस्य मध्ये पूर्वः पूर्वः उपसम्प्राप्तुं श्रेयान् कामाद् धर्मः प्रशस्ततरो धर्माच्चार्थ इत्यर्थः ।

अनर्थ इत्यादि । अनर्थत्रिवर्गः परिहार्यत्रिवर्गः ।

संशयत्रिवर्गमाह — **अर्थोऽनर्थ इतीत्यादि** । **तस्येति** । संशयत्रिवर्गस्य मध्ये, उत्तरपक्षसिद्धौ अत्र हि वर्गे अर्थानर्थरूपपक्षद्वयात्मकः प्रथमो वर्ग्यः धर्माधर्मरूपपक्षद्वयात्मको द्वितीयः कामशोकरूपपक्षद्वयात्मकस्तृतीय इति त्रयो वर्ग्याः, तेष्वेकैकस्मिन् उत्तरपक्षस्यानर्थादेः सिद्धौ प्रतिक्रियायां कृतायां, पूर्वपक्षः अर्थादिः, उपसम्प्राप्तुं श्रेयान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति कालावस्थापनम्। इत्यापदः।

तासां सिद्धिः पुत्रभ्रातृबन्धुषु सामदानाभ्यां सिद्धिरनुरूपा, पौरजानपददण्डमुख्येषु दानभेदाभ्यां, सामन्ताटविकेषु भेददण्डाभ्याम्।

एषानुलोमा विपर्यये प्रतिलोमा। मित्रामित्रेषु व्यामिश्रा सिद्धिः। परस्परसाधका ह्युपायाः।

इति कालावस्थापनमिति। अनेन प्रकारेण यात्रादिमध्यान्तकालिकार्थानर्थादिसम्बद्धा व्यवस्था निरूपितेत्यर्थः। इत्यापद इति। प्रपञ्चिता इति शेषः।

तासामुपायविकल्पजाः सिद्धय इति सूत्रम्। उक्तानामापदां सामदानाद्युपायभेदप्रयोगनिबन्धनाः प्रतिक्रिया उच्यन्त इति सूत्रार्थः। पूर्वं तावत् 'तयोर्मित्राक्रन्दोपग्रहात् सिद्धिरि'त्यादिना मित्राद्युपग्रहः साधकतयोक्तः, तदुपायास्त्विदानीमभिधीयन्ते।

तानुपायान् यथाविषयमवस्थापयति — तासां सिद्धिरिति। आपदां प्रतिक्रिया या पूर्वमुक्ता सा, पुत्रभ्रातृबन्धुषु विषये, सामदानाभ्यां सिद्धिरनुरूपा सामदानलक्षणाभ्यामुपायाभ्यां भवन्ती समुचिता सिद्धिः, तेषु सहजानुरागवत्तया विधेयेषूपायान्तरप्रयोगानौचित्यादित्यभिप्रायः। पौरजानपददण्डमुख्येषु पौरादीनां मुख्येषु विषये यद्वा पौरादिषु राष्ट्रमुख्यान्तेषु चतुर्षु विषये, दानभेदाभ्यां भवन्ती सिद्धिः अनुरूपा सिद्धिः। तेषु सहजस्नेहादिरहिततया सामदण्डप्रयोगानौचित्यादिति भावः। सामन्ताटविकेषु विषये, भेददण्डाभ्यां भवन्ती सिद्धिः, अनुरूपा सिद्धिः, निसर्गविरोधिषु सामदानप्रयोगानौचित्यादित्यर्थः।

एषेति। उक्ता सामाद्युपायद्वारिका नैयमिकी सिद्धिः, अनुलोमा क्रमनियमयुक्ता औत्सर्गिकस्वस्वगुणानुवर्तित्वलक्षणानुलोम्ययुक्तपुत्रादिविषयत्वादिति भावः। विपर्यये पुत्राद्यानुलोम्याभावे, प्रतिलोमा अव्यवस्थितक्रमा सिद्धिः, द्रोहवृत्तितया प्रतिलोमेषु पुत्रादिष्वपि दण्डप्रयोगात् सिद्धिरेषितव्या भवति, श्लाघ्यगुणयोगानिर्वैरवृत्तितयानुलोमेषु सामन्तादिष्वपि सामप्रयोगात् सिद्धिरेषितव्या भवतीत्यभिप्रायः। मित्रामित्रेष्विति। मित्रेषु अमित्रेषु च विषये, व्यामिश्रा सिद्धिः प्रतिक्रिया संकीर्णा भवति। तेषां हि विकारापत्तौ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शत्रोः शङ्कितामात्येषु सान्त्वं प्रयुक्तं शेषप्रयोगं निवर्तयति; दूष्यामात्येषु दानम् । सङ्घातेषु भेदः; शक्तिमत्सु दण्ड इति ।

गुरुलाघवयोगाच्चापदां नियोगविकल्पसमुच्चया भवन्ति ।

'अनेनैवोपायेन नान्येन' इति नियोगः ।

'अनेन वान्येन वा' इति विकल्पः ।

'अनेनान्येन च' इति समुच्चयः ।

तेषामेकयोगाश्चत्वारस्त्रियोगाश्च; द्वियोगाः षट्; एकश्चतुर्योग इति पञ्चदशोपायाः । तावन्तः प्रतिलोमाः ।

तत्तद्विकारप्रशमानुगुणतया सर्व एवोपाया व्यस्ता मिश्रिता वा अनियमेन प्रयोक्तव्या भवन्तीति भावः । तत्रोपायसमुच्चयपक्षे द्वयोर्विरुद्धस्वभावयोरुपाययोः कथमेकार्थसाधकतेत्याशङ्कायामाह— **परस्परसाधका ह्युपाया** इति । परस्परविरुद्धा अप्युपाया एकस्मिन्नर्थे साध्ये परस्परसहकारिणो भवन्तीत्यर्थः ।

उपायविषयं नियमविशेषमाह — **शत्रोः शङ्कितामात्येष्विति** । शत्रुसम्बन्धिषु क्रुद्धत्वादिदोषात् कृत्यत्वेन शङ्क्यमानेषु अमात्येषु विषये, सान्त्वं साम, प्रयुक्तं सत्, शेषप्रयोगं दानाद्युपायप्रयोगं, निवर्तयति, सान्त्वेनैव कृत्यसिद्ध्या शेषानपेक्षणादिति भावः । **दूष्यामात्येष्विति** । शत्रोर्दूष्या येऽमात्यास्तेषु, दानं प्रयुक्तं सत्, शेषप्रयोगं निवर्तयति । **सङ्घातेष्विति** । इह शत्रोरिति निवृत्तम् । सङ्घातेषु विषये, भेदः प्रयुक्तः सन्, शेषप्रयोगं निवर्तयति । **शक्तिमत्स्विति** । उत्साहादिशक्तियुक्तेषु विषये, दण्ड इति नियम इति शेषः, दण्ड एवेत्यर्थः । इत्थमुपायानां विषयापेक्षा व्यवस्थाभिहिता ।

आपद्गुरुलघुभावापेक्षयोपायानां नियोगविकल्पसमुच्चया भवन्तीत्याह— **गुरुलाघवयोगाच्चेत्यादि** ।

नियोगविकल्पसमुच्चयानां स्वरूपमाह — **अनेनैवेत्यादि** । इह वाक्यत्रयेऽपि 'सिद्धिरि'ति शेषो द्रष्टव्यः ।

नियोगादियोगनिबन्धनान् उपायानां प्रकारान् सङ्गृह्णाति—**तेषामिति** । सामादीनां मध्ये, एकयोगाः एकेति भावप्रधानो निर्देशः एकेन एकत्वेनैव न तु द्वित्वत्रित्वादिना योगः प्रयोगो येषां ते तथाभूताः अर्थात् सामैव केवलं प्रयोक्तव्यं दानमेव केवलं भेद एव केवलो दण्ड एव केवल इत्येवं व्यवस्थायुक्ताः, चत्वारः, त्रियोगाश्च त्रिप्रयोगयुक्ताश्च, चत्वारः । यथा — सामदान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेषामेकेनोपायेन सिद्धिरेकसिद्धिः, द्वाभ्यां द्विसिद्धिः, त्रिभिस्त्रिसिद्धिः, चतुर्भिश्चतुस्सिद्धिरिति ।

धर्ममूलत्वात् कामफलत्वाच्चार्थस्य धर्मार्थकामानुबन्धा यार्थस्य सिद्धिः, सा सर्वार्थसिद्धिः ।

इति सिद्धयः ।

दैवादग्निरुदकं व्याधिः प्रमारो विद्रवो दुर्भिक्षमासुरी सृष्टिः इत्यापदः ।

भेदाः, सामदानदण्डाः सामभेददण्डाः दानभेददण्डा इत्येवं चतुष्प्रकाराः । द्वियोगा द्विप्रयोगयुक्ताः, षट् । यथा — सामदाने सामभेदौ सामदण्डौ दानभेदौ दानदण्डौ भेददण्डौ इत्येवं षट् प्रकाराः । एकः चतुर्योगः चतुष्प्रयोगयुक्त एकः प्रकारः । इति एवं, पञ्चदश पञ्चदशप्रकाराः, उपायाः । ते चैतेऽनुलोमक्रमप्रयोज्याः । प्रतिलोमक्रमप्रयोज्या अपि पञ्चदशेत्याह — **तावन्तः प्रतिलोमा** इति । तद्यथा — दण्डभेददानसामानि ऐकैकश्येन चत्वार उपायाः दण्डभेददानानि दण्डभेदसामानि भेददानसामानि दण्डदानसामानीति त्रियोगाश्चत्वारः । दण्डभेदौ दण्डदाने दण्डसामनी भेददाने भेदसामनी दानसामनी इति द्वियोगाः षट् । दण्डादिचतुष्टययुक्त एक इत्याहत्य पञ्चदश प्रतिलोमक्रमिका उपायाः ।

एकद्वित्रिचतुर्योगनिबन्धनमुपायानां चातुर्विध्यं तन्निर्वर्त्यानां प्रतिक्रियाणामपि चातुर्विध्यं प्रयोजयतीत्यभिप्रायेणाह — **तेषामित्यादि** । इतिशब्दानन्तरं चतुर्विधाः सिद्धय इति शेषः ।

या एताः प्रतिक्रियालक्षणाः सिद्धयः प्रपञ्चिताः, ताभिः सिध्यत्सु नानाप्रकारेषु लाभेषु मध्येऽर्थस्य लाभ एव परम इत्युपदेष्टुं तं स्तौति — **धर्ममूलत्वादिति** । धर्मं प्रति हेतुत्वात्, कामफलत्वात् कामोपभोगसाधकत्वात्, चकारादर्थसाधकत्वाच्च, धर्मार्थकामानुबन्धा धर्मादिसमुच्चयप्राप्तिलक्षणफलोपधायिका, या, अर्थस्य, सिद्धिः लाभः, सा सर्वार्थसिद्धिः धर्मादित्रितयातिरेकेण लोके लब्धव्यार्थाभावादिति भावः ।

इतीति । अनेन प्रकारेण, सिद्धयः प्रतिक्रियाः अर्थादपनयप्रभवाणां मानुषीणामापदां, व्याख्याता इति शेषः ।

दैवीस्ता आह — **दैवादित्यादि** । दैवात् पूर्वजन्मसञ्चिताददृष्टात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तासां दैवतब्राह्मणप्रणिपाततः सिद्धिः ॥
अवृष्टिरतिवृष्टिर्वा सृष्टिर्वा यासुरी भवेत् ।
तस्यामाथर्वणं कर्म सिद्धारम्भाश्च सिद्धयः ॥

इति कौटलीयार्थशास्त्रेऽभियास्यत्कर्मणि नवमेऽधिकरणे सप्तमोऽध्यायः
अर्थानर्थसंशययुक्तास्तासामुपायविकल्पजाः सिद्धयश्च,
आदितोऽष्टाविंशतिशततमः ॥
एतावता कौटलीयस्यार्थशास्त्रस्य अभियास्यत्कर्म
नवममधिकरणं समाप्तम् ॥

प्रमारः सङ्घशो मरणम् । विद्रवो राष्ट्रात् पलायनम् । दुर्भिक्षम् ईतिबाधा । आसुरी सृष्टिः मूषिकादीनां प्रभूतोत्पत्तिरिति माधवः ।

दैवीनामापदां दैवतब्राह्मणनमस्करणात् प्रतीकारो भवतीत्याह — तासामित्यादि ॥

अवृष्टिरिति । वृष्ट्यभावः, अतिवृष्टिर्वा अतिमात्रवर्षणं वा, आसुरी सृष्टिर्वा मूषिकादिप्रभूतोत्पत्तिरूपा वा, या, आपद्, भवेत्, तस्यां विषये, आथर्वणं कर्म अथर्ववेदोक्तं शान्तिकादि, सिद्धारम्भाश्च सिद्धानां तपस्सिद्धियुक्तानां महताम् आरम्भाः शान्तिकर्माणि च, सिद्धयः प्रतीकाराः, भवन्ति ॥

या कौटल्यार्थशास्त्रस्य व्याख्या श्रीमूलसंज्ञिता ।
तत्राभियास्यत्कर्माधिकरणं नवमं गतम् ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्त्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्मठामहोपाध्याय-गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायाम् अभियास्यत्कर्मणि नवमेऽधिकरणे सप्तमोऽध्यायः अर्थानर्थसंशययुक्ताः, तासामुपायविकल्पजाः सिद्धयश्च । आदितोऽष्टाविंशत्यधिकशततमः ॥
इति अभियास्यत्कर्म नवममधिकरणं
समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सांग्रामिकं—दशममधिकरणम्।

१४७. प्रक. स्कन्धावारनिवेशः।

वास्तुकप्रशस्ते वास्तुनि नायकवर्धकिमौहूर्तिकाः स्कन्धावारं वृत्तं दीर्घं चतुरश्रं वा, भूमिवशेन वा, चतुर्द्वारं षट्पथं नवसंस्थानं मापयेयुः। खातवप्रसालद्वाराट्टालकसम्पन्नं भये स्थाने च।

मध्यमस्योत्तरे नवभागे राजवास्तुकं धनुश्शतायाममर्धविस्तारं, पश्चिमार्धे तस्यान्तःपुरम्। अन्तर्वंशिकसैन्यं चान्ते निविशेत। पुरस्ता-

---

अथ **सांग्रामिकं** नाम दशममधिकरणमारभ्यते। संग्राममधिकृत्य कृतं सांग्रामिकमुच्यते। विजिगीषुणा हि शक्तिदेशकालबलाबलादिज्ञानपूर्वं सुविहितबाह्याभ्यन्तरादिविपत्प्रतीकारेणाभियाय संग्रामे करणीये तदीयमङ्गजातं तदारम्भपूर्वोत्तरकालानुष्ठेयमस्मिन्नधिकरणेऽभिधीयते।

तत्र प्रथमं सूत्रं—**स्कन्धावारनिवेश** इति। युद्धभूम्यासन्नं सैन्यावासस्थानं स्कन्धावारः तस्य निवेशो निर्माणमुच्यत इति सूत्रार्थः।

वास्तुकप्रशस्त इति। वास्तुविद्याविचक्षणश्लाघिते, वास्तुनि प्रदेशे नायकवर्धकिमौहूर्तिकाः नायकः सेनापतिः वर्धकिः स्थपतिः मौहूर्तिकः निर्माणारम्भार्थशुभकालनिश्चायकः इत्येते मिलिताः, स्कन्धावारं, वृत्तं दीर्घं चतुरश्रं वा, भूमिवशेन वा निर्माणभूमियोग्यतानुगुण्येनान्यादृशाकारं वेत्यर्थः, चतुर्द्वारं पूर्वतः पश्चिमतो दक्षिणत उत्तरतश्चेति चतुर्भिर्द्वारैरुपेतं, षट्पथं दुर्गनिवेशोक्तरीत्या प्राक्प्रत्यगायतैस्त्रिभिः दक्षिणोत्तरायतैस्त्रिभिरिति षड्भिः पथिभिर्युक्तं, नवसंस्थानं नवसंख्यसन्निवेशं, मापयेयुः निर्मापयेयुः। **खातेत्यादि**। खातं परिखा वप्रं प्राकाराधारः सालः प्राकारः द्वारं गोपुरम् अट्टालकः उपरिगृहम् एतैः सम्पन्नं युक्तं, मापयेयुरिति सम्बध्यते। कदैवम्भूतं मापयेयुः, भये स्थाने च पराघातभये चिरावस्थाने च, सम्भाविते इति शेषः।

मध्यमस्येति। वास्तुहृदयस्य, उत्तरे उदग्भवे, नवभागे नवमांशे, राजवास्तुकं राजवासस्थानं, धनुश्शतायामं धनुश्शतदीर्घम्, अर्धविस्तारं पञ्चाशद्धनुर्विस्तारं, कार्यमिति शेषः। मापयेयुरिति वा वर्तते। **पश्चिमार्धे तस्येति**। राजवास्तुकस्य पश्चिमभागे, अन्तःपुरं राजस्त्रीवासस्थानं, कार्यम्। **अन्तर्वंशिकसैन्यं चेति**। अन्तःपुररक्षिसैन्यं च, अन्ते अन्तःपुरसमीपे, निविशेत निवेशं लभेत। **पुरस्तादिति**। राजवास्तुकस्य पुरोभागे, उपस्थान

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुपस्थानं, दक्षिणतः कोशशासनकार्यकरणानि, वामतो राजोपवाह्यानां हस्त्यश्वरथानां स्थानम्। अतो धनुश्शतान्तराश्चत्वारः शकटमेथीप्रततिस्तम्भसालपरिक्षेपाः। प्रथमे पुरस्तान्मन्त्रिपुरोहितौ, दक्षिणतः कोष्ठागारं महानसं च, वामतः कुप्यायुधागारम्। द्वितीये मौलभृतानां स्थानम् अश्वरथानां, सेनापतेश्च। तृतीये हस्तिनः श्रेण्यः प्रशास्ता च। चतुर्थे विष्टिर्नायको मित्रामित्राटवीबलं स्वपुरुषाधिष्ठितम्। वणिजो रूपाजीवाश्चानुमहापथम्। बाह्यतः लुब्धकश्वगणिनः सत्रयाग्रयः गूढाश्चारक्षाः।

उपतिष्ठन्ते सन्दर्शनार्थिनो राजानमत्रेत्युपस्थानगृहं, कर्तव्यमिति शेषः। **दक्षिणत** इति। दक्षिणभागे, कोशशासनकार्यकरणानि कोशो रत्नादिस्थानं शासनकरणम् अक्षपटलं कार्यकरणं व्यवहारदर्शनस्थानम् इत्येतानि, कर्तव्यानि। **वामत** इति। वामभागे, राजोपवाह्यानां राजवाहनानां, हस्त्यश्वरथानां, स्थानं कर्तव्यम्। **अत** इति। राजवास्तुकात् परतः, धनुश्शतान्तराः धनुश्शतपरिमाणपरस्परान्तरालाः, चत्वारः, शकटमेथीप्रततिस्तम्भसालपरिक्षेपाः शकटैः कृतः परिक्षेपः प्रथमः मेथ्यः कण्टकिवृक्षशाखाः तासां प्रततिभिः प्रकृष्टाभिस्ततिभिः कृतः परिक्षेपो द्वितीयः स्तम्भैर्दारुमयैः कृतः परिक्षेपस्तृतीयः सालः प्राकारः तत्कृतः परिक्षेपश्चतुर्थ इत्येते, रक्षार्थं कर्तव्या इति शेषः। **प्रथम** इति। तेष्वादिमे शकटपरिक्षेपे, पुरस्तात् प्राग्भागे मन्त्रिपुरोहितौ, निवेशनीयाविति शेषः, दक्षिणतः कोष्ठागारं धान्यादिस्थानं, महानसं च पाकशाला च। इह 'अध्यक्षा गुप्तिस्थानं च' इत्यधिकपाठो नयचन्द्रिकायां प्रतिभाति। तत्र अध्यक्षाः समाहर्त्रादयः, गुप्तिस्थानम् आरक्षकबलस्थानम्। वामतः कुप्यायुधागारं कुप्यगृहम् आयुधशाला च, निवेशनीयानि। **द्वितीय** इति। मेथीप्रततिपरिक्षेपे, मौलभूतानां सैन्यानाम्, अश्वरथानां, सेनापतेश्च, स्थानं कार्यम्। **तृतीय** इति। स्तम्भपरिक्षेपे, हस्तिनः, श्रेण्यः श्रेणीबलानि, श्रेण्य इत्येतत्स्थाने गोण्य इत्यपपाठः। 'काम्बोजकसौराष्ट्रादयः' इति तु व्याचष्टे माधवः। प्रशास्ता च कण्टकशोधनाध्यक्षश्च, निवेश्याः। **चतुर्थ** इति। सालपरिक्षेपे, विष्टिः कर्मकरवर्गः, नायकः सेनापतिदशकपतिः, मित्रामित्राटवीबलं स्वपुरुषाधिष्ठितं स्वपुरुषनेतृकं मित्राणाम् अमित्राणां क्रयाद्यधिगतानाम् आटविकानां च बलं, निविशेतेति शेषः। **वणिज** इति। ते, रूपाजीवाश्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शत्रूणामापाते कूपकूटावपातकण्टकिनीश्च स्थापयेत् । अष्टादशवर्गाणामारक्षविपर्यासं कारयेत् । दिवायामं च कारयेदपसर्पज्ञानार्थम् । विवादसौरिकसमाजद्यूतवारणं च कारयेत् । मुद्रारक्षणं च । सेनानिवृत्तमायुधीयमशासनं शून्यपालोऽनुबध्नीयात् ॥

पुरस्तादध्वनः सम्यक् प्रशास्ता रक्षणानि च ।
यायाद् वर्धकिविष्टिभ्यामुदकानि च कारयेत् ॥

इति कौटलीयार्थशास्त्रे सांग्रामिके दशमेऽधिकरणे
प्रथमोऽध्यायः स्कन्धावारनिवेशः,
आदितः एकोनत्रिंशच्छततमः ॥

वेश्याश्च, अनुमहापथं राजपथसमीपे, निविशेरन् । बाह्यत इति । सर्वबहिर्देशे, लुब्धकश्वगणिनः व्याधाः श्वगणजीविनश्च, सतूर्याग्नयः शत्रुबलागमनमात्मना विज्ञातं तूर्यघोषणेनाग्निदीपनधूपनैश्च राजादिभ्यः प्रकाशयितुं तूर्याग्निसहिताः, गूढाश्चारक्षाः गोपालादिवेषच्छन्नाः रक्षिपुरुषाश्च शत्रुचारग्रहणार्थाः, निविशेरन्निति शेषः ।

शत्रूणामापात इति । येन मार्गेण शत्रूणामापतनं सम्भाव्यते तस्मिन् मार्गे, कूपकूटावपातकण्टकिनीश्च कूटकूपान् तृणच्छन्नान् कूपान् अवपातान् गर्तान् कण्टकिनीः कण्टकयुक्ताः फलकाश्च, स्थापयेत् । अष्टादशवर्गाणां मौलभृतादीनां षण्णां प्रत्येकं पदिकसेनापतिनायकलक्षणैः पतिभिस्त्रिभिर्योगादष्टादशत्वं प्राप्तानां बलानाम्, आरक्षविपर्यासम् अधिष्ठातृव्यत्ययं, कारयेत्, अर्थात् शत्रूपजापपरिहारार्थम् । दिवायामं च दिवासंचारनियमं च, कारयेत्, किमर्थम्, अपसर्पज्ञानार्थं परचारज्ञानार्थम् ।

विवादेत्यादि । विवादः परस्परविप्रतिपत्तिः सौरिकं सुरा मद्यपाने समाजः कौतुकगोष्ठी द्यूतम् अक्षादिदेवनम् एभ्यो वारणं च, अर्थात् सैनिकानां, कारयेत् । मुद्रारक्षणं च प्रवेशनिर्गमयोरनुमतिचिह्नभूतराजकीयमुद्राप्रदर्शननियम इह मुद्रा तस्या रक्षणमनुवर्तनं च, कारयेत् ।

सेनानिवृत्तमिति । योद्धुं गतायाः सेनायाः निवृत्तं निवृत्य स्थानीयप्राप्तम्, आयुधीयम् आयुधजीविनम्, अशासनं निवृत्त्यनुमतिलेखरहितं, शून्यपालः सपरिकरराजरहितं स्थानीयं शून्यं तत्पालकः, अनुबध्नीयाद् अनुसरेद् गृह्णीयादित्यर्थः । अन्तपाल इति क्वचित् पाठः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरस्तादिति । प्रशास्ता कण्टकशोधनाध्यक्षः, पुरस्तात् सपरिकरराजप्रस्थानात् प्रागेव, वर्धकिविष्टिभ्यां स्थपतिकर्मकराध्यक्षाभ्यां सह, यायात् । पुरस्ताद्यानस्य फलमाह — अध्वनो रक्षणानि च विषमसमीकरणकण्टकापनयनदुष्टसत्त्वप्रतिरोधकाद्युत्सारणानि च, उदकानि च निर्जलप्रदेशे जलानि च, कारयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां साङ्ग्रामिके दशमेऽधिकरणे
प्रथमोऽध्यायः स्कन्धावारनिवेशः,
आदित एकोनत्रिंशदुत्तरशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४८, १४९. प्रक. स्कन्धावारप्रयाणं बलव्यसनावस्कन्दकालरक्षणं च ।

ग्रामारण्यानामध्वनि निवेशान् यवसेन्धनोदकवशेन परिसङ्ख्याय स्थानासनगमनकालं च यात्रां यायात् । तत्प्रतीकारद्विगुणं भक्तोपकरणं वाहयेत् । अशक्तो वा सैन्येष्वायोजयेत् । अन्तरेषु वा निचिनुयात् ।

पुरस्तान्नायकः । मध्ये कलत्रं स्वामी च । पार्श्वयोरश्वा बाहूत्सारः । चक्रान्तेषु हस्तिनः । प्रसारवृद्धिर्वा सर्वतः । वनाजीवः प्रसारः । स्वदेशादन्वायतिर्वीवधः । मित्रबलमासारः, कलत्रस्थानमपसारः । पश्चात् सेनापतिः पर्यायान्निविशेत ।

स्कन्धावारप्रयाणमिति सूत्रम् । यथोक्तरीत्या निर्मितं स्कन्धावारमुद्दिश्य राज्ञः सपरिकरस्य प्रयाणमुच्यत इति सूत्रार्थः ।

ग्रामारण्यानामिति । ग्रामाणामरण्यानां च, अध्वनि, निवेशान् निवेशयोग्यदेशान्, यवसेन्धनोदकवशेन तृणकाष्ठजलयोगवशेन, परिसंख्याय इयत्तया निर्णीय, स्थानासनगमनकालं च स्थानं पक्षमासाद्यवस्थानम् आसनं पञ्चषदिनाद्यवस्थानं गमनम् एकरात्रमात्रावस्थानम् एषां कालं च, परिसंख्याय, यात्रां यायात् । **तत्प्रतीकारद्विगुणमिति** । परिसंख्यातदेशकालपर्याप्तभक्तोपकरणतो द्विगुणं, भक्तोपकरणं भक्तं तण्डुलादि उपकरणं वस्त्रादि च, वाहयेत् वाहनमारोप्य नयेत् । **अशक्तो वेति** । वाहयितुमशक्तश्चेत्, सैन्येषु, आयोजयेत् वहनीयत्वेनार्पयेत् । अन्तरेषु वा तत्तन्निवेशप्रदेशेषु वा, निचिनुयात् पूर्वमेव निचित्य स्थापयेत् ।

यातृयानक्रममाह — **पुरस्तादिति** । सेनाया अग्रे, नायकः सेनापतिदशकपतिः । यायादिति शेषः । मध्ये कलत्रं दारादिकं, स्वामी च राजा च, यायात् । पार्श्वयोः अश्वाः अश्वरूपो दण्डो यायादित्यर्थः । स च बाहुभ्यां पराभिघातवारणार्थ इत्याह — **बाहूत्सार** इति । बाहुभ्याम् उत्सारयति पराभ्याघातं वारयतीति तथा । चक्रान्तेषु सेनायाः पश्चाद्भागेषु, हस्तिनः, गच्छेयुः । **प्रसारवृद्धिर्वा सर्वत** इति । वन्यमुपजीव्यं व्रीहितृणादिद्रव्यं प्रसारः तस्य वृद्धिः प्रभूतः प्रसार इत्यर्थः, स च सर्वतः, यायात् । प्रसारपदार्थमाह — **वनाजीव** इत्यादि । तत्प्रसङ्गाद् विवधादीनाह—**स्वदेशादिति** । आत्मनो जनपदाद्, अन्वायतिः अविच्छिन्न आजीवद्रव्यागमः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरस्ताद् अभ्याघाते मकरेण यायात्, पश्चाच्छकटेन, पार्श्वयोर्वज्रेण, समन्ततः सर्वतोभद्रेण, एकायने सूच्या।

पथिद्वैधीभावे स्वभूमितो यायात्। अभूमिष्ठानां हि स्वभूमिष्ठा युद्धे प्रतिलोमा भवन्ति। योजनमधमा, अध्यर्धं मध्यमा, द्वियोजनमुत्तमा, संभाव्या वा गतिः।

आश्रयकारी, सम्पन्नघाती, पार्ष्णिरासारो मध्यम उदासीनो।

विधः, सोऽपि सर्वतो गच्छेदित्यर्थः। मित्रबलम् आसारः आसारशब्दितं, कलत्रस्थानम्, अपसारः अपसारशब्दितम्। तदुभयमपि सुरक्षितं यायादित्यार्थम्। पश्चादिति। सेनायाः पश्चाद्भागे, सेनापतिः, पर्यायात् स्वस्वसेनापश्चाद्भागक्रमात्, निविशेत तिष्ठेत्।

पुरस्तादिति। पुरोभागे, अभ्याघाते पराभिघाते शङ्क्यमाने, मकरेण भोगाख्यस्य प्रकृतिव्यूहविशेषस्य प्रभेदो मकरो नाम दण्डभोगमण्डलासंहतव्यूहव्यूहनप्रकरणे वक्ष्यमाणः तेन, यायात्। पश्चाद् अभ्याघाते, शकटेन तदाख्येन भोगभेदेन, यायात्। पार्श्वयोः अभ्याघाते, वज्रेण असंहताख्यस्य प्रकृतिव्यूहस्य प्रभेदो वज्रः तेन, यायात्। समन्ततः अभ्याघाते, सर्वतोभद्रेण मण्डलाख्यस्य प्रकृतिव्यूहस्य प्रभेदः सर्वतोभद्रः तेन, यायात्। एकायने एकैकमात्रगन्तव्ये मार्गे, सूच्या तदाख्येन मण्डलभेदेन, यायात्।

पथिद्वैधीभाव इति। पथो मार्गस्य द्वैधीभावे भूम्यानुगुण्यानानुगुण्याभ्यां द्विरूपत्वे सति, स्वभूमितो यायात् स्वरथाश्वपदातिहस्त्यनुगुणया भूम्या गच्छेत्। सा च युद्धभूमिप्रकरणे वक्ष्यते। स्वभूमितो यानस्य फलमाह — अभूमिष्ठानां हीति। तेषां हि, स्वभूमिष्ठाः, युद्धे, प्रतिलोमा अनाक्रमणीयाः, भवन्ति। कियान् अध्वा दिवस एकस्मिन् गन्तव्य इत्याह — योजनमधमेत्यादि। योजनं षड्गोरुतं तत्परिच्छिन्ना गतिरवरा, सार्धयोजनपरिच्छिन्ना मध्यमा, द्वियोजनपरिच्छिन्ना उत्तमा। उक्ताधिकपरिमाणापि देशकालाद्यानुगुण्येन गतिः सम्भाव्यत इत्याह — सम्भाव्या वा गतिरिति।

प्रस्थितस्य शनैर्यानशीघ्रयानयोर्निमित्तान्याह — आश्रयकारीति। आत्मोदयार्थं कमप्याश्रयं करिष्यन्। एतदादिषु 'इति शनैर्यायादि'ति सम्बध्यते। आत्मोदयार्थं कञ्चिदाश्रयं करिष्यामीत्यस्मिन् निमित्ते शनैर्यायादित्यर्थः। सम्पन्नघातीति शत्रुदेशं सम्पन्नं हनिष्यामीत्यस्मिन् निमित्ते, पार्ष्णिः पार्ष्णि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वा प्रतिकर्तव्यः, सङ्कटो मार्गः शोधयितव्यः, कोशो दण्डो मित्रामित्राटवीबलं विष्टिः ऋतुर्वा प्रतीक्ष्याः, कृतदुर्गकर्मनिचयरक्षाक्षयः क्रीतबलनिर्वेदो मित्रबलनिर्वेदश्चागमिष्यति, उपजपितारो वा नातित्वरयन्ति, शत्रुरभिप्रायं वा पूरयिष्यति इति शनैर्यायात्। विपर्यये शीघ्रम्।

हस्तिस्तम्भसङ्क्रमसेतुबन्धनौकाष्ठवेणुसङ्घातैः, अलाबुचर्मकरण्डदृतिप्लवगण्डिकावेणिकाभिश्चोदकानि तारयेत्।

तीर्थाभिग्रहे हस्त्यश्वैरन्यतो रात्रावुत्तार्य सत्रं गृह्णीयात्।

ग्राहः, आसारः मित्रबलं, मध्यमः अरिविजिगीष्वोर्भूम्यनन्तरो विदिक्स्थः, उदासीनो वा अरिविजिगीषुमध्यमप्रकृतिवाह्यो वा, प्रतिकर्तव्य इति प्रशमितकोपः कर्तव्य इत्यस्मिन् निमित्ते। सङ्कटो मार्गः शोधयितव्य इति विषमो मार्गः सुगमतां नेतव्य इत्यस्मिन् निमित्ते। कोशो धनसंग्रहः, दण्डः स्वसैन्यं विक्षिप्तं मिलिष्यत्, मित्रामित्राटवीबलं मित्रामित्राटविकानां सैन्यं साहाय्यार्थमागमिष्यत्, विष्टिः कर्मकरवर्गः, ऋतुर्वा स्वबलसामर्थ्यानुरूपयुद्धयोग्यः कालो वा, प्रतीक्ष्या इति प्रतिपाल्या इत्यस्मिन् निमित्ते। कृतदुर्गकर्मनिचयरक्षाक्षयः कृतस्य शत्रुणा पूर्वमनुष्ठितस्य दुर्गकर्मणः स्वदुर्गसंस्कारस्य निचयस्य धान्यादिसञ्चयस्य रक्षायाश्च क्षयः, क्रीतबलनिर्वेदः धनदानस्वीकृतस्य सैन्यस्य निर्वेदः, मित्रबलनिर्वेदश्च मित्रबलस्य साहाय्यागतस्य निर्वेदश्च, अर्थात् कालविलम्बनिमित्तः, आगमिष्यति शत्रोः सम्भविष्यति, इत्यस्मिन् निमित्ते। उपजपितारो वा शत्रवभियोगार्थमस्मानुपजपन्तः शत्रुदूष्या इत्यर्थः, नातित्वरयन्ति अभियोगेऽतित्वरां कर्तव्यां नेच्छन्ति, इत्यस्मिन् वा निमित्ते। शत्रुः, अभिप्रायं विजिगीषुमनोरथं, पूरयिष्यति ऋते युद्धात् सफलयिष्यति, इत्यस्मिन् वा निमित्ते, शनैर्यायात्। विपर्यये यथोक्तनिमित्ताभावे, शीघ्रं यायात्।

सैन्यस्य नद्यादितरणोपायानाह — हस्तिस्तम्भेत्यादि। हस्तिभिः गजैः स्तम्भसंक्रमैः स्तम्भानामुपरि दारुफलकादिघटनया कल्पितैः संक्रमैः सेतुबन्धैः नौभिः काष्ठसंघातैः वेणुसंघातैश्च, अलाबुचर्मकरण्डादिभिश्च अलाबुभिस्तुम्बीफलकोशैः चर्मकरण्डैश्चर्मावनद्धैर्विदलभाजनैः दृतिभिर्भस्त्राभिः प्लवैरुडुपैः गण्डिकाभिः प्लवनकाष्ठैरिति माधवः वेणिकाभिः रज्जुभिश्च, उदकानि तारयेत्।

तीर्थाभिग्रह इति। तीर्थस्यावतरणस्थानस्य अभिग्रहे परप्रतिरोधे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुदके चक्रिचतुष्पदं चाध्वप्रमाणेन शक्त्योदकं वाहयेत् ।

दीर्घकान्तारमनुदकं यवसेन्धनोदकहीनं वा कृच्छ्राध्वानमभियोगप्रस्कन्नं क्षुत्पिपासाध्वक्लान्तं पङ्कतोयगभीराणां वा नदीदरीशैलानामुद्यानापयाने व्यासक्तम् एकायनमार्गे शैलविषमे सङ्कटे वा बहुलीभूतं निवेशे प्रस्थिते विसन्नाहं भोजनव्यासक्तम् आयतगतपरिश्रान्तमवसुप्तं व्याधिमरकदुर्भिक्षपीडितं व्याधितपत्त्यश्वद्विपमभूमिष्ठं वा बलव्यसनेषु वा स्वसैन्यं रक्षेत् । परसैन्यं चाभिहन्यात् ।

शङ्कचमाने, हस्त्यश्वैः साधनैः, अन्यतः अतीर्थे, रात्रौ अन्याविदित इत्यर्थः, उत्तार्य, सत्रं धान्वनसङ्कटादिकं कूटयुद्धविकल्पप्रकरणे वक्ष्यमाणं, गृह्णीयात् ।

अनुदकाध्वकरणीयमाह — **अनुदक** इति । तस्मिन्, चक्रिचतुष्पदं चक्रीणि शकटानि चतुष्पदान् बलीवर्दादींश्च, अध्वप्रमाणेन निरुदकमार्गप्रमाणपर्याप्तप्रमाणेन युक्तं, शक्त्या वोढृशक्त्यानुगुण्येन, उदकं वाहयेत् । इत्थं स्कन्धावारप्रयाणं व्युत्पादितम् । अथ

बलव्यसनावस्कन्दकालरक्षणमिति सूत्रम् । अमानितविमानितादीनि बलव्यसनानि अवस्कन्दकाला दीर्घकान्तारगमनादिकाला 'दीर्घकान्तारमनुदकमि'त्यादिना वक्ष्यमाणाः तेभ्यः स्वबलरक्षणमुच्यत इति सूत्रार्थः ।

दीर्घकान्तारमित्यादि । दीर्घं कान्तारं दुर्गमो गन्तव्यमार्गो यस्य तत् तथाभूतं, स्वसैन्यं रक्षेत् । अनुदकम् अलभ्यमार्गजलं स्वसैन्यं रक्षेत् । एवमुत्तराण्यपि विशेषणानि प्रत्येकं योज्यानि । यवसेन्धनोदकहीनं वा तृणकाष्ठजलरहितं वा, उदकस्य पुनर्ग्रहणं प्राधान्यद्योतनार्थम् । कृच्छ्राध्वानं कष्टलङ्घ्यमार्गमध्यगतम् । कृच्छ्राध्वगतमिति क्वचित् पाठः । अभियोगप्रस्कन्नं चिराभियोगावसन्नं, क्षुत्पिपासाध्वक्लान्तम् अशनायोदन्यामार्गगमनैः परिश्रान्तम्, पङ्कतोयगभीराणां वा नदीदरीशैलानाम् अगाधपङ्कानामगाधतोयानां च नदीनां कन्दरपर्वतयोश्च, उद्यानापयाने आरोहणेऽवरोहणे च, व्यासक्तं व्याप्तम् । एकायनमार्गे एकमात्रगन्तव्ये मार्गे, शैलविषमे सङ्कटे वा पर्वतदन्तुरे दुर्गप्रदेशे वा, बहुलीभूतं समूहितम् । निवेशे अवस्थाने, प्रस्थिते यात्रायां, विसन्नाहं शस्त्रावरणादिरहितम् । भोजनव्यासक्तं भोजनव्याप्तम्, आयतगतपरिश्रान्तं दीर्घाध्वगमनपरिखिन्नम् । अवसुप्तं प्राप्तनिद्रम् । व्याधिमरकदुर्भिक्षपीडितं रोगेण सङ्घातमृत्युना सुभिक्षविरहेण वा पीडितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकायनमार्गप्रयातस्य सेनानिश्चारग्रासाहारशय्याप्रस्ताराग्नि-निधानध्वजायुधसङ्ख्यानेन परबलज्ञानम् । तदात्मनो गूहयेत् ॥

पार्वतं वनदुर्गं वा सापसारप्रतिग्रहम् ।
स्वभूमौ पृष्ठतः कृत्वा युध्येत निविशेत च ॥

इति कौटलीयार्थशास्त्रे साङ्ग्रामिके दशमाधिकरणे द्वितीयोऽध्यायः
स्कन्धावारप्रयाणं, बलव्यसनावस्कन्दकालरक्षणं च,
आदितस्त्रिंशच्छततमः ॥

व्याधितपत्त्यश्वद्विपं रुग्णपङ्गुहयगजम् । अभूमिष्ठं वा स्वयुद्धाननुरूपभूमि-स्थितं वा । बलव्यसनेषु वा तत्र स्थितं वा, स्वसैन्यं रक्षेत् । परसैन्यं च उक्तविशेषयुक्तमित्यार्थम्, अभिहन्यात् ।

परेण सह विग्रहस्य सन्धेर्वानुष्ठाने तद्बलेयत्ताज्ञानस्यापेक्षितत्वात् तदु-पायमाह — **एकायनमार्गप्रयातस्येति** । एकैकमात्रगम्येन मार्गेण प्रस्थि-तस्य शत्रोः, सेनानिश्चारग्रासाहारादिसंख्यानेन सेनानिश्चारसंख्यानेन एका-यनमार्गेणैकैकशो निश्चरत्सैनिकव्यक्तिपरिगणनेन ग्रासो गजादिभोज्यं तत्सं-ख्यानेन आहारो योद्धृपुरुषभोज्यं तत्संख्यानेन शय्याप्रस्तारः शयनीया-स्तरणं तत्संख्यानेन अग्निनिधानं चुल्ली तत्संख्यानेन ध्वजसंख्यानेन आयुध-संख्यानेन च, परबलज्ञानं शत्रुसैन्ययत्तानिश्चयः, कार्य इति शेषः । **तदा-त्मन इति** । आत्मीयं सेनानिश्चारादिकमायुधान्तं स्वबलेयत्ताज्ञापकजातं, गूहयेत् संवृणुयात् ॥

पार्वतमिति । 'प्रस्तरं गुहां वा पार्वतम्' इति दुर्गविधानोक्तलक्षणं पर्वतकृतं दुर्गं, वनदुर्गं वा 'खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम्' इत्युक्त-लक्षणं वा, सापसारप्रतिग्रहं पराजयेष्वपसरणस्थानमपसारः अभ्यापतत्पर-बलप्रतिग्रहणस्थानं प्रतिग्रहः ताभ्यां सहितं, पृष्ठतः कृत्वा सज्जीकृत्येत्यर्थः, स्वभूमौ आत्मानुगुणायां भूमौ, युध्येत निविशेत च ॥

इति कौटलीयार्थशास्त्रव्याख्यायां सांग्रामिके दशमेऽधिकरणे द्वितीयोऽध्यायः
स्कन्धावारप्रयाणं बलव्यसनावस्कन्दकालरक्षणं च,
आदितस्त्रिंशदुत्तरशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१५०—१५२. प्रक. कूटयुद्धविकल्पाः, स्वसैन्योत्साहनं, स्वबलान्यबलव्यायोगश्च ।

बलविशिष्टः कृतोपजापः प्रतिविहितर्तुः स्वभूम्यां प्रकाशयुद्धमुपेयात् ; विपर्यये कूटयुद्धम् ।

बलव्यसनावस्कन्दकालेषु परमभिहन्यात् । अभूमिष्ठं वा स्वभूमिष्ठः । प्रकृतिप्रग्रहो वा स्वभूमिष्ठं दूष्यामित्राटवीबलैर्वा भङ्गं दत्त्वा विभूमिप्राप्तं हन्यात् । संहतानीकं हस्तिभिर्भेदयेत् ।

पूर्वं भङ्गप्रदानेनानुप्रलीनं भिन्नमभिन्नं प्रतिनिवृत्य हन्यात् । पुर-

---

कूटयुद्धविकल्पा इति सूत्रम् । कपटेन पराभिहननं कूटयुद्धं तस्य भेदा अभिधीयन्त इति सूत्रार्थः ।

कूटयुद्धस्य कदा प्रसङ्ग इत्याह—बलविशिष्ट इति । बलेन विशिष्टः शौर्यतः परिमाणेन च परबलादभ्यधिकेन स्वीयबलेन परापेक्षया प्रकृष्टः, कृतोपजापः, प्रतिविहितर्तुः सम्पादितयुद्धयोग्यकालः, स्वभूम्यां स्वयोग्ये देशे, प्रकाशयुद्धम्, उपेयात् अङ्गीकुर्यात् । विपर्यये बलविशिष्टत्वादिविरहे, कूटयुद्धम्, उपेयात् ।

पराभिहननकालविशेषानाह — बलव्यसनावस्कन्दकालेष्विति । बलव्यसनेषु अमानितविमानितत्वादिषु, अवस्कन्दकालेषु च दीर्घकान्तारानुदकत्वादिषु, परम् अभिहन्यात् । अभूमिष्ठं वा स्वीयबलाननुगुणभूमिस्थितं वा परं, स्वभूमिष्ठः स्वबलानुगुणभूमिस्थितः, अभिहन्यात् । प्रकृतिप्रग्रहो वेति । प्रकृतिं परकीयां प्रगृह्णाति उपजापेन स्वायत्तीकरोतीति तथाभूतो वा भवन्, स्वभूमिष्ठं परम् अभिहन्यात् । दूष्यामित्राटवीबलैर्वेति । स्वीयानि यानि दूष्यबलानि अभित्रबलानि आटविकबलानि च तैर्विजिगीषोर्युद्धसहायभूतैर्निमित्तैः, भङ्गं दत्त्वा तेषु पराजयमाधायेत्यर्थः, विभूमिप्राप्तं स्वजयविश्वासात् स्वाननुगुणभूमिगतं परं, हन्यात् । संहतानीकमिति । स्वभूमौ संहत्य स्थितं परबलं, हस्तिभिः, भेदयेत् भेदयित्वाभिहन्यात् ।

पूर्वमिति । प्रथमं, भङ्गप्रदानेन परपराजयेन हेतुना, अनुप्रलीनं, भिन्नं सङ्घाद् विश्लिष्य तत इतः स्थितं परानीकमित्यर्थः, अभिन्नं संहतं विजिगीष्वनीकं कर्तृ, प्रतिनिवृत्य प्रत्यावृत्य, हन्यात् । इह 'पूर्वभङ्गे'ति समस्तमपि पठ्यते । पुरस्तादित्यादि । प्रचलम् अभिघातसिद्ध्या निवृत्तम् । विमुखं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तादभिहत्य प्रचलं विमुखं वा पृष्ठतो हस्त्यश्वेनाभिहन्यात्। पृष्ठतोऽभिहत्य प्रचलं विमुखं वा पुरस्तात् सारबलेनाभिहन्यात्।

ताभ्यां पार्श्वाभिघातौ व्याख्यातौ। यतो वा दूष्यफल्गुबलं ततोऽभिहन्यात्।

पुरस्ताद्विषमायां पृष्ठतोऽभिहन्यात्। पृष्ठतोविषमायां पुरस्ताद-भिहन्यात्। पार्श्वतोविषमायाम् इतरतोऽभिहन्यात्।

दूष्यामित्राटवीबलैर्वा पूर्वं योधयित्वा श्रान्तमश्रान्तः परमभि-हन्यात्। दूष्यबलेन वा स्वयं भङ्गं दत्त्वा 'जितम्' इति विश्वस्तमवि-श्वस्तः सत्रापाश्रयोऽभिहन्यात्। सार्थव्रजस्कन्धावारसंवाहविलोपप्रम-त्तमप्रमत्तोऽभिहन्यात्। फल्गुबलावच्छन्नः सारबलो वा परवीरानप्र-विश्य हन्यात्। गोग्रहणेन श्वापदवधेन वा परवीरानाकृष्य सत्रच्छ-न्नोऽभिहन्यात्।

वा भङ्गपलायितं वा। हस्त्यश्वेन हस्तिभिरश्वैश्च। पृष्ठत इति। पृष्ठानुसारेण, अभिहत्य, प्रचलं निवर्तमानं, विमुखं वा पुरस्तात्, सारबलेन शौर्यवता सैन्येन, अभिहन्यात्।

पुरस्तात्पृष्ठतोभिघातवत् पार्श्वतोभिघातावपि द्रष्टव्यावित्याह—ता-भ्यामित्यादि। एकस्मिन् पार्श्वेऽभिहत्य प्रचलमपरस्मिन् पार्श्वेऽभिहन्यादि-त्यर्थः। यत इति। यत्र, दूष्यफल्गुबलं शत्रुदूष्याणां निस्सारं बलं, ततः तत्र अभिहन्यात्।

भूम्यपेक्षयाभिहननमाह—पुरस्ताद्विषमायामित्यादि। इतरतः अवि-षमेऽन्यस्मिन् पार्श्वे। अत्राविषमासु भूमिष्वभिहननविधिरभिघातोपद्रवारब्ध-पलायनानां विषमासु पातनं यथा स्यादित्येवमर्थम्।

दूष्यामित्राटवीबलैर्वेति। तैर्वा स्वकीयैः, पूर्वं योधयित्वा, श्रान्तं तद्वशात् खिन्नं, परम्, अश्रान्तः अभिहन्यात्। दूष्यबलेन वेति। अभक्ति-योधित्वात् सुकरभङ्गेन स्वीयेन दूष्यसैन्येन स्वयं प्रथमोपस्थापितेन निमित्तेन, भङ्गं दत्त्वा तत्पराजयमुत्पाद्य, जितमिति विश्वस्तं 'जयो मे लब्ध' इत्युपजात-विश्वासम्, अविश्वस्तः, सत्रापाश्रयः सत्रम् अनुपदं वक्ष्यमाणमाश्रितः सन्, अ-भिहन्यात्। सार्थेत्यादि। सार्थव्रजस्कन्धावाराणां वणिक्सङ्घगोकुलसेनानिवे-शानां संवाहे सम्यग्वहने रक्षणे विलोपे लुण्टने च प्रमत्तम्, अप्रमत्तः अभि-हन्याद् वा। अन्तश्शूरं स्वबलं बहिरशूरपुरुषच्छन्नं कृत्वा तेन शत्रुवीरान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रात्राववस्कन्देन जागरयित्वानिद्राक्रान्तानवसुप्तान् वा दिवा हन्यात् । सपादचर्मकोशैर्वा हस्तिभिः सौप्तिकं दध्यात् । अहस्सन्नाहपरिश्रान्तानपराह्णेऽभिहन्यात् । शुष्कचर्मवृत्तशर्कराकोशकैर्गोमहिषोष्ट्रयूथैर्वा त्रस्तुभिरकृतहस्त्यश्वं भिन्नमभिन्नः प्रतिनिवृत्तं हन्यात् । प्रतिसूर्यवातं वा सर्वमभिहन्यात् ।

धान्वनवनसङ्कटपङ्कशैलनिम्नविषमनावो गावः शकटव्यूहो नीहारो रात्रिरिति सत्राणि ।

अनुप्रविश्य हन्याद् वेत्याह — फल्गुबलावच्छन्न इत्यादि । गोग्रहणेनेति । परविषये गवां बलादपहरणेन, श्वापदवधेन वा व्याघ्रवराहादिवधेन वा, परवीरान् तत्प्रतिक्रियोद्यतान्, आकृष्य, सत्रच्छन्नः वनादिच्छन्नः, अभिहन्यात् ।

रात्राविति । तदा, अवस्कन्देन सौप्तिकापहारेण तत इत उत्पादितेन, जागरयित्वा तद्भयक्षीणनिद्रान् कृत्वा, अनिद्राक्रान्तान् निद्राविरहश्रान्तान्, अत एव अवसुप्तान्, दिवा अह्नि, हन्यात् । सपादचर्मकोशैरिति । पादेषु रक्षार्थचर्मकोशसहितैः, हस्तिभिः, सौप्तिकं दध्यात् सुप्तवधं कुर्यात् । अहस्सन्नाहपरिश्रान्तानिति । दिवा आप्राह्णमध्याह्नयुद्धव्यापारपरिखिन्नान्, अपराह्णे, अभिहन्यात् । शुष्कचर्मवृत्तशर्कराकोशकैरिति । शुष्कचर्मनिर्मिताः वृत्तशर्कराकोशाः वर्तुलाश्मप्रायमृद्विशेषखण्डगर्भाः कोशाः येषां तैस्तथाभूतैः, गोमहिषोष्ट्रयूथैः, त्रस्तुभिः कोशध्वनिश्रवणभीरुभिः, अकृतहस्त्यश्वम् अनवस्थापितहस्त्यश्वम्, भिन्नं तत इतो विक्षिप्तं, प्रतिनिवृत्तं युद्धव्यावृत्तं परबलम्, अभिन्नः सन्, हन्याद् वा । प्रतिसूर्यवातं सूर्यप्रतिमुखं चण्डवातप्रतिमुखं च, सर्वं सर्वविधं बलम्, अभिहन्यात् ।

'सत्रं गृह्णीयादि'ति 'सत्रापाश्रयोऽभिहन्याद्' इति च प्रागुक्तम् । कानि तानि सत्राणीत्यपेक्षायामाह — धान्वनेत्यादि । धान्वनं 'निरुदकस्तम्बमिरिणं वा धान्वनम्' इति लक्षितं मरुदुर्गं, वनं 'खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम्' इति लक्षितं वनदुर्गं, सङ्कटः गुल्मकण्टकलताकण्टकदुष्प्रवेशः प्रदेशः, पङ्कः कर्दमः, शैलः पर्वतः, निम्नं गभीरप्रदेशः, विषमं निम्नोन्नतदेशः, नौः तरीः, इत्येषां द्वन्द्वः । माधवस्तु 'विषममि'ति पठित्वा द्वन्द्वैकवद्भावमाह । नाव इति च न पठति । गावः गोयूथानि, शकटव्यूहः भोगव्यूहभेदो वक्ष्यमाणः, नीहारः अवश्याय, रात्रिः तमस्या, इति सत्राणि छन्नसञ्चारसाधनानि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वे च प्रहरणकालाः कूटयुद्धहेतवः।
सङ्ग्रामस्तु निर्दिष्टदेशकालो धर्मिष्ठः।

संहत्य दण्डं ब्रूयात् — 'तुल्यवेतनोऽस्मि; भवद्भिः सह भोग्यमिदं राज्यं; मयाभिहितः परोऽभिहन्तव्यः' इति। 'वेदेष्वप्यनुश्रूयते समाप्तदक्षिणानां यज्ञानामवभृथेषु —"सा ते गतिर्या शूराणाम्" इति; 'अपीह श्लोकौ भवतः —

"यान् यज्ञसङ्घैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति।
क्षणेन तानप्यतियान्ति शूराः प्राणान् सुयुद्धेषु परित्यजन्तः॥"

पूर्वे चेति। पूर्वोक्ताः प्रहरणकालाः, चकारात् सत्राणि च, कूटयुद्धहेतवः। इत्थं कूटयुद्धविकल्पा निरूपिताः। अथ

स्वसैन्योत्साहनमिति सूत्रम्। स्वसैन्यस्य प्रकाशयुद्धे समुद्योजनमभिधीयत इति सूत्रार्थः।

सङ्ग्रामस्त्विति। प्रकाशयुद्धं सङ्ग्रामः स तु, निर्दिष्टदेशकालः अमुकदेशे अमुककाले स्वपरसैन्यैः सन्निधाय योद्धव्यमिति सम्भाषितदेशकालः, धर्मिष्ठः धर्मादनपेतः। एतेन कूटयुद्धस्य पापीयस्त्वं प्रकाशयुद्धस्य तेनागतार्थत्वं चोक्तम्।

प्रोत्साहनप्रकारमाह — संहत्येति। सङ्घीभूय स्थितमिति शेषः। दण्डं स्वसैन्यम्, ब्रूयाद्, अर्थाद् राजा। कथम्, तुल्यवेतनोऽस्मि वेतनं लाभः भवल्लाभसमानलाभोऽस्मि। तुल्यलाभतामेव विशदयति — **भवद्भिः सह भोग्यमित्यादि**। नाहमेकाकी युद्धविजितं राज्यं भोक्ष्ये किन्तु भवत्सहित एव भोक्ष्य इत्यर्थः। तदर्थं भवद्भिरेतावत् कर्तव्यमित्याह — **मयाभिहित इत्यादि**। मया निर्दिष्टः, परः शत्रुः, अभिहन्तव्यः, अर्थाद् भवद्भिः। इति अनेन प्रकारेण ब्रूयादिति सम्बन्धः। इत्थं स्वयंवचनेन प्रोत्साहनमुक्त्वा मन्त्रिपुरोहितमुखेनापि प्रोत्साहनमाह — वेदेष्वपीत्यादि। सम्यगाप्तऋत्विग्दक्षिणानां यज्ञानामनुष्ठानसमाप्तिषु विषये फलमनुश्रूयत इत्यर्थः। अनुश्रूयमाणं मन्त्रवाक्यमाह — सा ते गतिर्या शूराणामितीति। युद्धत्यक्तजीवितानां शूराणां या गतिः सा सुसमापितयज्ञस्य तव भूयादिति तस्य वाक्यस्यार्थः। एतेन युद्धप्राणत्यागस्य भूरियज्ञानुष्ठानसमानफलत्वमुक्तम्। उक्तवेदार्थोपबृंहणपरौ श्लोकावपि प्रमाणभूतौ स्त इत्याह — अपीह श्लोकौ भवत इत्यादि।

यानित्यादि। यान् वाञ्छितार्थान्। यज्ञसङ्घैः क्रतुशतैरनुष्ठितैरि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नवं शरावं सलिलस्य पूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् ।
तत् तस्य मा भून्नरकं च गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत् ॥"
इति मन्त्रिपुरोहिताभ्यामुत्साहयेद् योधान् ।

व्यूहसम्पदा कार्तान्तिकादिश्चास्य वर्गः सर्वज्ञदैवसंयोगख्यापनाभ्यां स्वपक्षमुद्धर्षयेत् । परपक्षं चोद्वेजयेत् । 'श्वो युद्धम्' इति कृतोपवासः शस्त्रवाहनं चानुशयीत । अथर्वभिश्च जुहुयात् । विजययुक्ताः स्वर्गीयाश्चाशिषो वाचयेत् । ब्राह्मणेभ्यश्चात्मानमतिसृजेत् ।

शौर्यशिल्पाभिजनानुरागयुक्तमर्थमानाभ्यामविसंवादितमनीक-

त्यर्थः । तपसा कायसंक्लेशनलक्षणेन । पात्रचर्यैश्च पात्रशब्देन योग्यप्रतिग्रहीतृनिर्वर्त्यस्य दानस्य लक्षणात् तथाविधदानशतैरित्यर्थः । एवञ्च सुयुद्धप्राणत्यागिनां शूराणां यज्ञतपोदानशतलभ्यफलातिशायिफलभाक्त्वमनेन श्लोकेनोक्तमिति द्रष्टव्यम् ॥

नवमित्यादि । शरावं पात्रविशेषः । तद्धि उदकपूर्णं मन्त्राभिमन्त्रणसंस्कारयुक्तं दर्भसंवीतं युद्धजयाभ्युदयकालिकं प्राभृतं भर्तृपिण्डार्थमयुध्यमानस्य लभ्यं न भवति, नरके च स पततीति श्लोकार्थः ॥

इतीति । वेदेष्वपीत्याद्युक्तेन प्रकारेण, वादयित्वेति शेषः । मन्त्रिपुरोहिताभ्याम्, उत्साहयेद् योधान् ।

व्यूहसम्पदेति । अस्य राज्ञः, कार्तान्तिकादिः दैवज्ञनिमित्तज्ञादिः, वर्गश्च, व्यूहसम्पदा व्यूहानां राजकर्तृकाणां सैन्यविन्यासवैचित्र्याणां सम्पत् जयाव्यभिचारित्वगुणयोगः तया, सर्वज्ञदैवसंयोगख्यापनाभ्यां सर्वज्ञख्यापनेन त्रैकालिकफलसिद्धिज्ञत्वख्यापनेन दैवसंयोगख्यापनेन दैवसाक्षात्काररूयापनेन च, स्वपक्षम्, उद्धर्षयेद् उद्भूतहर्षं कुर्यात् । परपक्षं च, उद्वेजयेद् भग्नोत्साहं कुर्यात् । **श्वो युद्धमित्यादि** । श्वो युद्धमिति निश्चये सति अद्योपवासं कुर्वन् स्वीयशस्त्रवाहनयोरन्तिके रात्रौ शयीतेत्यर्थः । तयोरर्चनं त्वर्थाक्षिप्तं द्रष्टव्यम् । **अथर्वभिश्चेति** । शत्रुविध्वंसनैर्मन्त्रैश्च, जुहुयात् । **विजययुक्ता इत्यादि** । शत्रभिभवे श्रीप्राप्तिरूपविजयानुकूलाः, स्वर्गीयाश्च मरणे स्वर्गप्राप्त्यनुकूलाश्च, आशिषः, वाचयेत्, ब्राह्मणैरिति शेषः । **ब्राह्मणेभ्यश्चेति** । तेभ्यः, आत्मानम्, अतिसृजेत् स्वरक्षणार्थमर्पयेत् ।

शौर्यशिल्पेत्यादि । शौर्यशिल्पादिगुणयुक्तं भूमिहिरण्यादिदानच्छत्रा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गर्भं कुर्वीत । पितृपुत्रभ्रातृकाणामायुधीयानामध्वजं मुण्डानीकं राजस्थानम् । हस्ती रथो वा राजवाहनमश्वानुबन्धे । यत्प्रायः सैन्यो, यत्र वा विनीतः स्यात्, तदधिरोहयेत् । राजव्यञ्जनो व्यूहाधिष्ठानमायोज्यः ।

सूतमागधाः शूराणां स्वर्गमस्वर्गं भीरूणां जातिसङ्घकुलकर्मवृत्तस्तवं च योधानां वर्णयेयुः । पुरोहितपुरुषाः कृत्याभिचारं ब्रूयुः । सत्रिकवर्धकिमौहूर्तिकाः स्वकर्मसिद्धिमसिद्धिं परेषाम् ।

भरणादिबहुमानदानाभ्यां नित्यसंवादितं सैन्यं महासैन्यमध्ये स्थापयेत् स्वरक्षार्थमित्यर्थः । **पितृपुत्रभ्रातृकाणामिति** । पित्रादीनां राज्ञोऽन्तरङ्गसम्बन्धिनाम्, आयुधीयानां राजरक्षार्थधृतायुधानाम्, अध्वजं राजसम्बन्धित्वज्ञापकवेषरहितं, मुण्डानीकं मुण्डं शिरः तदिव प्रधानभूतं सैन्यं, राजस्थानं राजसमानस्थानं कुर्वीत, राजा यत्र तिष्ठति तत्रैव स्थापयेदित्यर्थः । **हस्तीति** । सः, रथो वा, राजवाहनं राज्ञो वाहनम्, अश्वानुबन्धे अश्वानां रक्षार्थानां साहचर्ये सति, भवेदिति शेषः । पक्षान्तरमाह — **यत्प्रायः सैन्य इति** । गजाश्वादिवाहनेषु मध्ये यद्वाहनबहुलः सैन्यः, तद् वा वाहनम्, अधिरोहयेत अधिरोहेत् । यत्र वाहने, विनीतः आरोहणशिक्षितः, स्याद् राजा, तद् वा वाहनम् अधिरोहेत् । **राजव्यञ्जन इति** । राजवेषधारी कश्चिद्, व्यूहाधिष्ठानं व्यूहस्य अधिष्ठानं शिरःस्थानं सर्वतलक्षणोपेतम्, आयोज्यः आयुञ्जानः प्रयोजयितव्यः अधिष्ठापयितव्य इति यावत् । राजा तु शत्रुभिर्लक्षितो मा भूदित्येतदर्थं नैवायोज्य इत्यभिप्रायः ।

सूतमागधा इति । सूताः ऐतिहासिकाः मागधाः स्तुतिपाठकाश्च, शूराणां स्वर्गं, भीरूणाम् अस्वर्गं स्वर्गाभावं, योधानां जातिसङ्घकुलकर्मवृत्तस्तवं च जातिर्ब्राह्मणत्वादिः सङ्घः तत्तद्देशीयसङ्घरूपता कुलम् अन्ववायः कर्म जीविका वृत्तं शीलम् इत्येषां स्तवं च, वर्णयेयुः राज्ञः कथयेयुः । **पुरोहितपुरुषा इति** । ते, कृत्याभिचारं शत्रुहिंसिनी देवता कृत्या तद्द्वारेण अभिचारः शत्रुहिंसार्थोऽथर्वमन्त्रप्रयोगः कृत्याभिचारः तं, ब्रूयुः पुरोहिताऽरब्धं कथयेयुः । **सत्रिकेत्यादि** । सत्रिकः सत्री वर्धकिस्तक्षा मौहूर्तिकः युद्धारम्भमुहूर्तनिश्चायकः एते, स्वकर्मसिद्धिं परेषाम् असिद्धिं च ब्रूयुः । सत्रिकस्थाने यन्त्रिकेति क्वचित् पाठः । तदा जामदग्न्यादियन्त्रशिल्पी यन्त्रिक इति व्याख्येयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सेनापतिरर्थमानाभ्यामभिसंस्कृतमनीकमाभाषेत — 'शतसाहस्रो राजवधः। पञ्चाशत्साहस्रः सेनापतिकुमारवधः। दशसाहस्रः प्रवीरमुख्यवधः। पञ्चसाहस्रो हस्तिरथवधः। साहस्रोऽश्ववधः। शत्यः पत्तिमुख्यवधः। शिरो विंशतिकम्। भोगद्वैगुण्यं स्वयंग्राह्यश्च इति। तदेषां दशवर्गाधिपतयो विद्युः।

चिकित्सकाः शस्त्रयन्त्रागदस्नेहवस्त्रहस्ताः, स्त्रियश्चान्नपानरक्षिण्यः पुरुषाणामुद्धर्षणीयाः पृष्ठतस्तिष्ठेयुः।

भूयो योधप्ररोचकमाह —सेनापतिरिति। सर्वसेनाध्यक्षः, अर्थमानाभ्याम्, अभिसंस्कृतम् अभिपूजितम्, अनीकम् आभाषेत। आभाषणप्रकारमाह — राजवधः शतसाहस्र इति। केनचिद् भटेन शत्रुराजवधे कृते तस्य सुवर्णलक्षलाभो भवेदित्यर्थः। परसेनापतिकुमारयोरन्यतरवधस्तदर्धलाभ इत्याह— पञ्चाशदित्यादि। प्रवीरपुरुषमुख्यस्य वधः दशसाहस्रलाभः, तदर्धलाभो हस्तिरथान्यतरवधः, साहस्रलाभोऽश्ववधः, शतलाभः पदातिमुख्यवधः इत्याह—दशसाहस्र इत्यादि। शिर इति। छित्त्वानीतं योधसामान्यस्यैकं शिरः विंशतिकं पणविंशतिलाभकम्। योद्धृसामान्यस्य युद्धकालिकं लाभसामान्यमाह — भोगद्वैगुण्यमिति। भोगस्य भक्तवेतनात्मनः कल्पस्य द्वैगुण्यं, स्वयंग्राह्यश्च युद्धे परस्य सकाशाद् अपह्रियमाणस्य कोशादेरपहर्तृभिर्योधैः स्वत्वेन ग्रहणं च, भवेदिति शेषः। इतिशब्द आभाषणप्रकारसमाप्तौ। तदिति। यथोक्तं राजवधादिविशेषजातं, दशवर्गाधिपतयः पदिकसेनापतिनायका वक्ष्यमाणाः, विद्युः जानीयुः।

योद्धृणां शस्त्रव्रणचिकित्साद्यर्थमाह— चिकित्सका इति। शल्यशास्त्रवेदिनः, शस्त्रयन्त्रागदस्नेहवस्त्रहस्ताः शस्त्राणि मण्डलाग्रादीनि यन्त्राणि कङ्कमुखादीनि अगदानि औषधानि स्नेहा घृतादीनि वस्त्राणि व्रणबन्धपट्टार्थानि एतानि हस्ते येषां ते तथाभूताः सन्तः, स्त्रियश्च, अन्नपानरक्षिण्यः योधहितस्वाद्वन्नपानदायिन्यः, पुरुषाणाम् उद्धर्षणीयाः उच्चैर्हृष्यन्त्याभिरिति तथाभूता उद्धर्षणार्था इत्यर्थः, पृष्ठतः युद्धभूमिपश्चाद्भागे, तिष्ठेयुः। इत्थं स्वसैन्यप्रोत्साहनं व्याख्यातम्। अथ

स्वबलान्यबलव्यायोग इति सूत्रम्। स्वसैन्यस्य परसैन्यापेक्षया व्यायोगः विशिष्टमायोजनं व्यवस्थापनं दिक्सूर्यवाताद्यानुगुण्यं यथा स्यात् तथा व्यूहरचनमिति यावत्, तदिहाभिधीयत इति सूत्रार्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अदक्षिणामुखं पृष्ठतस्सूर्यमनुलोमवातमनीकं स्वभूमौ व्यूहेत । परभूमिव्यूहे चाश्वांश्चारयेयुः ।

यत्र स्थानं प्रजवश्चाभूमि व्यूहस्य, तत्र स्थितः प्रजवितश्चोभयथा जीयेत । विपर्यये जयति उभयथा स्थाने प्रजवे च ।

समा विषमा व्यामिश्रा वा भूमिरिति, पुरस्तात् पार्श्वाभ्यां पश्चाच्च ज्ञेया। समायां दण्डमण्डलव्यूहाः, विषमायां भोगसंहतव्यूहाः । व्यामिश्रायां विषमव्यूहाः ।

विशिष्टबलं भङ्क्त्वा सन्धिं याचेत । समबलेन याचितः सन्दधीत । हीनमनुहन्यात् । न त्वेव स्वभूमिप्राप्तं त्यक्तात्मानं वा ॥

अदक्षिणामुखमिति । दक्षिणाभिमुख्यस्यामाञ्जलिकत्वात् तदितरदिगभिमुखं, पृष्ठतस्सूर्यम् अप्रतिसूर्यम्, अनुलोमवातम् अप्रतिवातम्, अनीकं, स्वभूमौ तद्योग्यभूमौ, व्यूहेत अवस्थापयेत् । परानीकस्य तद्योग्यभूमौ व्यूहनप्रसङ्गे तद्विघातार्थं स्वीयानश्वांस्तत्र चारयेयुरित्याह—परभूमिव्यूहे चेत्यादि ।

यत्रेति । यत्र देशे, व्यूहस्य, स्थानं चिरावस्थानं, प्रजवश्च क्षिप्रक्रिया च, अभूमि अलब्धावकाशम् अशक्यमित्यर्थः, तत्र, स्थितः चिरावस्थितः, प्रजवितश्च क्षिप्रक्रियश्च, उभयथा जीयेत परेण परिभूयेत । विपर्यये स्थानप्रजवयोरुभयोः सभूमित्वे, उभयथा स्थाने प्रजवे च स्थितः प्रजवितश्च प्रकारद्वयेनापीत्यर्थः, जयति परं परिभवति । तथाच स्थानप्रजवोभयानुगुणायां भूमौ व्यूहः कार्य इति फलितम् ।

व्यूहानुगुण्यस्य भूमिविशेषाश्रयत्वाद् भूमिं विभजते—समेत्यादि । समविषमव्यामिश्रभेदेन त्रिविधा भूमिः पुरःपार्श्वपश्चाद्भागसम्बन्धात् प्रत्येकं त्रिविधेत्यर्थः । तत्र व्यूहव्यवस्थामाह—समायामिति । त्रिप्रकारायां समायां, दण्डमण्डलव्यूहाः दण्डव्यूहा मण्डलव्यूहाश्च, कार्या इति शेषः । विषमायां त्रिप्रकारायां, भोगसंहतव्यूहा भोगव्यूहाः संहतव्यूहाश्च, कार्याः । व्यामिश्रायां तथाभूतायां, विषमव्यूहाः कार्याः । व्यूहानां स्वरूपमधिकरणशेषे वक्ष्यते ।

युद्धे शत्रुभङ्गदर्शने विजिगीषुणा कर्तव्यमाह—विशिष्टबलमिति । स्वाभ्यधिकबलं, भङ्क्त्वा भङ्गेन योजयित्वा, सन्धिं याचेत न केवलं नानुप्रहरेत् किन्तु स्वयं सन्धिमप्यर्थयेत बलाधिकसख्यातिशयार्थमिति भावः । समबलेन भग्नेन, याचितः, सन्दधीत न तु स्वयं सन्धिं याचेतेत्यर्थः । हीनं हीन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरावर्तमानस्य निराशस्य च जीविते ।
अधार्यो जायते वेगस्तस्माद् भग्नं न पीडयेत् ॥

इति कौटलीयार्थशास्त्रे सांग्रामिके दशमाधिकरणे तृतीयोऽध्यायः,
कूटयुद्धविकल्पाः स्वसैन्योत्साहनं स्वबलान्यबलव्यायोगश्च ।
आदित एकत्रिंशच्छततमः ॥

बलं भग्नम्, अनुहन्यात् अनुबध्य प्रहरेत् पुनरनुन्मज्जनार्थमित्यर्थः । तत्र विशेषमाह— **न त्वेवेत्यादि** । हीनमपि स्वानुगुणभूमिगतं वा जीवितनिराशं वा नानुहन्यादित्यर्थः ॥

जीवितनिराशतया प्रत्यावर्तमानस्य हीनबलस्यापि युद्धवेगो धारयितुमशक्यो यस्मात् तस्माद् भग्नं तं भूयः पीडनेन न प्रकोपयेदित्याह — **पुनरावर्तमानस्येत्यादि** ॥

इति कौटलीयार्थशास्त्रव्याख्यायां सांग्रामिके दशमेऽधिकरणे तृतीयोऽध्यायः
कूटयुद्धविकल्पाः स्वसैन्योत्साहनं स्वबलान्यबलव्यायोगश्च,
आदित एकत्रिंशदुत्तरशततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१५३,१५४. प्रक. युद्धभूमयः, पत्त्यश्वरथहस्तिकर्माणि च ।

स्वभूमिः पत्त्यश्वरथद्विपानामिष्टा युद्धे निवेशे च ।

धान्वनवननिम्नस्थलयोधिनां खनकाकाशदिवारात्रियोधिनां च पुरुषाणां नादेयपार्वतानूपसारसानां च हस्तिनामश्वानां च यथास्वमिष्टा युद्धभूमयः कालाश्च ।

समा स्थिराभिकाशा निरुत्खातिन्यचक्रखुरानक्षग्राहिणी अवृक्षगुल्मप्रतितिस्तम्भकेदारश्वभ्रवल्मीकसिकताप्रङ्कभङ्गुरा दरणहीना च रथभूमिः ।

युद्धभूमय इति सूत्रम् । युद्धानुगुणाः समस्थिराभिकाशादिलक्षणा भूमय उच्यन्त इति सूत्रार्थः ।

स्वभूमिरिति । स्वानुगुणा भूमिः, पत्त्यश्वरथद्विपानां, युद्धे, निवेशे च अवस्थाने च, इष्टा अपेक्षिता ।

धान्वनवननिम्नस्थलयोधिनामिति । धान्वनदुर्गयोधिनां वनदुर्गयोधिनां निम्नं जलं तद्योधिनां स्थलयोधिनां च, खनकादीनां च भूमिं खात्वा तत्र स्थित्वा युध्यमानाः खनकयोधिनः प्राकारबहिर्देशे वृक्षादिशून्ये देशे वा स्थित्वा युध्यमाना आकाशयोधिनः दिवैव युध्यमाना दिवायोधिनः रात्रावेव युध्यमाना रात्रियोधिनः इत्येषामष्टविधानां, पुरुषाणां पदातीनां, नादेयादीनां च नदीसम्बन्धिनां पर्वतसम्बन्धिनाम् अनूपसम्बन्धिनां सरस्सम्बन्धिनां च, हस्तिनाम्, अश्वानां च, युद्धभूमयः युद्धयोग्या भूमयः, कालाश्च तत्तद्भूमियोग्या ऋतवश्च, यथास्वम् इष्टाः धान्वनयोधिनां धन्वभूमिरित्यादिक्रमेण नादेयानां नदीभूमिरित्यादिक्रमेण च यथायथमिष्यन्त इत्यर्थः ।

रथभूमिमाह — समेति । अदन्तुरा, स्थिरा अशिथिलावयवा, अभिकाशा अभितः काशते भासते तृणाद्यनवच्छन्नत्वात्, निरुत्खातिनी उत्पाटनरहिता, अचक्रखुरा अप्रविशन्तः चक्रखुराः चक्राणि रथाङ्गानि खुराः गवादिशफाश्च यस्यां सा तथाभूता, अनक्षग्राहिणी अक्षश्चक्राधारस्तद्ग्राहिणी न भवति, अवृक्षगुल्मप्रतत्यादिः वृक्षादिरहिता, तत्र गुल्मः सान्द्रपर्णा प्रतानशतगामिनी लता वीरुत्संज्ञा तृणसङ्घातो वा, प्रततिर्लता, स्तम्भः स्थाणुः, केदारः धान्यवापः, श्वभ्रं गर्तः, भङ्गुरं वक्रप्रदेशः, शेषं प्रतीतम् । दरणहीना च दीर्घरेखाकारसुषिररहिता च, रथभूमिः । भङ्गुरदरणहीनेति समस्तपाठे स्तम्भशब्दात् प्राग् विसर्गान्तं छेत्तव्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हस्त्यश्वयोर्मनुष्याणां च समे विषमे हिता युद्धे निवेशे च ।

अण्वश्मवृक्षा ह्रस्वलङ्घनीयश्वभ्रा मन्ददरणदोषा चाश्वभूमिः । स्थूलस्थाण्वश्मवृक्षमतनिवल्मीकगुल्मा पदातिभूमिः । गम्यशैलनिम्नविषमा मर्दनीयवृक्षा छेदनीयमतातिः पङ्कभङ्गुरदरणहीना च हस्तिभूमिः ।

अकण्टकिन्यबहुविषमा प्रत्यासारवतीति पदातीनामतिशयः ।

द्विगुणप्रत्यासारा कर्दमोदकखञ्जनहीना निश्चक्रेरेति वाजिनामतिशयः ।

पांसुकर्दमोदकनलशराधानवती श्वदंशहीना महावृक्षशाखाघातविप्रयुक्तेति हस्तिनामतिशयः ।

उक्ता रथभूमिरेव हस्त्यश्वमनुष्याणां समे विषमे च देशे युद्धे निवेशे चानुगुणेत्याह — हस्त्यश्वयोरित्यादि ।

अश्वादीनां भूमिं सामान्यत उक्त्वा विशेषत आह — अण्वश्मवृक्षेति । कृशशिलावृक्षा, ह्रस्वलङ्घनीयश्वभ्रा ह्रस्वेनापि लङ्घयितुं शक्यं श्वभ्रं यस्यां सा तथाभूता, मन्ददरणदोषा स्वल्पदरणदोषा च, अश्वभूमिः । मनुष्यभूमिमाह — स्थूलस्थाण्वित्यादि । हस्तिभूमिमाह — गम्यशैलनिम्नविषमेति । गम्याः हस्तिभिः गन्तुं शक्याः शैलाः पर्वताः निम्नानि जलानि विषमाणि दन्तुरस्थलानि च यस्यां सा तथाभूता, मर्दनीयवृक्षा हस्तिमर्दनयोग्यवृक्षयुक्ता, छेदनीयप्रतातिः, क्वचिद् 'भञ्जनीयमततिरि'ति पाठः । पङ्कभङ्गुरादिहीना च भङ्गुरेत्याकारान्तपाठे भूम्यभिप्रायं स्त्रीत्वं विवक्षणीयम् । रथभूम्यतिदेशसिद्धं पङ्कभङ्गुरदरणहीनत्वं हस्तिभूमेः पुनरुच्यते तस्यां तन्नित्ययोगार्थम् । तेनाश्वपदातिभूम्योस्तथोगानियमो द्रष्टव्यः ।

रथहस्त्यश्वमनुष्याणां भूमेरतिशयलक्षणं गुणविशेषं प्रतिलोमक्रमेणाह — अकण्टकिनीत्यादि । अबहुविषमा बहुनिम्नोन्नतरहिता । प्रत्यासारवती प्रत्यासारः प्रतिनिवर्तनावकाशस्तद्युक्ता । इति पदातीनामतिशय इति। एवम्प्रकारभूमिलाभः पत्तीनाम् अतिशयहेतुरित्यर्थः ।

द्विगुणप्रत्यासारेत्यादि । पुरःप्रसारावकाशद्विगुणप्रतिनिवर्तनावकाशा पङ्केन तत्प्रायजलेन च रहिता अदलप्रायवृक्षरहिता च भूमिरश्वानामतिशयहेतुरित्यर्थः ।

पांसुत्यादि । पांसवो रेणवः कर्दमोदकं पङ्किलजलं नलः सुषिराख्यस्तृणविशेषः शरो मुञ्जः तयोराधानानि आधीयते धार्यतेऽनेनेत्याधानमिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तोयाशयाश्रयवती निरुत्खातिनी केदारहीना व्यावर्तनसमर्थेति रथानामतिशयः। उक्ता सर्वेषां भूमिः।

एतया सर्वबलनिवेशा युद्धानि च व्याख्यातानि भवन्ति।

भूमिवासवनविचयो विषमतोयतीर्थवातरश्मिग्रहणं, वीवधसारयोर्घातो रक्षा वा, विशुद्धिः स्थापना च बलस्य, प्रसारवृद्धिर्वाहोत्सारः,

---

व्युत्पत्त्या मूलशब्दव इति नयचन्द्रिका। तैर्युक्ता, श्वदंष्ट्राहीना श्वदंष्ट्रा गोकण्टकस्तद्धीना, महावृक्षशाखाघातवियुक्ता महतां वृक्षाणां विटपाभिघातहीना इत्येवम्प्रकारा भूमिः, हस्तिनाम्, अतिशयः।

तोयाशयाश्रयवतीति। तोयाशयैः स्नपनयोग्यजलयुक्तैर्जलाधारैः आश्रयैर्विश्रमस्थानैश्चोपेता, निरुत्खातिनी उत्पाटनरहिता, केदारहीना बीजवापहीना, व्यावर्तनसमर्था प्रतिनिवर्तनयोग्यविस्तारयुक्ता, इतीदृशी भूमिः, रथानाम् अतिशयः। भूप्रकरणमुपसंहरति — उक्तेत्यादि।

एतयेति। यथोक्तप्रकारया भूम्या, एतामाश्रित्येत्यर्थः। सर्वबलनिवेशाः सर्वेषां बलानां निवेशाः निवेशनकर्माणि, युद्धानि च युद्धकर्माणि च, व्याख्यातानि कर्तव्यतया निरूपितानि भवन्ति।

युद्धभूमिमाश्रितानां बलानां कर्मनिरूपणार्थं सूत्रं — पत्त्यश्वरथहस्तिकर्माणीति। पत्त्यादिचतुष्टयस्य कर्माणि अभिधीयन्त इति सूत्रार्थः।

तत्र प्रथममश्वकर्माण्याह — भूमिवासवनविचय इति। भूम्यादीनां त्रयाणां विचयः शोधनं तदर्थैः कर्तव्यमित्यर्थः। तत्र भूमेर्गूढपरबलनिरासो भूमिविचयः, यत्र बलं स्वैरविमुक्तं वसति तत्रोपद्रवपरिहारो वासविचयः, मार्गमध्यगेषु वनेषु चोरोत्सारणं वनविचयः। विषमेत्यादि। विषमादिपञ्चकग्रहणं परानाक्रमणीयस्य निवेशयोग्यस्य प्रदेशस्य पूर्वमेव ग्रहणं विषमग्रहणं, तोयवतो जलपूर्णतटाकादियुक्तस्य प्रदेशस्य पूर्वमेव ग्रहणं तोयग्रहणं, नद्यादुत्तरणानुकूलस्थानस्य ग्रहणं तीर्थग्रहणं, स्वानुकूलवातानुभावकदेशग्रहणं वातग्रहणं, स्वाप्रतिमुखसूर्यरश्मिपातानुगुणदेशग्रहणं रश्मिग्रहणम्। वीवधेत्यादि। स्वदेशादविच्छिन्न आजीवद्व्यागमो वीवधः सुहृद्बलागमनम् आसारः तयोः घातः प्रतिहतिः परस्य, रक्षा वा आत्मीययोस्तु तयोः रक्षणं च, बलस्य सैन्यस्य विशुद्धिर्गूढपरसैनिकप्रवेशदोषपरिहारः, स्थापना च परबलनिमित्तक्षोभा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वप्रहारो, व्यावेशनं, व्यावेधनमाश्वासो, ग्रहणं, मोक्षणं, मार्गानुसार-विनिमयः, कोशकुमाराभिहरणं, जघनकोट्यभिघातो, हीनानुसारणम-नुयानं, समाजकर्मेत्यश्वकर्माणि ।

पुरोयानमकृतमार्गवासतीर्थकर्म बाहूत्सारस्तोयतरणावतरणे स्थानगमनावतरणं विषमसम्बाधप्रवेशोऽग्निदानशमनमेकाङ्गविजयः भिन्नसन्धानमभिन्नभेदनं व्यसने त्राणमभिघातो विशीर्षिका त्रासन-

---

वसरे स्थैर्यापादनं च, प्रसारवृद्धिः सर्वतो बनाजीवः प्रसारस्तस्य वृद्धिरुपचयः, बाहूत्सारः परबलस्य बाहुभ्यामिवोत्सारणं तेन तद्धेतुभूतं स्वबलोभयपार्श्वयोरश्वानां प्रसरणं लक्ष्यते । पूर्वप्रहारः पूर्वं शत्रुबले प्रहारार्पणं, तदश्वैरेव क्षिप्रकारिभिः क्रियत इत्यर्थः । व्यावेशनं परबलस्यान्तः प्रविश्य विक्षोभणं, व्यावेधनं परबलस्य विविधव्यधोत्पादनम्, आश्वासः आश्वासनं स्वबलस्यात्यायासावसन्नस्यानुबलदानं, ग्रहणं परयोधानामनुगम्यादानं, मोक्षणं परगृहीतस्वीयभटमोचनं, मार्गानुसारविनिमयः मार्गानुसारपरिवृत्तिः स्वबलस्य मार्गमनुगच्छति परे परबलमार्गस्य स्वयमश्वद्वारेणानुगमनमित्यर्थः, कोशकुमाराभिहरणं परकीयस्य कोशस्य कुमारस्य च पररक्ष्यसर्वस्वभूतस्य अभिहरणं परसमक्षं हरणं, जघनकोट्यभिघातः जघने पश्चाद्भागे कोटौ पुरस्तात् पक्षे च अभिघातः, हीनानुसारणं भग्नाश्वयोधानुसारकरणम्, अनुयानं पलायमानपरसैन्यानुगमनं, समाजकर्म विप्रकीर्णस्य सैन्यस्य सङ्घत्वकरणम्, इत्यश्वकर्माणि उक्तप्रकाराण्यश्वसुकराणि कर्माणि ।

हस्तिनां कर्माण्याह — पुरोयानमिति । स्वसैन्यस्याग्रे गमनम्, अकृतमार्गवासतीर्थकर्म अकृतानां पूर्वमकल्पितानां मार्गाणां वासस्थानानां नद्यवतरणघट्टानां च कल्पनं, बाहूत्सारः बाहुभ्यामिव परसैन्यस्य स्वसैन्यपार्श्वे स्थित्वोत्सारणं, तोयतरणावतरणे नद्यादिजले तत्परिमाणज्ञानार्थं तरणमवतरणं च, स्थानगमनावतरणं स्थानं शत्रुबलाक्रमणे पङ्क्तिशोऽवस्थितिः गमनं तथैवाध्वयानम् अवतरणं तथैवोच्चदेशादेरवरोहणं च, विषमसम्बाधप्रवेशः तृणगुल्मादिदुस्सञ्चरे देशे शत्रुसैन्यसमवायसङ्कटे च प्रवेशः, अग्निदानशमनम् अग्नेः परशिबिरे प्रक्षेपः तस्य स्वशिबिरे परदत्तस्य निर्बापणं च, एकाङ्गविजयः एकेनैव सेनाङ्गेन हस्तिलक्षणेनाश्वादिरहितेनापि शत्रुजयसिद्धिः, भिन्नसन्धानं विशीर्णसैन्यैकीकरणम्, अभिन्नभेदनं सङ्घीभूतस्य परसैन्यस्य विशरणं,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मौदार्यं ग्रहणं मोक्षणं सालद्वाराट्टालकभञ्जनं कोशवाहनापवाहनमिति हस्तिकर्माणि ।

स्वबलरक्षा चतुरङ्गबलप्रतिषेधः सङ्ग्रामे ग्रहणं मोक्षणं भिन्नसन्धानमभिन्नभेदनं त्रासनमौदार्यं भीमघोषश्चेति रथकर्माणि ।

सर्वदेशकालशस्त्रवहनं व्यायामश्चेति पदातिकर्माणि ।

शिबिरमार्गसेतुकूपतीर्थशोधनकर्म यन्त्रायुधावरणोपकरणग्रासवहनमायोधनाच्च प्रहरणावरणप्रतिविद्धापनयनमिति विष्टिकर्माणि ॥

व्यसने त्राणं शब्दाक्रमणकृतायां राज्यादिसत्रोत्पादितायां वा विपदि हस्तिभिः रक्षणम्, अभिघातः परसैन्यमर्दनं, विभीषिका केवलदर्शनेनापि भयजननं, त्रासनं मदाद्यवस्थाभवैर्दुष्टचेष्टितैः साध्वसोत्पादनम्, औदार्यं सैन्यमहत्त्वं, ग्रहणं शत्रुभटादिहरणं, मोक्षणं परहृतस्वीयभटादिमोचनं, सालद्वाराट्टालकभञ्जनं सालः प्राकारः द्वारं गोपुरम् अट्टालकः प्राकाराग्रगृहम् एषां भञ्जनं, कोशवाहनापवाहनं कोशस्य राजकीयस्य धनस्य वाहनं सञ्चारणम् अपवाहनं भङ्गावसरेऽपनयनं च, इति एवम्प्रकाराणि हस्तिकर्माणि ।

स्वबलरक्षेति । 'प्राकारतुल्यसंस्थानतया रथानां स्वबलरक्षकत्वमि'ति माधवः । चतुरङ्गबलप्रतिषेधः सङ्ग्रामे युद्धे चतुरङ्गस्य परबलस्य वारणं, ग्रहणम् इत्यादिकं षट्कं प्राग् व्याख्यातं, भीमघोषश्च भयङ्करध्वनिकरणं च, इति रथकर्माणि ।

सर्वदेशकालशस्त्रवहनमिति । सर्वस्मिन् देशे समविषमादौ काले प्रावृडादौ च शस्त्राणां धारणं, व्यायामश्च युद्धव्यायोगश्च, इति पदातिकर्माणि ।

अथ विष्टीनां कर्माण्याह — **शिबिरेत्यादि** । शिबिरं सेनानिवेशः मार्गः पन्थाः सेतुर्नद्यादौ जलविधारणकरणं कूपः तत्खननं तीर्थं नद्याद्यवतरणस्थानम् एषां शोधनकर्म तृणाद्युन्मूलनादिना शुचीकरणं, यन्त्रादिपञ्चकवहनम्, आयोधनाच्च प्रहरणावरणप्रतिविद्धापनयनं युद्धभूमेरायुधानां कञ्चुकादीनां बाणविद्धभटादीनां चान्यतोऽपनयनम्, इति विष्टिकर्माणि अनायुधीयाः कर्मकराः विष्टयस्तेषां कर्माणि ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुर्याद् गवाश्वव्यायोगं रथेष्वल्पहयो नृपः ।
खरोष्ट्रशकटानां वा गर्भमल्पगजस्तथा ॥

इति कौटलीयार्थशास्त्रे सांग्रामिके दशमाधिकरणे चतुर्थोऽध्यायः
युद्धभूमयः पत्त्यश्वरथहस्तिकर्माणि,
आदितो द्वात्रिंशच्छततमः ॥

कुर्यादिति । अल्पहयोऽल्पाश्वः, नृपः, रथेषु गवाश्वव्यायोगम् अश्वैः सह वलीवर्दानां योजनं, कुर्यात् । तथा अल्पगजः नृपः, खरोष्ट्रशकटानां गर्भं कुर्यात् खरोष्ट्रयुक्तशकटसम्बद्धं सैन्यगर्भं कुर्याद् गजव्याप्यं सैन्यगर्भं गजाभावात् खरोष्ट्रयुक्तशकटव्याप्तं कुर्यादित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां साङ्ग्रामिके दशमेऽधिकरणे
चतुर्थोऽध्यायः युद्धभूमयः पत्त्यश्वरथहस्तिकर्माणि,
आदितो द्वात्रिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१५५—१५७. प्रक. पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, सार-फल्गुबलविभागः, पत्यश्वरथहस्तियुद्धानि च।

पञ्चधनुश्शतावकृष्टदुर्गमवस्थाप्य युद्धमुपेयाद्, भूमिवशेन वा। विभक्तमुख्यामचक्षुर्विषये मोक्षयित्वा सेनां सेनापतिनायकौ व्यूहेयाताम्।

शमान्तरं पत्तिं स्थापयेत्। त्रिशमान्तरमश्वम्। पञ्चशमान्तरं रथं, हस्तिनं वा। द्विगुणान्तरं त्रिगुणान्तरं वा व्यूहेत। एवं यथासुखमसम्बाधं युध्येत।

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभाग इति सूत्रम्। पक्षौ पञ्चव्यूहात्मना स्थाप्यमानस्य बलस्य बहिः पुरस्तात्कोट्यौ कक्षौ पश्चादन्तःपार्श्वे उरस्यं मध्यम् एषां पञ्चानां समूहविशेषाणां बलाग्रतः बलस्य सैन्यस्य अग्रं परिमाणं तदानुगुण्येन, व्यूहविभागः व्यूहस्य विन्यासस्य विभजनम्, अभिधीयत इति सूत्रार्थः। व्यूहविभागपूर्वं युध्यमानस्यैव सैन्यस्य जयलाभो भवतीति व्यूहविभागस्येह कथनम्।

पञ्चधनुश्शतावकृष्टदुर्गमिति। पञ्चभिर्धनुश्शतैर्विप्रकृष्टं दुर्गं स्कन्धावारः यस्मात् तत् तथाभूतम्, अवस्थाप्य कृत्वा, युद्धं युद्धस्थलम्, उपेयात् स्वीकुर्यात्। युद्धभूमिं स्कन्धावारात् पञ्चधनुश्शताविप्रकृष्टां कुर्यादित्यर्थः। भूमिवशेन वेति। लभ्यमानभूमिपरिमाणानुरोधेन पञ्चधनुश्शतदूरविप्रकृष्टां तदधिकदूरविप्रकृष्टां तन्न्यूनदूरविप्रकृष्टां वा युद्धभूमिं कुर्यादित्यर्थः। विभक्तमुख्यामिति। प्रतिग्रहदेशपक्षकक्षोरस्येषु विभज्य निवेशितप्रधानां, सेनाम्, अचक्षुर्विषये मोक्षयित्वा प्रतिव्यूहरचनशङ्कया परदृष्यगोचरे स्थापयित्वा, सेनापतिनायकौ सेनापतिः पदिकदशकपतिः नायकस्तद्दशकाधिपतिः एतौ, व्यूहेयातां विभज्य विन्यस्येतां।

पदात्यादीनां व्यूहनप्रकारानाह — शमान्तरमिति। शमश्चतुर्दशाङ्गुलः तत्परिमितम् अन्तरं पत्त्योर्मिथोऽन्तरालं यस्मिन् कर्मणि तत् तथा, पत्तिं स्थापयेत्। पत्तित्रिगुणान्तरालमश्वं, पत्तिपञ्चगुणान्तरालं रथं हस्तिनं च स्थापयेदित्याह — त्रिशमान्तरमित्यादि। पदात्यादीनां चतुर्णां बहुत्वेऽन्तरालमानमवरकल्पेनोक्त्वा तेषां बहुत्वे मध्यमोत्तमकल्पाभ्यामन्तरालमानं विधत्ते — द्विगुणान्तरमित्यादि। तत्तदुक्तमानाद्द्विगुणान्तरालं तत्त्रिगुणान्तरालं वा पत्त्यादिचतुष्टयं स्थापयेदित्यर्थः। अन्तरालमानवर्धनस्य फलमाह — एवमित्यादि। असम्बाधं संमर्दरहितम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चारत्नि धनुः, तस्मिन् धन्विनं स्थापयेत्। त्रिधनुष्यश्वम्। पञ्चधनुषि रथं हस्तिनं वा। पञ्चधनुरनीकसन्धिः पक्षकक्षोरस्यानाम्।

अश्वस्य त्रयः पुरुषाः प्रतियोद्धारः। पञ्चदश रथस्य, हस्तिनो वा, पञ्च चाश्वाः। तावन्तः पादगोपाः वाजिरथद्विपानां विधेयाः।

त्रीणि त्रिकाण्यनीकं रथानामुरस्यं स्थापयेत्। तावत् कक्षं पक्षं चोभयतः। पञ्चचत्वारिंशद् एवं रथा व्यूहे भवन्ति।

अथ धन्विविषयमुत्तमोत्तमाश्वादिविषयं चान्तरालविधिमाह — **पञ्चे**-त्यादि। पञ्चारत्नि पञ्चहस्तं, धनुः तत्संज्ञम्। तस्मिन् धनुर्मितेऽन्तराले, धन्विनं धानुष्कं, स्थापयेत्। त्रिधनुषि पञ्चदशहस्तान्तराले, अश्वं स्थापयेत्। पञ्चधनुषि पञ्चविंशतिहस्तान्तराले, रथं, हस्तिनं वा गजं च, स्थापयेत्। पक्षादीनां पञ्चानामनीकानां परस्परान्तरालं कियत् कर्तव्यमित्याह— **पञ्चधनुरिति**। पक्षकक्षोरस्यानां पक्षौ बलस्य बहिः पुरस्तात्कोट्यौ कक्षौ पश्चादन्तःपार्श्वे उरस्यं मध्यम् इत्येषां पञ्चानामनीकानाम्, अनीकसन्धिः अनीकमिथोन्तरालं, पञ्चधनुः पञ्चविंशतिहस्तमानम्।

अश्वादीनामग्रगा भूत्वा शत्रुं ये प्रतियुध्यन्ते, तेषां संख्यामाह— **अश्वस्य त्रय** इत्यादि। **पञ्चदशेति**। तावन्तः प्रतियोद्धारः, रथस्य, हस्तिनो वा गजस्य च। **पञ्च चाश्वा इति**। एकैकस्य रथस्य गजस्य च त्रयः पुरुषा न केवलमग्रयायिनः किन्तु पञ्च पञ्चाश्वा अप्यग्रयायिन इत्यर्थः। **तावन्त** इति। पञ्च, पादगोपाः पादरक्षकाः, वाजिरथद्विपानां, विधेयाः कर्तव्याः। तदेवं रथस्यैकस्य पुरोगाः पुरुषाः पञ्चदश पञ्चाश्वाः पादगोपाश्च पञ्चेति सिद्धम्।

यथोक्तपुरुषादियुक्ता रथा उरस्यस्यानीकस्य कति स्थापनीया इत्याह—**त्रीणीति**। रथानां त्रीणि त्रिकाणि पृथक् पृथगेकपङ्क्तिरूपतया मिलितस्थितानि त्रीणि त्रितयानि, उरस्यम् अनीकं स्थापयेत् मध्यानीकात्मना कल्पयेत्। एवं नव रथा मध्यानीके भवन्ति। **तावदिति**। उरस्यानीकतुल्यरथपरिमाणं, कक्षं कक्षानीकं, पक्षं च पक्षानीकं च, उभयतः उभयोः पार्श्वयोः कोटयोश्च भवतीत्यर्थः। अनेन प्रकारेण उरस्यादिपञ्चानीकात्मके व्यूहे प्रत्येकं नवरथयोगात् सङ्कलनया पञ्चचत्वारिंशद् रथा भवन्तीत्याह — **पञ्चेत्यादि**।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वे शते पञ्चविंशतिश्चाश्वाः, षट्शतानि पञ्चसप्ततिश्च पुरुषाः प्रतियोद्धारः । तावन्तः पादगोपा वाजिरथद्विपानाम् ।

एष समव्यूहः । तस्य द्विरथोत्तरा वृद्धिरा एकविंशतिरथादित्येवमोजा दश समव्यूहप्रकृतयो भवन्ति ।

पक्षकक्षोरस्यानामतो विषमसंख्याने विषमव्यूहः । तस्यापि द्विरथोत्तरा वृद्धिरा एकविंशतिरथादित्येवमोजा दश विषमव्यूहप्रकृतयो भवन्ति ।

अतः सैन्यानां व्यूहशेषमावापः कार्यः । रथानां द्वौ त्रिभागा-

रथानां पञ्चचत्वारिंशत्त्वेऽश्वादीनां सिध्यन्तीमेयत्तामाह — द्वे शते इत्यादि । एकैकस्य रथस्य पञ्चाश्वत्वात् पञ्चचत्वारिंशतो रथानाम् अश्वाः पञ्चविंशत्यधिकद्विशतसंख्या भवन्ति, एकैकस्याश्वस्य पुरोयायिपुरुषत्रित्वयोगात् तावतामश्वानां पुरोयायिपुरुषाः पञ्चसप्तत्यधिकषट्छतसंख्या भवन्तीत्यर्थः । तावन्त इत्यादि । अश्वानां यावन्तः पुरोयायिपुरुषाः तावन्तः पादगोपाः, तथा रथानां द्विपानां च यावन्तः पुरोयायिनोऽश्वाः पुरुषाश्च तावन्तः पादगोपा भवन्तीत्यर्थः ।

एष समव्यूह इति । यथोक्तः समव्यूह इत्युच्यते त्रिकतुल्यत्वादित्यर्थः । तस्येति । व्यूहावयवस्य त्रिकस्य, द्विरथोत्तरा द्वौ द्वौ रथावुत्तरौ पूर्वौ पूर्वौ प्रकृतिं कृत्वा वर्धमानौ यस्याः सा तथाभूता, आ एकविंशतिरथात् यावदेकविंशतिरथा वार्धिता भवन्ति तावत्पर्यन्तेत्यर्थः, वृद्धिः, इत्येवम् अनेन प्रकारेण, ओजाः अयुग्माः त्रिकप्रकृतौ द्वियोगेन पञ्च पञ्चके द्वियोगेन सप्त सप्तके द्वियोगेन नव नवके द्वियोगेनैकादश एकादशके द्वियोगेन त्रयोदश त्रयोदशके द्वियोगेन पञ्चदश पञ्चदशके द्वियोगेन सप्तदश सप्तदशके द्वियोगेन एकोनविंशतेः एकोनविंशतौ द्वियोगेनैकविंशतिरित्येवमयुग्मरूपा इत्यर्थः, दश समव्यूहप्रकृतयो भवन्ति समव्यूहनयोनयः प्रभेदा जायन्ते ।

विषमव्यूहमाह — पक्षकक्षोरस्यानामिति । तेषाम्, अतो व्यूहाङ्गतो, विषमसंख्याने व्यूहाङ्गसङ्ख्यासाम्यविरहे इत्यर्थः, विषमव्यूहः । विषमव्यूहस्यापि द्विरथोत्तरैकविंशतिरथपर्यन्तवृद्ध्या दशायुग्मरूपा विषमव्यूहयोनयो भेदा भवन्तीत्याह — तस्यापीत्यादि ।

अथावापविधिमाह — अत इति । एषु समविषमव्यूहेषु, सैन्यानां, व्यूहशेषं व्यूहनादवशिष्टं सैन्यम्, आवापः कार्यः आवापतां नेतव्यम् । आ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वङ्क्षेष्वावापयेत्। शेषमुरस्यं स्थापयेत्। एवं त्रिभागोनो रथानामावापः कार्यः। तेन हस्तिनामश्वानाम् आवापो व्याख्यातः।

यावदश्वरथद्विपानां युद्धसम्बाधं न कुर्यात्, तावदावापः कार्यः।

दण्डबाहुल्यमावापः। पत्तिबाहुल्यं प्रत्यावापः। एकाङ्गबाहुल्यमन्वावापः। दूष्यबाहुल्यमत्यावापः।

परावापात् प्रत्यावापादाचतुर्गुणादाष्टगुणादिति वा विभवतः सैन्यानामावापः कार्यः।

समन्तादुप्यत इति व्युत्पत्त्या आवापः प्रक्षेपः। व्यूहावशिष्टं सैन्यं व्यूहेषु प्रक्षेप्तव्यमित्यर्थः। प्रक्षेपणप्रकारमाह — **रथानामित्यादि**। व्यूहनशिष्टानां रथानां त्रिधा विभक्तानां, द्वौ त्रिभागौ, अङ्गेषु बहिःपुरस्तात्कोट्योः पश्चादन्तःपार्श्वयोश्चेत्येतेषु, आवापयेत्। शेषम् अवशिष्टं त्रिभागम्, उरस्यं स्थापयेत् मध्यगं कुर्यात्। आवाप्यत्वेनावशिष्टस्य सैन्यस्य व्यूढसैन्यापेक्षया परिमाणतो ऽधिकत्वे न्यूनत्वे समत्वे वा कथमावापः कर्तव्य इत्यत्राह—**एवं त्रिभागोन** इत्यादि। व्यूढं रथानीकमपेक्ष्य त्रिभागन्यून एव रथावापः कर्तव्यः, न तु ततो ऽधिकस्तेन समो वेत्यभिप्रायः। रथन्यायं हस्तिष्वश्वेषु चातिदिशति— **तेनेत्यादि**। हस्तिनोऽश्वांश्च त्रेधा विभज्य द्वौ त्रिभागौ पक्षकक्षयोः शेषमुरस्ये च प्रक्षिपेदित्यर्थः।

यावदिति। यत्परिमाणं बलशेषं व्यूहेषु प्रक्षिप्यमाणम्, अश्वरथद्विपानां, युद्धसम्बाधं युद्धसंमर्दं, न कुर्यात्, तावत् आवापः कार्यः। त्रिभागोन इत्यादयस्तु विधयः प्रदर्शनार्था इति भावः।

प्रत्यावापादीन् आवापविशेषान् वक्तुमावापपदार्थमाह — **दण्डबाहुल्यमिति**। दण्डस्य बलस्य व्यूहरचनविनियुक्तस्य बाहुल्यं व्यूहरचनातिरिक्तबलप्रक्षेपेण वर्धनम्, आवापः आवापपदार्थः। पत्तिबाहुल्यं पदातिमात्रेण वर्धनं, प्रत्यावापः। **एकाङ्गबाहुल्यमिति**। एकेनाङ्गेनाश्वगजरथान्यतमबलेन वर्धनम्, अन्वावापः। **दूष्यबाहुल्यमिति**। दूष्या राजावग्रहचारिणो मुख्यास्तद्बाहुल्यम्, अत्यावापः।

व्यूढे परकीयबले यावान् आवापः तदपेक्षया चतुर्गुणाद्यष्टगुणपर्यन्तप्रमाणः स्वविभवानुगुण्येन वा सैन्यानामावापः कार्य इत्याह — **परावापादिति**। इह वाशब्दः 'एवं त्रिभागोन' इति व्यूढस्वबलापेक्षया पूर्वमुक्ता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रथव्यूहेन हस्तिव्यूहो व्याख्यातः। व्यामिश्रो वा हस्तिरथाश्वानाम्। चक्रान्तयोर्हस्तिनः, पार्श्वयोरश्वमुख्या, रथा उरस्ये। हस्तिनामुरस्यं रथानां कक्षावश्वानां पक्षाविति मध्यभेदी। विपरीतोऽन्तर्भेदी।

हस्तिनामेव तु शुद्धः। सान्नाह्यानामुरस्यम्, औपवाह्यानां जघनं, व्यालानां कोट्याविति।

दावापप्रमाणादस्यावापप्रमाणस्य पक्षान्तरत्वद्योतनार्थः। इह परावापादित्येतदनन्तरं 'प्रत्यावापाद्' इत्यधिकं पठ्यते। तच्च नातिप्रयोजनकम्। तदित्थं 'त्रीणि त्रिकाण्यनीकं रथानामुरस्यं स्थापयेद्' इत्यादिना रथव्यूहोऽभिहितः।

रथव्यूहविधानं हस्तिव्यूहेऽतिदिशति — **रथव्यूहेनेत्यादि**। हस्तिप्रधानो व्यूहो हस्तिव्यूहः। तत्र हस्तिनां संख्या रथव्यूहोक्तया रथसंख्यया समाना, न तु ततोऽधिकेत्यभिप्रायः। हस्तिरथाश्वमिश्रणरूपो वा हस्तिव्यूहः कर्तव्य इत्याह — **व्यामिश्रो वेत्यादि**। करणप्रकारमाह — **चक्रान्तयोरिति**। चक्रस्य सैन्यस्य अन्तयोः बहिःपुरस्तात्कोट्योः पक्षशब्दवाच्ययोः, हस्तिनः, स्थाप्या इति शेषः। पार्श्वयोः पश्चादन्तःकक्षयोर्जघनापरपर्याययोः, अश्वमुख्याः स्थाप्याः। अश्वा मुख्या इति व्यस्तमपि पठ्यते। रथाः, उरस्ये मध्ये, स्थाप्याः। एवंविधहस्त्यादिस्थापनयुक्तो हस्तिव्यूहस्यैकः प्रकार इत्यभिप्रायः। द्वितीयं प्रकारमाह — **हस्तिनामित्यादि**। इति मध्यभेदी अयं प्रकारो मध्यभेदीत्युच्यते मध्ये हस्तिस्थापनरूपविशेषवत्त्वादित्यर्थः। तृतीयं प्रकारमाह — **विपरीत** इति। उक्तप्रकारद्वयविपरीतः — पार्श्वापरपर्याययोः कक्षयोर्गजाः रथाः पक्षयोः उरस्येऽश्वा इत्येवंविधहस्त्यादिविन्यासवानित्यर्थः, अन्तर्भेदी पश्चादन्तःपार्श्वयोर्हस्तिस्थापनरूपविशेषवत्त्वादन्तर्भेदीत्युच्यते। अनेन न्यायेन प्रथमः प्रकारः पक्षभेदीति व्यपदेष्टुमर्हः पक्षयोर्हस्तिविन्यासरूपविशेषवत्त्वादिति बोद्धव्यम्।

अथ शुद्धं व्यूहमाह—**हस्तिनामेव तु शुद्ध** इति। केवलानां गजानाम्, अश्वादिमिश्रणरहितः शुद्धो व्यूहो भवति। तत्र सान्नाह्यादीनां त्रिविधानां गजानां विन्यासस्थानान्याह — **सान्नाह्यानामिति**। युद्धयोग्यानाम्, उरस्यं मध्यं, स्थानमिति शेषः। औपवाह्यानां राजवाहनानां, जघनं पश्चादन्तःपार्श्वे, स्थानम्। व्यालानां दुष्टगजानां, कोट्यौ पक्षौ, स्थानम्। इतिशब्दः शुद्धहस्तिव्यूहकथनसमाप्तौ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अश्वव्यूहो वर्मिणामुरस्यं शुद्धानां कक्षपक्षाविति ।

पत्तिव्यूहः पुरस्तादावरणिनः पृष्ठतो धन्विन इति । शुद्धाः ।

पत्तयः पक्षयोरश्वाः पार्श्वयोः, हस्तिनः पृष्ठतो रथाः पुरस्तात्, परव्यूहवशेन वा विपर्यास इति । व्यङ्गबलविभागः । तेन व्यङ्गबलविभागो व्याख्यातः ।

दण्डसम्पत् सारबलं पुंसाम् । हस्त्यश्वयोर्विशेषः—कुलं जातिः सत्त्वं वयःस्थता प्राणो वर्म्म जवस्तेजः शिल्पं स्थैर्यमुदग्रता विधेयत्वं सुव्यञ्जनाचारतेति ।

शुद्धेऽश्वव्यूहेऽश्वानां स्थापनप्रकारमाह — **अश्वव्यूह** इत्यादि । वर्मिणां वर्म कवचं तद्वतामश्वानाम् । शुद्धानां वर्मरहितानामित्यर्थः ।

शुद्धे पत्तिव्यूहे पत्तीनां स्थापनप्रकारमाह — **पत्तिव्यूह** इत्यादि । पुरस्तात् कोट्योः । आवरणिनः कवचिनः पत्तयः । पृष्ठतः पश्चादन्तःपार्श्वयोः । **शुद्धा** इति । अव्यामिश्रा गजादिव्यूहा दर्शिता इत्यर्थः ।

अथ मिश्रव्यूहे दर्शयितव्ये प्रथमं द्विसेनाङ्गमिश्रमाह—**पत्तय** इत्यादि । इह पार्श्वयोरित्यन्तेनैको व्यङ्गबलविभाग उक्तः, पुरस्तादित्यन्तेनापरः, परव्यूहेत्यादिना चान्यः । तत्र परव्यूहवशेन वेत्यादेरयमर्थः — उक्तव्यवस्थाद्वयव्यत्ययोऽपि शत्रुव्यूहभञ्जनानुगुण्यमवेक्ष्य कर्तव्य इति । व्यङ्गबलविभागेऽप्ययं न्यायोऽनुसर्तव्य इत्याह — **तेनेत्यादि** । इत्थं पक्षादीनां बलाग्रतो व्यूहविभागः प्रपञ्चितः ।

अथ बलानां सारफल्गुभाववशादपि विभागं वक्तुं सूत्रयति—**सारफल्गुबलविभाग इति** । साराणां पितृपैतामहत्वनित्यत्वादिदण्डसम्पद्युक्तानां फल्गूनां तदतिरिक्तानां च बलानां पत्त्यादीनां विभागः विभज्य पक्षादिषु निवेशनम् अभिधीयत इति सूत्रार्थः ।

तत्र पदात्यादीनां सारबलत्वं व्यवस्थापयति — **दण्डसम्पदिति** । या 'पितृपैतामहो नित्यो वश्य' इत्यादिना प्रकृतिसम्पत्प्रकरणेऽभिहिता सा, सारबलं पुंसां पदातीनां सारबलत्वमित्यर्थः । हस्त्यश्वयोः कुलजातिसत्त्वादिरूपा गुणविशेषा एव सारबलत्वमित्याह — **हस्त्यश्वयोर्विशेष इत्यादि** । तत्र कुलम् एकप्रभवत्वं, जातिर्भद्रमन्द्रत्वादिः, सत्त्वं धैर्यं, वयःस्थता कर्मक्षमवयःप्राप्तिः, प्राणः कायबलं, वर्म समुचितोत्सेधायामपरिणाहयोगित्वं, जवो वेगः, तेजः पराक्रमणशीलत्वं परिभवासहिष्णुता वा, शिल्पं सुशिक्षितत्वं,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पत्त्यश्वरथद्विपानां सारत्रिभागमुरस्यं स्थापयेद्, द्वौ त्रिभागौ कक्षं पक्षं चोभयतः। अनुलोममनुसारम्। प्रतिलोमं तृतीयसारम्। फल्गु प्रतिलोमम्। एवं सर्वमुपयोगं गमयेत्।

फल्गुबलमन्तेष्ववधाय वेगोऽभिहुतो भवति। सारबलमग्रतः कृत्वा कोटीष्वनुसारं कुर्यात्। जघने तृतीयसारं, मध्ये फल्गुबलमेतत् सहिष्णु भवति।

स्थैर्यं प्रहारेऽप्यारब्धकर्मापरित्यागित्वम्, उदग्रता उच्छ्रितमुखत्व, विधेयत्वं नियन्तृवश्यता, सुव्यञ्जनाचारता शोभनलक्षणत्वं शोभनचेष्टितत्वं च। नन्विह रथानां सारबलत्वं कस्मान्नोक्तम्। उच्यते। तेषां हि सारबलत्वं नेतृपुरुषाश्वद्वारकं वक्तव्यं, तच्च पुरुषाश्वयोः सारबलत्ववचनेनैवोक्तप्रायमित्यदोषः।

यथोक्तरूपं पत्त्यादिसारं व्यूहे कथमुपयुञ्जीतेत्यपेक्षायामाह— **पत्त्यश्वरथद्विपानामिति**। तेषां, सारत्रिभागं सारस्य त्रिधा विभक्तस्यैकं त्रिभागम्, उरस्यं स्थापयेत् उरस्यात्मना निवेशयेत् मध्यगतं कुर्यादित्यर्थः। द्वौ त्रिभागौ, कक्षं पक्षं चोभयतः कक्षात्मना पक्षात्मना चेत्युभयात्मना, स्थापयेत् — तयोस्त्रिभागयोरेकं पश्चादन्तःपार्श्वयोरपरं पुरस्तात्कोट्योश्चार्धशो निवेशयेदित्यर्थः। एष उत्तमसारस्य विनियोगप्रकारः। तदपेक्षया किञ्चिदवरस्यानुसाराख्यस्य सारभेदस्य विनियोगमाह — **अनुलोममनुसारमिति**। स्थापयेदिति वर्तते। अनुसारं बलम्, अनुलोमं स्थापयेत् उत्तमसारस्य पृष्ठतो निवेशयेत्। अनुलोमं ह्यनुसारमुच्यते यत् पृष्ठगं भवति। प्रतिलोमं तु तद्विपरीतं पुरोगतम्। अनुसारात् किञ्चिदवरस्य सारभेदस्य विनियोगमाह — **प्रतिलोममिति**। तृतीयसारं द्वितीयभूतानुसारापेक्षया तृतीयं सारं, प्रतिलोमं स्थापयेत् उत्तमसारस्याग्रगतं कुर्यात्। अथ फल्गुनो बलस्य विनियोगमाह — **फल्गुवति**। तत्, प्रतिलोमं स्थापयेत् तृतीयसारस्यापि पुरस्थितं कुर्यादित्यर्थः। **एवमिति**। अनेन प्रकारेण, सर्वं सर्वप्रकारं बलम्, उपयोगं, गमयेत् नयेत्।

किमर्थं सारे विद्यमाने फल्गुबलस्याग्रतो निवेशनमित्यत्राह— **फल्गुबलमिति**। तत्, अन्तेषु पक्षादीनामग्रेषु, अवधाय निवेश्य, युध्यमानेनेति शेषः, वेगः आपततां प्रतिबलानामग्रिमो जवः, अभिहुतः कृतहोमः पुरःस्थितफल्गुबलरूपाग्निसात्कारप्रशमित इत्यर्थः, भवति। क्षयोऽपि तद्वशात् फल्गु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यूहं तु स्थापयित्वा पक्षकक्षोरस्यानामेकेन द्वाभ्यां वा प्रहरेत् । शेषैः प्रतिगृह्णीयात् ।

यत् परस्य दुर्बलं वीतहस्त्यश्वं दूष्यामात्यकं कृतोपजापं वा, तत् प्रभूतसारेणाभिहन्यात् । यद् वा परस्य सारिष्ठं, तद् द्विगुणसारेणाभिहन्यात् । यदङ्गमल्पसारमात्मनः, तद् बहुनोपचिनुयात् । यतः परस्यापचयस्ततोऽभ्याशे व्यूहेत, यतो वा भयं स्यात् ।

बलस्य मनाग् भवन् सारबलस्येव नातिदोषावह इत्यभिप्रायः । अभिहत इत्यपि माधवपाठः । फल्गुबलविषयत्वापादनेन क्षपितसामर्थ्य इति तदर्थः । अभिहूलित इति त्वपपाठः । व्यूहान्तरं तत्फलं चाह — **सारेत्यादि** । अग्रतः सारबलस्य कोटिष्वनुसारबलस्य कक्षयोस्तृतीयसारस्य मध्ये फल्गुबलस्य च निवेशनतोऽपि व्यूहो जायते; तथा व्यूढं सैन्यं परबलवेगेन नाभिभूयते चेत्यर्थः ।

अथ व्यूढे सैन्ये योधनप्रकारमाह — **व्यूहं त्विति** । तं, स्थापयित्वा, पक्षकक्षोरस्यानां पक्षयोः पुरस्तात्कोट्योः कक्षयोः पश्चादन्तःपार्श्वयोः उरस्यस्य मध्यस्य चेत्येतेषां पञ्चधा विभक्तानां मध्ये, एकेन अङ्गेन, द्वाभ्यामङ्गाभ्यां वा, प्रहरेत् अर्थाद् विजिगीषुः परबलम् । शेषैः त्रिभिरङ्गैः, प्रतिगृह्णीयात् प्रतीच्छेद्, अर्थात् स्वयं प्रहारप्रवृत्तं परबलम् ।

परबले प्रहारस्थानमाह — **यदेति** । परस्य यत् सैन्यं, दुर्बलम् अल्पबलं, वीतहस्त्यश्वं सारमपि हस्त्यश्वरहितं, दूष्यामात्यकं दूष्याः क्रुद्धभीतादिरूपा अमात्या यस्मिंस्तत् तथाभूतं, कृतोपजापं वा कृतभेदनं वा, तत् सैन्यं, प्रभूतसारेण प्रचुरेण सारबलेन, अभिहन्यात् । **यद्वेति** । यत् परस्य सारिष्ठं सारतमं बलं, तत्, द्विगुणसारेण तदपेक्षया द्विगुणसारेण बलेन, अभिहन्यात् । **यदिति** । यद् आत्मनः, अङ्गं पत्त्याद्यन्यतमम्, अल्पसारं, तद् बहुना प्रभूतेनाङ्गेन, उपचिनुयाद् वर्धयेत् । पराभिघातानुगुणमात्माभयानुगुणं च व्यूहनविशेषमाह — **यत इत्यादि** । परव्यूहस्य सम्बन्धिनि यस्मिन् पक्षकक्षाद्यन्यतमे सेनाङ्गापचयो दृश्यते तस्यान्तिके वा, यतः पक्षकक्षाद्यन्यतमाद् भयं सम्भाव्यते तस्यान्तिके वा स्वबलं व्यूहेतेत्यर्थः । तदित्थमुभयथा व्यूहविभागविधिः प्रतिपादितः । अथ युद्धकर्माभिधातव्यम् । तत्र

पत्त्यश्वरथहस्तियुद्धानि इति सूत्रम् । पत्त्यादीनां चतुर्णां युद्धान्युच्यन्त इति सूत्रार्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभिसृतं परिसृतमतिसृतमपसृतमुन्मथ्यावधानं वलयो गोमूत्रिका मण्डलं प्रकीर्णिका व्यावृत्तपृष्ठमनुवंशमग्रतः पार्श्वाभ्यां पृष्ठतो भग्नरक्षा भग्नानुपातः इत्यश्वयुद्धानि।

प्रकीर्णिकावर्जान्येतान्येव, चतुर्णामङ्गानां व्यस्तसमस्तानां वा घातः, पक्षकक्षोरस्यानां च प्रभञ्जनमवस्कन्दः सौप्तिकं चेति हस्तियुद्धानि।

उन्मथ्यावधानवर्जान्येतान्येव स्वभूमावभियानापयानास्थितयुद्धानीति रथयुद्धानि।

तत्रादावश्वकर्माणि त्रयोदशरूपाण्याह—**अभिसृतमित्यादि**। इदमित्थं व्याचक्षते—स्वबलात् परबलं प्रति पूर्वमभिसरणम् अभिसृतं, परबलस्य पुरः पृष्ठतः पार्श्वे चाभिहत्य परितो भ्रमणं परिसृतं, परबलं मध्यतो भित्त्वा सूचीवदभिगमनम् अतिसृतं, तेनैव मार्गेण पुनर्निर्गमनम् अपसृतं, बहुभिरश्वैरितस्ततश्चोन्मथ्यावभज्यावधानं पुनरेकत्रावस्थानम् उन्मथ्यावधानं, द्विधा सूचिमार्गेणाभिगमनं वलयः, गोमूत्रवद् वक्रगत्या प्रवृत्तिर्गोमूत्रिका, परबलस्यैकदेशमवच्छिद्य तत्परिवेष्टनं मण्डलं, सर्वगतीनां साङ्कर्येण प्रयोगः प्रकीर्णिका, अपसारं कृत्वा पुनरतिसरणं व्यावृत्तपृष्ठं, परबलाभिमुखस्य स्वबलस्यानुवर्तनम् अनुवंशं, प्रहरतामेव युद्धान्निवृत्य स्वबलप्रवेश इत्यन्ये, भग्नानां स्वबलानाम् अग्रतः पार्श्वाभ्यां पृष्ठतो भ्रमणं भग्नरक्षा, भग्नस्य परबलस्यानुवर्तनं भग्नानुपातः इति।

हस्तियुद्धान्याह—**प्रकीर्णिकावर्जानीति**। अलघुवपुरशक्यप्रकीर्णिकातिरिक्तानि, एतान्येव अभिसृतादीनि, चतुर्णाम् अङ्गानां पत्त्यादीनां व्यस्तसमस्तानां वा घातः, पक्षकक्षोरस्यानां च प्रभञ्जनम् अवमर्दनम्, अवस्कन्दः छिद्रमुपलभ्य प्रहारः, सौप्तिकं सुप्तघातः, इति हस्तियुद्धानि।

रथकर्माण्याह—**उन्मथ्यावधानवर्जानीति**। उन्मथ्यावधानव्यतिरिक्तानि, एतान्येव हस्तिकर्माण्येव, स्वभूमौ अभियानापयानास्थितयुद्धानि 'समा स्थिराभिकाशे'त्यादिना लक्षितायां स्वयोग्यायां भूमौ स्थित्वा अभियानं परबलाभिक्रमणम् अपयानं परबलमभिभूयापसरणं स्थितयुद्धं च कृतपरिरक्षस्य शत्रोः प्राकारं परिवृत्य चिरमवस्थाय तेन सह योधनं च, इत्येतानि च, रथयुद्धानि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वदेशकालप्रहरणमुपांशुदण्डश्चेति पत्तियुद्धानि ॥
एतेन विधिना व्यूहानोजान् युग्मांश्च कारयेत् ।
विभवो यावदङ्गानां चतुर्णां सदृशो भवेत् ॥
द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहे ।
भिन्नसङ्घातनं तस्मान्न युध्येताप्रतिग्रहः ॥

इति कौटलीयार्थशास्त्रे सांग्रामिके दशमाधिकरणे पञ्चमोऽध्यायः,
पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, सारफल्गुबल-
विभागः, पत्त्यश्वरथहस्तियुद्धानि च ।
आदितस्त्रयस्त्रिंशच्छततमः ॥

पत्तियुद्धान्याह — **सर्वदेशकालेत्यादि** । स्पष्टार्थम् ॥

एतेन विधिनेति । उक्तेन कल्पेन, ओजान् अयुग्मान्, युग्मांश्च समांश्च, व्यूहान्, कारयेत् । कथं, यावद् यथा, चतुर्णाम् अङ्गानां द्विपहयरथपत्तीनां, विभवः समृद्धिः, सदृशो भवेद् व्यूहानामनुरूपः स्यात् । अङ्गविभवानुरूप्येण व्यूहान् निवेशयेदित्यभिप्रायः ॥

युद्धे प्रवृत्ते क्व राजा तिष्ठेदित्यत्राह — **द्वे शते धनुषां गत्वेति** । व्यूहाद् धनुर्द्विशतमानमन्तरालं विहाय, राजा, प्रतिग्रहे सैन्यपृष्ठे, तिष्ठेत् । प्रतिग्रह इति प्रथमान्तपाठे तात्स्थ्यात् ताच्छब्द्यं बोद्धव्यम् । किमर्थं, तस्माद् भिन्नसंघातनं परबलकृताभिघातभिन्नानां स्वबलानाम् एकीकरणलक्षणं प्रयोजनं राज्ञः सैन्यपृष्ठावस्थानात् सिध्यतीत्यर्थः । अत एवाह — **न युध्येताप्रतिग्रह** इति । अनाश्रितसैन्यपृष्ठो न युद्धं कुर्यादित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां सांग्रामिके दशमेऽधिकरणे
पञ्चमोऽध्यायः, पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः
सारफल्गुबलविभागः पत्त्यश्वरथहस्तियुद्धानि ।
आदितस्त्रयस्त्रिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१५८, १५९. प्रक. दण्डभोगमण्डलासंहतव्यूहव्यूहनं तस्य प्रतिव्यूहस्थापनं च।

पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः। पक्षौ कक्षावुरस्यं प्रतिग्रहः इति बार्हस्पत्यः।

प्रपक्षकक्षोरस्या उभयोः दण्डभोगमण्डलासंहताः प्रकृतिव्यूहाः। तत्र तिर्यग्वृत्तिर्दण्डः। समस्तानामन्वावृत्तिर्भोगः। सरतां सर्वतोवृत्तिः मण्डलः। स्थितानां पृथगनीकवृत्तिरसंहतः।

दण्डभोगमण्डलासंहतव्यूहव्यूहनमिति सूत्रम्। दण्डव्यूहव्यूहनं भोगव्यूहव्यूहनं मण्डलव्यूहव्यूहनम् असंहतव्यूहव्यूहनमिति चतुर्विधं व्यूहनमुच्यत इति सूत्रार्थः।

तत्र शुक्रबृहस्पत्योर्मतभेदमाह — **पक्षाविति**। पक्षौ बहिःपुरस्तात्कोट्यौ, उरस्यं मध्यं, प्रतिग्रहः सैन्यपृष्ठदेशः, इति, चतुरवयव इति शेषः, औशनसः उशनसोक्तः, व्यूहविभागः। पक्षौ बहिःपुरस्तात्कोट्यौ, कक्षौ पश्चादन्तःपार्श्वे, उरस्यं मध्यं, प्रतिग्रहः सैन्यपृष्ठम्, इति, षडवयव इति शेषः, बार्हस्पत्यः बृहस्पत्युक्तः, व्यूहविभाग इति संबध्यते।

प्रपक्षकक्षोरस्या इति। वक्ष्यमाणरीत्या प्रविभक्तानि पक्षकक्षोरस्थानि बहिःकोट्यन्तःपार्श्वमध्यसैन्यानि येषां ते तथाभूताः, उभयोर्दण्डभोगमण्डलासंहताः शुक्रबृहस्पतिमतयोर्द्वयोरपि दण्डाद्यात्मना चतुर्भेदा इत्यर्थः, प्रकृतिव्यूहाः, भवन्तीति शेषः। तेषां लक्षणमाह— **तत्रेति**। चतुर्षु दण्डादिव्यूहेषु मध्ये, तिर्यग्वृत्तिर्दण्डः तिरश्चीनावस्थानो दण्डसंज्ञो व्यूहः। **समस्तानामिति**। औशनसमते कक्षवर्जितानां चतुर्णां बार्हस्पत्यमते कक्षाभ्यसह षण्णामित्यर्थः, अन्वावृत्तिः अनुबन्धेनावृत्तिः वृत्तबहुलतया स्थितिः, भोगः तत्संज्ञः। **सरतामिति**। शत्रुसैन्याभिमुखं गच्छतां, सर्वानीकानां, सर्वतोवृत्तिः एकीभावेन सर्वतो व्यापारवत्त्वं, मण्डलः तत्संज्ञः। **स्थितानामिति**। शत्रुबलाभिमुख्येन चलनात् पूर्वं 'पञ्चधनुरनीकसन्धिरि'ति नियमानुसारितयावस्थितानां चतुर्णां षण्णां वानीकानां, पृथगनीकवृत्तिः शत्रुबलाभिमुख्येन चलनेऽप्यसंहतानीकतया वृत्तिर्वर्तनं पूर्वस्थितामसंहातेमपरित्यज्यैव चेष्टमानतेत्यर्थः, असंहतः तदाख्यो व्यूहः। इत्थं शुक्रबृहस्पतिमतानुगुणं लक्षणमभिहितम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पक्षकक्षोरस्यैः समं वर्तमानो दण्डः। स कक्षाभिक्रान्तः प्रदरः; स एव पक्षाभ्यां प्रतिक्रान्तो दृढकः; स एवातिक्रान्तः पक्षाभ्यामसह्यः; पक्षावव्यवस्थाप्योरस्याभिक्रान्तः श्येनः; विपर्यये चापं चापकुक्षिः प्रतिष्ठः सुप्रतिष्ठश्च। चापपक्षः सञ्जयः; स एवोरस्यातिक्रान्तो विजयः; स्थूलकर्णपक्षः स्थूलकर्णः; द्विगुणपक्षस्थूलो विशालविजयः; व्यभि-

---

अथ स्वमतेन दण्डादीनामन्यलक्षणं कक्षानङ्गीकर्तृशुक्रमतविरुद्धं बृहस्पतिमताविरुद्धमाह — **पक्षकक्षोरस्यैरिति**। पक्षादिभिः पञ्चभिरनीकैः, समम् अवैषम्येण, वर्तमानः स्थानगमनादि कुर्वन्, दण्डः दण्डव्यूहः। एष च प्रकृतिव्यूहः। एतद्विकारान् प्रदरादीन् लक्षयति — **स इति**। स दण्डः, कक्षाभिक्रान्तः पश्चादन्तःपार्श्वाभ्यां परबलाभिमुखं क्रममाणः, प्रदरः तदाख्यो दण्डविकारः। **स एवेति**। उक्त एव दण्डः, पक्षाभ्यां बहिःपुरस्तात्कोटिभ्यां, प्रतिक्रान्तः प्रतिलोमं क्रममाणः, अर्थात् कक्षाभिमुखमागच्छतः प्रतिबलस्य पीडनार्थं, दृढकः तदाख्यो दण्डविकारः। **स एवेति**। दृढक एव, अतिक्रान्तः पक्षाभ्यां बहिःकोटिभ्यामतिशयेन क्रान्तः परबलस्यान्तर्गाढं प्रविष्ट इत्यर्थः, असह्यः तदाख्यः। **पक्षावितिः**। द्वौ पक्षौ, अवस्थाप्य स्वस्थाने स्थापयित्वा, उरस्याभिक्रान्तः उरस्येन परबलाभिमुखं क्रममाणः, श्येनः तदाख्यः। **विपर्यय** इत्यादि। उक्तप्रदरादिचतुष्टयवैपरीत्ये चापं चापकुक्षिः प्रतिष्ठः सुप्रतिष्ठश्च इति क्रमाच्चत्वारो व्यूहा भवन्तीत्यर्थः। तत्र कक्षाभ्यामभिक्रान्तः यः प्रदर उक्तस्तद्विपरीतः कक्षाभ्यां प्रतिक्रान्तश्चापव्यूहः। यः पक्षाभ्यां प्रतिक्रान्तो दृढक उक्तस्तस्य विपरीतः पक्षाभ्यामभिक्रान्तश्चापकुक्ष्याख्यो व्यूहः। यः पक्षाभ्यामतिक्रान्तोऽसह्य उक्तस्तस्य विपरीतः पक्षाभ्यां प्रतिक्रान्तः प्रतिष्ठाख्यो व्यूहः। यः पक्षावव्यवस्थाप्योरस्याभिक्रान्तः श्येन उक्तस्तस्य विपरीत उरस्येन पक्षाभ्यां चाभिक्रान्तो यद्वातिक्रान्तः सुप्रतिष्ठनामा व्यूहः। एवमष्टौ दण्डव्यूहस्य विकारान् दर्शयित्वा भूयो विकारमाह—**चापपक्ष** इति। चापाकारौ पक्षौ यस्य स तथाभूतः, सञ्जयः तदाख्यो दण्डविकारः। **स एवेति**। दण्ड एव, उरस्यातिक्रान्तः उरस्येन परबलस्यान्तःप्रविष्टः, विजयः तदाख्यः। **स्थूलकर्णपक्ष** इति। स्थूलकर्णौ पक्षौ यस्य स तथाभूतः, स्थूलकर्णः तदाख्यः। स्थूणाकर्णः इत्यादर्शेषु पाठः। **द्विगुणपक्षस्थूल** इति। द्विगुणः विजयापेक्षया पक्षयोः स्थूलः, विशालविजयः तदाख्यः। द्विगुणपक्षस्थूण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कान्तपक्षश्चमूमुखः; विपर्यये झषास्यः। ऊर्ध्वराजिर्दण्डः सूची; द्वौ दण्डौ वलयः; चत्वारो दुर्जयः। इति दण्डव्यूहाः।

पक्षकक्षोरस्यैर्विषमं वर्तमानो भोगः। स सर्पसारी गोमूत्रिका वा। स युग्मोरस्यो दण्डपक्षः शकटः; विपर्यये मकरः; हस्त्यश्वरथैर्व्यतिकीर्णः शकटः पारिपतन्तकः। इति भोगव्यूहाः।

पक्षकक्षोरस्यानाम् एकीभावे मण्डलः। स सर्वतोमुखः सर्वतोभद्रः, अष्टानीको दुर्जयः। इति मण्डलव्यूहाः।

इति तु त्रिष्वादर्शेषु पठ्यते। व्यभिक्रान्तपक्ष इति। कक्षादित्रिकाभिक्रान्तौ पक्षौ यस्य स तथाभूतः, चमूमुखः तदाख्यः। विपर्यय इति। व्यभिक्रान्तोरस्यत्वे, व्यभिक्रान्तकक्षत्वे वा, झषास्यः तदाख्यः। ऊर्ध्वराजिरिति। उपरि परबलाभिमुखा राजिर्बलश्रेणी यस्य स तथाभूतः, दण्डः सूची तदाख्यः। द्वौ दण्डौ वलय इति। 'पक्षकक्षोरस्येषु तिर्यक्स्थितौ द्वौ दण्डौ यस्य स वलयाख्य' इति माधवः। चत्वारो दुर्जय इति। दण्डावित्यनुवृत्तं बहुवचनान्ततया विपरिणम्यते। पक्षकक्षोरस्येषु प्रत्येकं चत्वारो दण्डाः तिर्यग्दण्डाकारा बलश्रेण्यो यत्र भवेयुः स दुर्जयाख्य इत्यर्थः। इति दण्डव्यूहा इति। एवं दण्डप्रदरदृढकादयोऽष्टादशप्रकारा दण्डव्यूहा उक्ताः।

भोगव्यूहानाह — पक्षकक्षोरस्यैरिति। पक्षादिभिः, विषमं वर्तमान इति समं वर्तमानो हि उक्तः पूर्वं तद्विपरीत इत्यर्थः, भोगः तदाख्यो व्यूहः सर्पकायकुटिलावस्थानत्वादित्यर्थः। स इति। भोगव्यूहः, सर्पसारी सर्पवदाकारः, गोमूत्रिका वा गोमूत्रवद् बहुधा विभिन्नाकारो वा, इति द्विधेति शेषः। स इति। भोगः, युग्मोरस्यः द्विधाविभक्तदण्डाकारमध्यः, दण्डपक्षः दण्डौ एकैकदण्डाकारौ पक्षौ यस्य स तथाभूतः, शकटः तदाख्यः। विपर्यये मकर इति। द्विधाविभक्तदण्डाकारपक्षः एकदण्डाकारोरस्यो मकराख्य इत्यर्थः। हस्त्यश्वरथैरित्यादि। शकटव्यूह एव हस्त्यश्वरथैः संकीर्णः पारिपतन्तकसंज्ञ इत्यर्थः। इति भोगव्यूहा इति। अनेन प्रकारेण सर्पसार्यादयः पञ्च व्यूहा उक्ताः।

मण्डलव्यूहं लक्षयति — पक्षकक्षोरस्यानामिति। तेषाम्, एकीभावे पुर्वोक्तानीकसन्धिरूपमन्तरालं विनान्योन्यमेलने, मण्डलः तदाख्यो व्यूहः। 'सरतां सर्वतो वृत्तिर्मण्डलः' इति पूर्वं लक्षितस्येदं स्वाभिमतं लक्षणम्। स

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पक्षकक्षोरस्यानाम् असंहतादसंहतः। स पञ्चानीकानामाकृतिस्थापनाद् वज्रो गोधा वा। चतुर्णामुद्यानकः काकपदो वा। त्रयाणामर्धचन्द्रिकः कर्कटकशृङ्गी वा। इत्यसंहतव्यूहाः।

रथोरस्यो हस्तिकक्षोऽश्वपृष्ठोऽरिष्टः।
पत्तयोऽश्वा रथा हस्तिनश्चानुपृष्ठमचलः।
हस्तिनोऽश्वा रथाः पत्तयश्चानुपृष्ठमप्रतिहतः।

इति। मण्डलः, सर्वतोमुखः चतुर्दिक्षु प्रतिबलाभिमुखः, सर्वतोभद्रः सर्वतोभद्राख्यः। **अष्टानीको दुर्जय** इति। युग्मोरस्यश्चतुष्पक्षो द्विकक्षो मण्डलः दुर्जयसंज्ञः। **इति मण्डलव्यूहा** इति। बहुत्वाविवक्षया मण्डलव्यूहावित्यर्थः। अनुक्तोद्यत्वाभिप्रायं वा बहुत्वम्।

'स्थितानां पृथगनीकवृत्तिरसंहत' इति पूर्वं लक्षितस्य स्वीयं लक्षणमाह — **पक्षकक्षोरस्यानामित्यादि**। पक्षादीनां पञ्चानां स्थाने परबलाभिमुखगमने चासंहतत्वादसंहताख्यो व्यूहः इत्यर्थः। असंहतः पक्षकक्षोरस्यानां पञ्चानामनीकानां वज्राद्याकारेण स्थापनाद् वज्राख्यो गोधाख्य इति द्विरूपो भवतीत्याह — **स पञ्चानीकानामित्यादि**। **चतुर्णामिति**। आकृतिस्थापनादिति वर्तते। चतुर्णां पक्षयोरुरस्यस्य प्रतिग्रहस्येत्येषाम्, आकृतिस्थापनाद्, उद्यानकः काकपदो वा। **त्रयाणामिति**। पक्षयोः प्रतिग्रहोरस्यान्यतरस्येत्येवं त्रयाणाम्, आकृतिस्थापनाद्, अर्धचन्द्रिकः, कर्कटकशृङ्गी वा। **इत्यसंहतव्यूहा** इति। एवं षट्प्रकाराः असंहतव्यूहाः।

एवं दण्डभोगमण्डलासंहताख्यान् भेदानभिधाय व्यूहस्यान्यांस्त्रीन् भेदानाह — **रथोरस्य** इति। रथमध्यः, हस्तिकक्षः द्विपा अन्तःपार्श्वयोर्यस्य स तथा, अश्वपृष्ठः, अर्थात् पत्तिपक्षश्च, अरिष्टः रिष्टमशुभं न विद्यते ऽस्मिन्निति कृत्वा तदाख्यः।

पत्तय इति। ते अर्थात् पक्षयोः, अश्वाः अर्थादुरस्ये, रथाः कक्षयोः, अनुपृष्ठं हस्तिनश्च, यस्मिन् भवन्ति स इति शेषः, अचलः तदाख्यः।

हस्तिन इत्यादि। ते पक्षयोः, अश्वाः उरस्ये, रथाः कक्षयोः, पत्तयश्चानुपृष्ठं पृष्ठे पदातयश्च, यत्र भवन्ति स इति शेषः, अप्रतिहतः तदाख्यो व्यूहः। **इति दण्डभोगमण्डलासंहतव्यूहव्यूहनमुक्त्वा प्रतिव्यूहस्थापनमभिधातुं सूत्रं —**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेषां प्रदरं दृढकेन घातयेत्; दृढकमसह्येन; श्येनं चापेन; प्रतिष्ठं सुप्रतिष्ठेन; सञ्जयं विजयेन; स्थूलकर्णं विशालविजयेन; पारिपतन्तकं सर्वतोभद्रेण। दुर्जयेन सर्वान् प्रतिव्यूहेत।

पत्त्यश्वरथद्विपानां पूर्वं पूर्वमुत्तरेण घातयेत्। हीनाङ्गमधिकाङ्गेन चेति।

अङ्गदशकस्यैकः पतिः पदिकः; पदिकदशकस्यैकः सेनापतिः;

तस्य प्रतिव्यूहस्थापनमिति। तस्य उक्तस्य बलव्यूहस्य प्रतिबलव्यूहस्थापनमभिधीयत इति सूत्रार्थः।

उक्तानां प्रदरादीनां व्यूहानां मध्ये कतमं कतमेन प्रतिव्यूहेन घातयेदित्याकाङ्क्षायामाह — **तेषां प्रदरमित्यादि**। दण्डव्यूहभेदतया मण्डलव्यूहभेदतया चोक्तो यो दुर्जयव्यूहः, स सर्वेषामपि व्यूहानां प्रतिघातक्षमः प्रतिव्यूहो भवतीत्याह — **दुर्जयेन सर्वान् प्रतिव्यूहेतेति**।

व्यूहानां प्रत्येकं प्रतिव्यूहनियममुक्त्वा सेनाङ्गानां पत्त्यादीनां प्रतिबलनियममाह — **पत्त्यश्वरथद्विपानामित्यादि**। पत्तिमश्वेन अश्वं रथेन रथं द्विपेन च घातयेदित्यर्थः। **हीनाङ्गमिति**। अवरसारपरिमाणम् अङ्गम्, अधिकाङ्गेन अधिकसारपरिमाणेनाङ्गेन, घातयेदित्यनुषज्यते। चकारो वाक्यार्थसमुच्चये। इतिशब्दः प्रतिबलनियमविधिसमाप्त्यर्थः।

सेनाङ्गानां विभागसंघातादिकर्मकर्तव्यत्वसूचकास्तदधिपतिना संकेताः कल्पनीया इति वक्ष्यति। तमेवाधिपतिं लक्षयंस्त्रिधा विभज्य दर्शयति — **अङ्गदशकस्येति**। इहाङ्गशब्देन प्रधानभूते रथहस्तिरूपे व्यूढे सेनाङ्गे गृह्येते, तेन रथदशकहस्तिदशकयोरित्यर्थः, एकः पतिः भर्ता, पादिकः तत्संज्ञः। ननु अस्मिन् प्रधानाङ्गदशकारब्धे व्यूहेऽन्ययोरप्यङ्गयोरश्वपत्तिरूपयोरवश्यम्भावात् तत्संख्याप्यभिधानीया। सत्यं, किन्तु अर्थसिद्धा सेति कृत्वा नोक्ता। अर्थसिद्धिश्चेत्थम् — एकैकस्य रथस्य हस्तिनो वा पुरोयायिनः पञ्च पादगोपाः पञ्चेत्याहत्य दशानामश्वानां योगाद् रथदशकेनाश्वशतकमाक्षिप्तं भवति। तथा एकैकस्याश्वस्य त्रयः पुरोयायिनः पुरुषास्त्रयः पादगोपा इत्याहत्य षण्णां पत्तीनां योगादश्वशतकेन पत्तीनां षट्शतमाक्षिप्तं भवतीति। एवञ्च रथानां हस्तिनां वा दशकस्याश्वशतकपत्तिषट्शताभ्यां युक्तस्य नेता पदिकसंज्ञ इत्युक्तं भवति। **पदिकदशकस्येति**। पदिकानां दशकस्य स्वस्वनेय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदृशकस्यैको नायक इति । स तूर्यघोषध्वजपताकाभिः व्यूहाङ्गानां संज्ञाः स्थापयेद् अङ्गविभागे सङ्घाते स्थाने गमने व्यावर्तने प्रहरणे च ।

समे व्यूहे देशकालसारयोगात् सिद्धिः ॥

यन्त्रैरुपनिषद्योगैस्तीक्ष्णैर्व्यासक्तघातिभिः ।
मायाभिर्दैवसंयोगैः शकटैर्हस्तिभूषणैः ॥
दूष्यप्रकोपैर्गोयूथैः स्कन्धावारप्रदीपनैः ।
कोटीजघनघातैर्वा दूतव्यञ्जनभेदनैः ॥
दुर्गं दग्धं हृतं वा ते कोपः कुल्यः समुत्थितः ।
शत्रुराटविको वेति परस्योद्वेगमाचरेत् ॥

बलसहितस्य, एकः पतिः, सेनापतिः तत्संज्ञः । तदृशकस्येति । सेनापतिदृशकस्य, एकः पतिः, नायकः इति आख्यायत इति शेषः । स इत्यादि । नायकः, व्यूहाङ्गानां व्यूढहस्त्यादीनाम्, अङ्गविभागे संहतानामङ्गानां विभजने, संघाते विभक्तानां पिण्डीभावे, स्थाने गतिनिवृत्तौ, गमने गतिकरणे, व्यावर्तने अभियोधनात् प्रत्यावर्तने, प्रहरणे च अभियोधने च करणीये इति शेषः । तूर्यघोषध्वजपताकाभिः संज्ञाः स्थापयेत् तूर्यघोषविशेषैः ध्वजपताकाविशेषैश्च संकेतान् स्थापयेत् । ईदृशे तूर्यघोषे श्राविते विभागसंघातादिष्विदमिदं कर्तव्यम् ईदृशीषु ध्वजपताकासु प्रदर्शितास्विदमिदं कर्तव्यमिति संकेतान् कल्पयित्वानुतिष्ठेदित्यर्थः ।

समे व्यूह इति । दण्डादिव्यूहेषु स्वबलपरबलयोः समानेषु सत्सु, देशकालसारयोगात् देशः समविषमादिः कालः राज्यादियोधिनां राज्यादिः सारः शौर्यादिः एषां योगात्, सिद्धिः जयः, भवतीति शेषः ॥

श्लोकत्रयमेकान्वयमाह—यन्त्रैरित्यादि । यन्त्रैः जामदग्न्यादिभिः, उपनिषद्योगैः औपनिषदिके वक्ष्यमाणैर्विषधूमाम्बुदूषणादिभिरुपायैः, व्यासक्तघातिभिस्तीक्ष्णैः अन्यासक्तचित्तपुरुषहननशीलैस्तीक्ष्णसंज्ञितैर्गूढपुरुषैः, मायाभिः असदर्थप्रदर्शनीभिरिन्द्रजालविद्याभिः, दैवसंयोगैः राज्ञो दैवसाक्षात्काराख्यापनैः, हस्तिभूषणैः शकटैः हस्त्युचितवेषाच्छादनादिच्छन्नस्वरूपैरनोभिः, दूष्यप्रकोपैः शत्रुदूष्याणां कोपोत्पादनैः, गोयूथैः अग्रे गोवृन्दनिवेशनैः, स्कन्धावारप्रदीपनैः शिबिरसन्दीपनैः, कोटीजघनघातैर्वा कोट्योः पक्षयोः जघनयोः कक्षयोश्च घातैरकाण्डप्रहारदानैर्वा, दूतव्यञ्जनभेदनैः दूतवेषाणां चाराणामुपजापकरणैश्च, परस्योद्वेगमाचरेदित्यग्रिमेणान्वयः । शत्रोर्भयोत्पादनेनैव स्वार्थमन्विच्छेत् न त्वग-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकं हन्यान्न वा हन्यादिषुः क्षिप्ता धनुष्मता ।
प्राज्ञेन तु मतिः क्षिप्ता हन्यादू गर्भगतानपि ॥

इति कौटलीयार्थशास्त्रे साङ्ग्रामिके दशमाधिकरणे षष्ठोऽध्यायः,
दण्डभोगमण्डलासंहतव्यूहव्यूहनं तस्य प्रतिव्यूहस्थापनं च ।
आदितश्चतुस्त्रिंशच्छततमः ॥

एतावता कौटलीयार्थशास्त्रस्य सांग्रामिकं
दशममधिकरणं समाप्तम् ॥

तिकगतिभूतेन सन्दिग्धजयेन युद्धेनेत्यर्थः । भूयोऽप्युद्वेगहेतूनाह—**दुर्गमिति** । दग्धं हृतमित्यादौ इतिशब्दः प्रत्येकं सम्बध्यते । दुर्गं दग्धमिति तव दुर्गदाहो जात इत्यनेन हेतुना वा, हृतमिति वा तव दुर्गं स्वायत्तीकृतमित्यनेन वा, ते कुप्यः कोप इति वा त्वत्कुलभवपुरुषनिमित्तो जनपददाहाद्यनर्थरूपः कोप उत्पन्न इत्यनेन वा, ते शत्रुः सामन्तः, समुत्थित इत्यनेन वा, ते आटविकः समुत्थित इत्यनेन वा, परस्योद्वेगम् आचरेत् ॥

युद्धान्मन्त्रो बलवत्तरः कार्यसिद्धावित्याह—**एकमित्यादि** । धानुष्केण बाणः प्रयुक्तः परं हन्यान्न वेति संशयः, घ्नन्नपि वा एकमेव हन्यान्न ततोऽधिकम् । प्रज्ञावता तु केवला मतिरात्मनः प्रयुक्ता परं हन्यादेव, घ्नती च नैकं परं किन्तु तदीयान् गर्भस्थानपि जनान् हन्तीत्यहो मतेरिष्वपेक्षया शक्त्यतिशयवत्तेत्यर्थः । अत एवाहुः—

"युद्धं सर्वात्मना त्याज्यं राज्यकामेन धीमता ।
उपायैस्त्रिभिरादानमर्थस्याह बृहस्पतिः ॥" इति ॥
व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
साङ्ग्रामिकाधिकरणं दशमं समपूर्यत ॥

इति श्री**वञ्चिमण्डल**महाराजाश्रितस्य **ताम्रपर्णी**तीरवर्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बा**श्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु **कौटलीयार्थशास्त्रव्याख्यायां**
सांग्रामिके दशमेऽधिकरणे षष्ठोऽध्यायः, दण्डभोगमण्डलासंहतव्यूहव्यूहनं तस्य प्रतिव्यूहस्थापनम्, आदितश्चतुस्त्रिंशच्छततमः ॥
सांग्रामिकं दशममधिकरणं समाप्तम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संघवृत्तम् — एकादशमधिकरणम् ।

१६०,१६१. प्रक. भेदोपादानानि, उपांशुदण्डश्च ।

सङ्घलाभो दण्डमित्रलाभानामुत्तमः । सङ्घा हि संहतत्वादधृष्याः परेषाम् । ताननुगुणान् भुञ्जीत सामदानाभ्याम् । विगुणान् भेददण्डाभ्याम् ।

काम्बोजसुराष्ट्रक्षत्रियश्रेण्यादयो वार्ताशस्त्रोपजीविनः । लिच्छविकव्रजिकमल्लकमद्रककुकुरकुरुपाञ्चालादयो राजशब्दोपजीविनः ।

अथ सङ्घवृत्तं नामैकादशमधिकरणमारभ्यते । विजिगीषुभूमौ तदनन्तरभूमौ वा वास्तव्यानां प्रत्येकक्षुद्रत्वेऽपि संघीभावासादितशक्तीनां वार्ताशस्त्रोपजीविनामभटानामेव स्वायत्तीकरणोपाया अस्मिन्नधिकरणे सूत्रद्वयेनाभिधीयन्ते । तत्र प्रथमं

भेदोपादानानीति सूत्रम् । भेदानां संघविश्लेषोपायानाम् उपादानानि प्रयोगा उच्यन्त इति सूत्रार्थः ।

संघलाभ इत्यादि । संघस्य यथोक्तरूपस्य मुख्याधिष्ठितस्य लाभः सहायत्वेन प्राप्तिः, दण्डमित्रलाभानाम् उत्तमः दण्डमित्रोभयलाभा ये बहुरूपास्तेषां मध्ये प्रशस्तः, सैन्यत्वेनं मित्रत्वेन चोपयोक्तुं योग्यत्वादित्यभिप्रायः । अस्त्येवं संघलाभो दण्डमित्रोभयलाभप्रकारः कश्चित्, तस्य कथं तदुत्तमत्वं तत्राह—**संघा हीति** । ते हि, संहतत्वात् संघातासादितशक्तित्वात्, अधृष्याः परेषां शत्रूणामजय्याः । यद्यपि भृतादिभटानामपि संहतत्वमस्ति, तथापि तद् अन्यकारितं, संघस्य तु तत् स्वोत्साहकारितमित्यन्यापेक्षया शक्तिमत्तरमिति भावः । **तानिति** । संघान्, अनुगुणान् अविरुद्धान्, सामदानाभ्यां भुञ्जीत स्वायत्तीकुर्यात् । विगुणान् प्रतिकूलान्, भेददण्डाभ्यां, भुञ्जीतेति संबध्यते ।

के ते संघिन इत्याह—**काम्बोजेत्यादि** । काम्बोजेषु सुराष्ट्रेषु च जनपदविशेषयोर्याः क्षत्रियश्रेण्यस्तदादयः आदिग्रहणाद् वैश्यादिश्रेण्योऽपि गृह्यन्ते, तदन्तर्गता जना इत्यर्थः, वार्ताशस्त्रोपजीविनः । **लिच्छविकेत्यादि** । लिच्छविकादिदेशसप्तकवास्तव्या आदिपदादन्धकवृष्ण्यादयश्च, राजशब्दोपजीविनः राजनाममात्रं वहन्तः संघमुपजीवन्तीत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वेषामासन्नाः सत्रिणः सङ्घानां परस्परन्यङ्गद्वेषवैरकलहस्थानान्युपलभ्य क्रमाभिनीतं भेदमुपचारयेयुः—'असौ त्वा विजल्पति' इति । एवमुभयतः । बद्धरोषाणां विद्याशिल्पद्यूतवैहारिकेष्वाचार्यव्यञ्जना बालकलहानुत्पादयेयुः । वेशशौण्डिकेषु वा प्रतिलोमप्रशंसाभिः सङ्घमुख्यमनुष्याणां तीक्ष्णाः कलहानुत्पादयेयुः; कृत्यपक्षोपग्रहेण वा ।

कुमारकान् विशिष्टच्छन्दिकया हीनच्छन्दिकानुत्साहयेयुः ।

सर्वेषामिति । उक्तानां वार्ताशस्त्रोपजीविनां राजशब्दोपजीविनां चेत्युभयविधानां, सङ्घानाम्, आसन्नाः केनापि निमित्तेनासत्तिं प्राप्ता भूत्वा, सत्रिणः, परस्परन्यङ्गद्वेषवैरकलहस्थानानि परस्परस्य न्यङ्गं दोषवचनं द्वेषो वाक्पारुष्यादिकृतो रोषः वैरम् अपकारादिनिमित्तं द्रोहचिन्तनं कलहस्थानं परप्रार्थितैकामिषप्रार्थित्वादि एतानि, उपलभ्य छिद्रभूतान्यासाद्य, क्रमाभिनीतं क्रमेणाभिमुखतां नीतं सङ्घिनं, भेदं विश्लेषम्, उपचारयेयुः प्रापयेयुः । कथमिति, असौ त्वा त्वां, विजल्पति अपवदति, इति उक्त्वेति शेषः । **एवमुभयत** इति । अनेन प्रकारेण भेद्यावुभावपि भेदमुपचारयेयुरित्यर्थः । **बद्धरोषाणामिति** । अन्योन्यरूढामर्षाणां सङ्घिनां, विद्याशिल्पद्यूतवैहारिकेषु विद्या आन्वीक्षिक्यादिः शिल्पम् अस्त्रशिक्षादि द्यूतं प्रसिद्धं वैहारिकं प्रश्नोत्तरादि एतेषु विषये, आचार्यव्यञ्जनाः आचार्यवेषाः सत्रिणः, बालकलहान् बालानां पुत्राणामध्याप्यमानानां कलहान्, उत्पादयेयुः 'असौ त्वामज्ञमाचष्ट' इत्यादिभिर्भेदवचनैरित्यभिप्रायः । **वेशशौण्डिकेषु वेति** । वेशशब्द इह वेश्यावृत्तिः वेश्यासु सुराविक्रयिषु च प्रसक्तानामिति शेषः, सङ्घमुख्यमनुष्याणां संघेषु ये मुख्यपुरुषास्तेषां, प्रतिलोमप्रशंसाभिः प्रतीपश्लाघाभिः अर्थात् स्वप्रेरितवेश्याशौण्डिककृताभिः, तीक्ष्णाः, कलहान् परस्परवाक्कलहान्, उत्पादयेयुः । **कृत्यपक्षोपग्रहेण वेति** । संघमुख्यमनुष्याणां ये कृत्याः क्रुद्धलुब्धभीतावमानिताः तेषामुपग्रहेण स्वानुकूलीकरणेन वा, कलहान् उत्पादयेयुः ।

कुमारकानिति । हीनच्छन्दिकान् इष्टभोग्यवृत्तिश्छन्दिका सा हीना अल्पा प्रभूतवृत्त्यपेक्षया येषां तांस्तथाभूतान्, कुमारकान् संघेषु मुख्येभ्यः किञ्चिदवरा राजपुत्रकल्पाः कुमारकाः तान्, विशिष्टच्छन्दिकया विशिष्टया उत्कृष्टया छन्दिकया तत्तुल्येन कुमारान्तरेणानुभूयमानया, उत्साहयेयुः अमर्ष-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशिष्टानां चैकपात्रं विवाहं हीनेभ्यो वारयेयुः । हीनान् वा विशिष्टैरेकपात्रे विवाहे वा योजयेयुः । अवहीनान् वा तुल्यभावोपगमने कुलतः पौरुषतः स्थानविपर्यासतो वा । व्यवहारमवस्थितं वा प्रतिलोमस्थापनेन निशामयेयुः । विवादपदेषु वा द्रव्यपशुमनुष्याभिघातेन रात्रौ तीक्ष्णाः कलहानुत्पादयेयुः । सर्वेषु च कलहस्थानेषु हीनपक्षं राजा कोशदण्डाभ्यामुपगृह्य प्रतिपक्षवधे योजयेत्, भिन्नानपवाहयेद् वा । एकदेशे समस्तान् वा निवेश्य भूमौ चैषां पञ्चकुलीं दशकुलीं वा कृष्यां निवेशयेत् । एकस्था हि शस्त्रग्रहणसमर्थाः स्युः । समवाये चैषामत्ययं स्थापयेत् ।

वतः कुर्युः, 'समाने कुमारत्वे त्वं हीनवृत्तिरन्यो विशिष्टवृत्तिरि'त्याद्युक्त्वेति भावः ।

विशिष्टानां चेति । उत्कृष्टानाम्, एकपात्रम् एकपङ्क्तिभोजनं, विवाहं कन्यादानादानसंबन्धं, हीनेभ्यः वारयेयुः । वारणे ह्युभयेषां विरोधः स्यादिति भावः । भेदप्रकारान्तरमाह — **हीनान्** वेति । निकृष्टान्, विशिष्टैः सह, एकपात्रे विवाहे वा, योजयेयुः निर्बन्धवतः कुर्युरित्यर्थः । तथाकरणे हि विशिष्टास्तन्मतमननुवर्तमानास्तेभ्यो भिन्नाः स्युरित्यभिप्रायः । कुलेन पौरुषेण स्थानभेदेन वा हीनान् विशिष्टतुल्यत्वाङ्गीकारणायां निर्बन्धवतः कुर्युरित्याह — **अवहीनान्** वेत्यादि । **व्यवहारमवस्थितमि**त्यादि । सङ्घेषु यं कमपि व्यवहारमुत्पन्नं तन्मुख्यकृतनिर्णयमित्यर्थः, प्रतिलोमस्थापनेन निर्णयविपरीतन्यायसमर्थनेन, निशामयेयुः बोधयेयुः अर्थाद् व्यवहर्तारम् । **विवादपदेषु** वेति । तीक्ष्णाः, रात्रौ, द्रव्यपशुमनुष्याभिघातेन संघिसंबन्धिनां द्रव्यादीनामभिघातेन स्वयंकृतेन सङ्घिपरस्परकृततया मिथ्याख्यापितेनेत्यर्थः, विवादपदेषु, कलहान् साहसादिविवादपदप्रयोजकान् परस्परकलहान्, उत्पादयेयुः । ईदृशेषु सर्वप्रकारेषु कलहस्थानेषु राजा हीनपक्षं हिरण्यादिदानेन दण्डेन च स्वपक्षे प्रवेश्य प्रतिपक्षवधे प्रेरयेद्, भिन्नान् संघादन्यत्र नयेद् वेत्याह — **सर्वेषु** चेत्यादि । ये भिन्नास्तान् सर्वान् वा एकस्मिन् देशे निवेश्य एषां भूमौ कुलपञ्चकं कुलदशकं वा कृषिकर्मणि नियोजयेदित्याह — **एकदेश** इत्यादि । समस्तानामेकस्थानस्थितेः फलमाह — **एकस्था** हीत्यादि । अविप्रकीर्णा हि शस्त्रग्रहणकाले लघुसमुत्थाः स्युरिति भावः । **समवाये चैषामि**ति । अपवाहितनिवेशितानां सङ्घिनां संघीभावे, अत्ययं दण्डं, स्थापयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजशब्दिभिरवरुद्धमवक्षिप्तं वा कुल्यमभिजातं राजपुत्रत्वे स्थापयेत्। कार्तान्तिकादिश्चास्य वर्गो राजलक्षण्यतां सङ्घेषु प्रकाशयेत्। सङ्घमुख्यांश्च धर्मिष्ठानुपजपेत्—'स्वधर्ममस्य राज्ञः पुत्रे भ्रातरि वा प्रतिपद्यध्वम्' इति। प्रतिपन्नेषु कृत्यपक्षोपग्रहार्थमर्थं दण्डं च प्रेषयेत्। विक्रमकाले शौण्डिकव्यञ्जनाः पुत्रदारप्रेतापदेशेन 'नैषेचनिकम्' इति मदनरसयुक्तान् मद्यकुम्भान् शतशः प्रयच्छेयुः।

चैत्यदैवतद्वाररक्षास्थानेषु च सत्रिणः समयकर्मनिक्षेपं सहिरण्याभिज्ञानमुद्राणि हिरण्यभाजनानि च प्ररूपयेयुः; दृश्यमानेषु च सङ्घेषु 'राजकीयाः' इत्यावेदयेयुः। अथावस्कन्दं दद्यात्।

राजशब्दोपजीविनां सङ्घविश्लेषणोपायमाह—राजशब्दिभिरिति। राजनामधारकैर्लिच्छिविकादिभिः, अवरुद्धम्, अवक्षिप्तं वा परिभूतं वा, कुल्यं कुलोत्पन्नम्, आभिजातं गुणवन्तं, राजपुत्रत्वे स्थापयेत् 'असौ राजपुत्र' इति कल्पयेत्। कार्तान्तिकादिश्च दैवज्ञसामुद्रिकादिश्च, वर्गः, अस्य राजपुत्रत्वे स्थापितस्य, राजलक्षण्यतां राजलक्षणयुक्तत्वं, सङ्घेषु राजशब्दव्यधिष्ठितेषु, प्रकाशयेत्। सङ्घमुख्यांश्च धर्मिष्ठान्, उपजपेत्, कथमिति, अमुष्य राज्ञः पुत्रे भ्रातरि वा राजशब्दव्यवरुद्धे विषये, स्वधर्मम् अवरोधादिक्लेशनिवारणलक्षणं, प्रतिपद्यध्वं स्वीकुरुध्वम्, इति अनेन प्रकारेण। प्रतिपन्नेषु अभ्युपेतोपजापेषु सङ्घमुख्येषु, कृत्यपक्षोपग्रहार्थं कृत्यानां क्रुद्धलुब्धभीतादीनां स्वपक्षेऽनुप्रवेशनार्थम्, अर्थं द्रव्यं, दण्डं च सैन्यं च, प्रेषयेत्। अनेनोपायेन राजशब्दिनः सङ्घेभ्यो भिन्ना भवेयुरित्यभिप्रायः। विक्रमकाल इति। विक्रमावसरे प्राप्ते, शौण्डिकव्यञ्जनाः सौरिकवेषाः सत्रिणः, पुत्रदारप्रेतापदेशेन पुत्राणां दाराणां च स्वीयानां मरणं निमित्तं कल्पयित्वेत्यर्थः, नैषेचनिकमिति मृतोद्देशेन देयमिदं मद्यं नैषेचनिकाख्यमिति, वदन्त इति शेषः, मदनरसयुक्तान् मदकरविषयुक्तान्, मद्यकुम्भान्, शतशः, प्रयच्छेयुर्दद्युः, अर्थात् सङ्घेभ्यः।

उपायान्तरमाह—चैत्यदैवतद्वाररक्षास्थानेषु चेति। देवालयदैवतद्वारेषु रक्षास्थानेषु च, सत्रिणः, समयकर्मनिक्षेपं सङ्घपतिना सह संवित्करणार्थं निक्षेपद्रव्यं, सहिरण्याभिज्ञानमुद्राणि हिरण्यैरभिज्ञानमुद्रया च सहितानि, हिरण्यभाजनानि च, प्ररूपयेयुः सङ्घा यथा जानीयुस्तथा प्रकाशयेयः। दृश्यमानेषु, सङ्घेषु, कस्यैते हिरण्यभारा इति साक्षात् पृच्छत्स्विति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सङ्घानां वा वाहनहिरण्ये कालिके गृहीत्वा सङ्घमुख्याय प्रख्यातं द्रव्यं प्रयच्छेत् । तदेषां याचिते 'दत्तममुष्मै मुख्याय' इति ब्रूयात् ।

एतेन स्कन्धावाराटवीभेदो व्याख्यातः ।

सङ्घमुख्यपुत्रमात्मसम्भावितं वा सत्री ग्राहयेत् — 'अमुष्य राज्ञः पुत्रस्त्वं शत्रुभयादिह न्यस्तोऽसि' इति; प्रतिपन्नं राजा कोशदण्डाभ्याम् उपगृह्य सङ्घेषु विक्रमयेत्; अवास्यार्थस्तमपि प्रवासयेत् ।

बन्धकीपोषकाः प्लवकनटनर्तकसौभिका वा प्रणिहिताः स्त्रीभिः

शेषः, राजकीया इति आवेदयेयुः कथयेयुः तत्त्वगोपनाभिनयार्थमिति भावः । इह 'राजकीया' इत्यस्य स्थाने 'विक्रीताः' इति पाठो दृश्यते । स तु न हृद्यः । अथ एवं भेदसंविधानानन्तरम्, अवस्कन्दं दद्यात् सङ्घस्य बलाक्रमणं कुर्यात् ।

अन्यं भेदोपायमाह — संघानां वेति । तेषां, वाहनहिरण्ये वाहनं हिरण्यं च, कालिके गृहीत्वा नियतकालप्रतिदेयमृणं कालिकं तत्त्वेनादाय, सङ्घमुख्याय, द्रव्यं कालप्रत्यर्पणीयं हिरण्यादि, प्रख्यातं प्रयच्छेत् बहुजनसमक्षं प्रत्यर्पयेत् । तदिति । तद् द्रव्यम्, एषां सङ्घानां, याचिते प्रत्यर्पयेति सङ्घैर्याच्ञायां कृतायामित्यर्थः, 'दत्तममुष्मै मुख्याय' इति ब्रूयात् । तेन हि मुख्यसङ्घयोर्भेदो भवेदिति भावः ।

य एष राजशब्दाद्यादिभेदने उपायविधिरुक्तः, तमेव स्कन्धावारप्रविष्टाटविकभेदनेऽप्यतिदिशति — एतेनेत्यादि ।

उपांशुदण्ड इति सूत्रम् । रहोवध उच्यत इति सूत्रार्थः ।

सङ्घमुख्यपुत्रमिति । तम्, आत्मसम्भावितम् 'अहं महानि'त्यहङ्कारवन्तं, सत्री, ग्राहयेत् बोधयेत् । कथमिति, अमुष्य राज्ञः विजिगीषोः, पुत्रः त्वं, शत्रुभयाद्, इह सङ्घे, न्यस्तः असि इति । प्रतिपन्नमिति । अभ्युपगतोपजापं तं, राजा कोशदण्डाभ्याम् आत्मदत्ताभ्याम्, उपगृह्य ससहायं कृत्वा, सङ्घेषु विक्रमयेत् । अवास्यार्थ इत्यादि । सङ्घमुख्यपुत्रविक्रमणेन सङ्घनिग्रहरूपे स्वार्थे सिद्धे तमपि हन्यादित्यर्थः ।

प्रकारान्तरमाह — बन्धकीपोषका इति । कुलटापोषकाः, प्लवका-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परमरूपयौवनाभिः संघमुख्यानुन्मादयेयुः। जातकामानामन्यतमस्य प्रत्ययं कृत्वान्यत्र गमनेन प्रसभहरणेन वा कलहानुत्पादयेयुः। कलहे तीक्ष्णाः कर्म कुर्युः—'हतोऽयमित्थं कामुकः' इति।

विसंवादितं वा मर्षयमाणमभिसृत्य स्त्री ब्रूयात्—'असौ मां मुख्यस्त्वयि जातकामां बाधते; तस्मिन् जीवति नेह स्थास्यामि' इति घातमस्य प्रयोजयेत्।

प्रसह्यापहृता वा वनान्ते क्रीडागृहे वापहर्तारं रात्रौ तीक्ष्णेन घातयेत्। स्वयं वा रसेन। ततः प्रकाशयेद्—'अमुना मे प्रियो हतः' इति।

जातकामं वा सिद्धव्यञ्जनः सांवननिकीभिरोषधीभिः संवास्य

दयो वा व्याख्यातचराः, प्रणिहिताः गूढपुरुषकर्मणि व्यापारिताः, स्त्रीभिः, परमरूपयौवनाभिः, सङ्घमुख्यान्, उन्मादयेयुः मोहयेयुः। **जातकामानामिति**। तथाभूतानां सङ्घमुख्यानाम्, अन्यतमस्य, प्रत्ययं कृत्वा तत्कामितस्त्रीसमागमसङ्केतविश्वासं जनयित्वा, अन्यत्र ततोऽपरस्मिन् सङ्घमुख्ये, गमनेन, प्रसभहरणेन वा अर्थात् 'त्वदभिसरणप्रस्थितामसावन्यः सङ्घमुख्यो बलादपहृतवानि'ति मिथ्याकल्पितेन, कलहान् उत्पादयेयुः। **कलह** इत्यादि। सङ्घमुख्यमिथःकलहे प्रवृत्ते, तीक्ष्णाः, कर्म सङ्घमुख्यरहोवधलक्षणं, कुर्युः, स्वयं हत्वा च 'कामुकोऽयं प्रतिकामुकेनैवं हत' इति ख्यापयेयुरित्यर्थः।

विसंवादमसहमाने सङ्घमुख्ये विधिरेष उक्तः। सहमाने विधिमाह—**विसंवादितं वा मर्षयमाणमित्यादि**। अभिसृत्य स्वयमुपगम्य। मुख्यः सङ्घमुख्यः। बाधते वारयति। इह त्वदन्तिके। इति, उक्त्वेति शेषः।

प्रकारान्तरमाह—**प्रसह्यापहृता वेति**। एकेन कृतसङ्केता तदन्येन बलादपहृता वा, वनान्ते वनसमीपे, क्रीडागृहे वा सङ्केतस्थानभूते, अपहर्तारं, रात्रौ गूढमित्यर्थः, तीक्ष्णेन घातयेत्। स्वयं वा रसेन पानादौ विषमिश्रणेन घातयेत्। ततः घातानन्तरं, प्रकाशयेत् प्रख्यापयेत्, कथमिति, अमुना प्रतिकामुकेन, मे प्रियो हत इति।

जातकामं वेति। स्त्रियामुत्पन्नोत्कण्ठं, सिद्धव्यञ्जनः सिद्धवेषः सन्त्री,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रसेनातिसन्धायापगच्छेत् । तस्मिन्नपक्रान्ते सत्रिणः परप्रयोगमभिशंसेयुः ।

आढ्यविधवा गूढाजीवा योगस्त्रियो वा दायनिक्षेपार्थं विवदमानाः सङ्घमुख्यानुन्मादयेयुः इति । अदितिकौशिकस्त्रियो नर्तकीगायना वा । प्रतिपन्नान् गूढवेश्मसु रात्रिसमागमप्रविष्टांस्तीक्ष्णा हन्युर्वद्ध्वा हरेयुर्वा ।

सत्री वा स्त्रीलोलुपं सङ्घमुख्यं प्ररूपयेत्—'अमुष्मिन् ग्रामे दरिद्रकुलमपसृतं; तस्य स्त्री राजार्हा, गृहाणैनाम्' इति । गृहीतायामर्धमासान्तरं सिद्धव्यञ्जनो दूष्यः सङ्घमुख्यमध्ये प्रक्रोशेत् — 'असौ

सांवननिकीभिः वशीकरणप्रयोजनाभिः, ओषधीभिः, संवास्य, रसेन विषेण मिश्रिताभिरोषधीभिरित्यर्थः, अतिसन्धाय हत्वा, अपगच्छेत् । तस्मिन् सिद्धव्यञ्जने, अपक्रान्ते हत्वापगते सति, सत्रिणः, परप्रयोगम् अभिशंसेयुः प्रतिकामुकप्रेरितः स सिद्ध इति प्रख्यापयेयुः ।

प्रकारान्तरमाह — **आढ्यविधवा** इति । ताः, गूढाजीवाः सधवा अपि दारिद्र्यवशाद् व्यभिचारेण या जीवन्ति ताः, योगस्त्रियो वा कपटस्त्रियो वा स्त्रीवेषाः पुरुषा वेत्यर्थः, दायनिक्षेपार्थं दायार्थं निक्षेपार्थं च, विवदमानाः, सङ्घमुख्यान् उन्मादयेयुः विवादनिर्णयापदेशेन सङ्घमुख्यानुपगम्य व्यामोहयेयुरित्यर्थः । **अदितिकौशिकस्त्रिय** इति । अदितयो नानादेवालेख्यप्रदर्शनवृत्तयः स्त्रियः कौशिकस्त्रियः व्यालग्राहिस्त्रियश्च, नर्तकीगायना वा, सङ्घमुख्यान् उन्मादयेयुः । **प्रतिपन्नानिति** । अभ्युपेतसमागमसङ्केतान् सङ्घमुख्यान्, गूढवेश्मसु, रात्रिसमागमप्रविष्टान् रात्रौ स्त्रीसमागमार्थं प्रविष्टान्, प्रविष्टा इति पाठे तीक्ष्णविशेषणं व्याख्येयम् । तीक्ष्णाः, हन्युः, वद्ध्वा हरेयुर्वा ।

प्रकारान्तरमाह —**सत्री** वेति । सः, स्त्रीलोलुपं स्त्रीचपलं, संघमुख्यं, प्ररूपयेत् आवेदयेत्, कथमिति, अमुष्मिन् ग्रामे, दरिद्रकुलम्, अपसृतं वृत्त्यर्थमन्यदेशं गतम् । तस्य कुलप्रधानस्य, स्त्री, राजार्हा रूपादिना राजोपभोगयोग्या, एनां गृहाण भार्यात्वेन स्वीकुरुष्व इति । **गृहीतायामिति** । तथा तस्यां स्वीकृतायाम्, अर्धमासान्तरम् अर्धमासः अन्तरं व्यवधानकालो यस्मिन् कर्माणि तद् यथा भवति तथा, सिद्धव्यञ्जनः, दूष्यः राजावग्रहचारी, संघमुख्यमध्ये संघमुख्यानां मध्ये, प्रक्रोशेत् आक्रन्देत्, कथमुक्त्वा, असौ संघ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मे मुख्यां भार्यां स्नुषां भगिनीं दुहितरं वाधिचरति' इति। तं चेत् सङ्घो निगृह्णीयात्, राजैनमुपगृह्य विगुणेषु विक्रमयेत्। अनिगृहीते सिद्धव्यञ्जनं हि रात्रौ तीक्ष्णाः प्रवासयेयुः। ततस्तद्व्यञ्जनाः प्रक्रोशेयुः — 'असौ ब्रह्महा ब्राह्मणीजारश्च' इति।

कार्तान्तिकव्यञ्जनो वा कन्यामन्येन वृतामन्यस्य प्ररूपयेत्— 'अमुष्य कन्या राजपत्नी राजप्रसविनी च भविष्यति; सर्वस्वेन प्रसह्य वैनां लभस्व' इति। अलभ्यमानायां परपक्षमुद्धर्षयेत्। लब्धायां सिद्धः कलहः।

भिक्षुकी वा प्रियभार्यं मुख्यं ब्रूयात् — 'असौ ते मुख्यो यौवनोत्सिक्तो भार्यायां मां प्राहिणोत्; तस्याहं भयाल्लेख्यमाभरणं

मुख्यविशेषः, मे मुख्यां भार्यां, स्नुषां पुत्रभार्यां, भगिनीं, दुहितरं वा, अधिचरति बलात् स्वीकृत्योपभुङ्क्ते इत्युक्त्वा। तमिति। तमधिचरन्तं निवेदितं मुख्यं, संघः, निगृह्णीयाच्चेद्, राजा, एनं निगृह्यमाणं संघमुख्यम्, उपगृह्य स्वपक्षेऽनुप्रवेश्य, विगुणेषु स्वप्रतिकूलेषु, विक्रमयेद् उद्योजयेद्। अनिगृहीत इति। तस्मिन् संघमुख्ये संघेनाकृतनिग्रहे सति, सिद्धव्यञ्जनं सिद्धवेषं प्रक्रोष्टारं तं दूष्यं, रात्रौ तीक्ष्णाः, प्रवासयेयुः हन्युः। तत इति। अनन्तरं, तद्व्यञ्जनाः सिद्धव्यञ्जनाः प्रक्रोशेयुः, कथमिति, असौ, अनिगृहीतः संघमुख्यः, ब्रह्महा सिद्धब्राह्मणस्य हन्ता, ब्राह्मणीजारश्च सिद्धब्राह्मणभार्याजारश्च, इति।

पक्षान्तरमाह—कार्तान्तिकव्यञ्जनो वेति। दैवज्ञवेषो वा, कन्याम्, अन्येन संघमुख्येष्वन्यतमेन, वृताम्, अन्यस्य, प्ररूपयेद् बोधयेत्, कथमिति, अमुष्य कन्या अन्येन वृता, राजपत्नी राजप्रसविनी च भविष्यति यमियं पतित्वेन वरयति यं च प्रसूते तावुभौ राजभावं प्राप्स्यतः। सर्वस्वेन सर्वस्वदानेन, प्रसह्य वा बलात्कारेण वा, एनां लभस्व स्वायत्तीकुरुष्व, इति। अलभ्यमानायामिति। एवं बोधितेन संघमुख्येन कृतयत्नेन तस्यामनासाद्यमानायां सत्यां, परपक्षं परस्य पूर्ववरयितुः पक्षम्, उद्धर्षयेत् उत्साहयेद् उत्तरकालकन्यायाचित्रा भग्नाशेन सह विरोधयेत्। लब्धायां सत्यां, सिद्धः कलहः, अर्थात् तत्पूर्ववरयितुः सङ्घमुख्यस्य पश्चात् तत्सकाशात् तां लब्धवतश्च।

प्रकारान्तरमाह — भिक्षुकी वेति। सा वा, प्रियभार्यं, मुख्यं संघ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गृहीत्वागतास्मि; निर्दोषा ते भार्या; गूढमस्मिन् प्रतिकर्तव्यम्। अहमपि तावत् प्रतिपत्स्यामि' इति। एवमादिषु कलहस्थानेषु स्वयमुत्पन्ने वा कलहे तीक्ष्णैरुत्पादिते वा हीनपक्षं राजा कोशदण्डाभ्यामुपगृह्य विगुणेषु विक्रमयेदपवाहयेद् वा।

सङ्घेष्वेवमेकराजो वर्तेत। सङ्घाश्चाप्येवमेकराजादेतेभ्योऽतिसन्धानेभ्यो रक्षयेयुः॥

सङ्घमुख्यश्च सङ्घेषु न्यायवृत्तिहितः प्रियः।
दान्तो युक्तजनस्तिष्ठेत् सर्वचित्तानुवर्तकः॥

इति कौटलीयार्थशास्त्रे सङ्घवृत्ते एकादशाधिकरणे
प्रथमोऽध्यायः भेदोपादानानि उपांशुदण्डश्च,
आदितः पञ्चत्रिंशच्छततमः।
एतावता कौटलीयस्यार्थशास्त्रस्य सङ्घवृत्तमेकादशमधिकरणं समाप्तम्॥

मुख्यं, ब्रूयात्, कथमिति, असौ मुख्यः, यौवनोत्सिक्तः यौवनदृप्तः, ते भार्यायां मां प्राहिणोत् त्वद्भार्यासमागमघटनार्थं मां दूतीं प्रेषितवान्। अहं भयात् तस्य लेख्यं कामलेखम्, आभरणं कामप्राभृतरूपं भूषणं च, गृहीत्वा, आगता, अस्मि। निर्दोषा ते भार्या। गूढम्, अस्मिन् प्रतिकर्तव्यम् अयं हन्तव्यः। अहमपि, तावत् एतद्धननावधिकं कालं, प्रतिपत्स्यामि त्वदन्तिकावस्थानलक्षणां प्रतिपत्तिमास्थास्ये, इति। तङोऽकरणमनित्यत्वात्। **एवमादिष्विति**। एवञ्जातीयेषु कलहस्थानेषु कलहकारणेषु, स्वयं गूढपुरुषोपजापं विनैव, उत्पन्ने वा, तीक्ष्णैरुत्पादिते वा, कलहे, हीनपक्षं, राजा, कोशदण्डाभ्यां धनेन सैन्येन च, उपगृह्य स्वीकृत्य, विगुणेषु स्वप्रतिकूलेषु, विक्रमयेद् उद्योजयेत्। अपवाहयेद् वा विक्रमणाशक्तौ स्वविषयान्निर्वासयेद् वा।

संघेष्विति। तेषु विषये, एवम् उक्तेन प्रकारेण, एकराजः एको राजा, वर्तेत चेष्टेत। एवं वर्तमाने राज्ञि सङ्घानां वृत्तिमाह— **संघाश्चापी**-त्यादि। तेऽपि एवं चेष्टमानान्नृपालात् तदुत्पादितेभ्यो वञ्चनेभ्य आत्मानं रक्षेयुरित्यर्थः। तदेवं संघेषु राज्ञो राज्ञि च संघानां वृत्तिरुक्ता॥

अथ संघमुख्यस्य संघेषु वृत्तिमाह— **संघमुख्यश्चेति**। स च, संघेषु विषये, न्यायवृत्तिहितः न्याययुक्तया वृत्त्या हितकारी, प्रियः इष्टानुष्ठायी,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दान्तः अनुद्धतः, युक्तजनः युक्ता आत्मना समवेताः स्वचित्तानुवर्तिनो जना यस्य स तथाभूतः, सर्वचित्तानुवर्तकः सर्वसंघिमतानुवर्ती, तिष्ठेत् ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
सङ्घवृत्ताधिकरणमेकादशमपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायां सङ्घवृत्ते एकादशोऽधिकरणे प्रथमोऽध्यायः, भेदोपादानानि उपांशुदण्डश्च। आदितः

पञ्चात्रिंशच्छततमः।

सङ्घवृत्तमेकादशमधिकरणं समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आवलीयसं—द्वादशमधिकरणम् ।

१६२. प्रक. दूतकर्माणि ।

'बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्मा तिष्ठेत् । इन्द्रस्य हि स प्रणमति, यो बलीयसो नमति' इति भारद्वाजः ।

'सर्वसन्दोहेन बलानां युध्येत, पराक्रमो हि व्यसनमपहन्ति; स्वधर्मश्चैष क्षत्रियस्य; युद्धे जयः पराजयो वा' इति विशालाक्षः ।

नेति कौटल्यः । सर्वत्रानुप्रणतः कुलैडक इव निराशो जीविते वसति । युध्यमानश्चाल्पसैन्यः समुद्रमिवाप्लवोऽवगाहमानः सीदति । तद् विशिष्टं तु राजानमाश्रितो दुर्गमविषह्यं वा चेष्टेत ।

अथ द्वादशम् **आवलीयसं** नामाधिकरणमारभ्यते । प्रबलं कञ्चिदपेक्ष्य हीनबलोऽबलः तदपेक्षयातिशयेन हीनबलोऽबलीयान् तमधिकृत्य प्रवृत्तं तत्कृत्यप्रतिपादकत्वाद् आबलीयसमुच्यते । अथवा कञ्चिदपेक्ष्यातिशयेन बलयुक्तो बलीयान् तद्विन्नोऽबलीयान् अर्थादतिशयप्रतियोगी दुर्बलः तमधिकृत्य प्रवृत्तम् आबलीयसम् । प्रबलेऽभियोक्तरि दुर्बलेन यत् कर्तव्यं तदस्मिन्नधिकरणे प्रतिपाद्यते । तत्र

दूतकर्मेति प्रथमं सूत्रम् । दूतव्यापारोऽभिधीयत इति सूत्रार्थः । प्रबलस्य सन्धेयत्वात् सन्धेश्च दूतमुखत्वात् सन्धियाचनलक्षणानां दूतकर्मणामिहाभिधानम् ।

तत्र मतभेदान् दिदर्शयिषुरादौ भारद्वाजमतमाह — **बलीयसेति** । तेन, अभियुक्तः, दुर्बलः, सर्वत्र सर्वविधेऽपि परिभवे, अनुप्रणतः तदनुवर्तनपरः, वेतसधर्मा तिष्ठेत् यथा सर्वविधेऽपि जवे नम्रीभूय स्रोतसोऽनुवर्तनं कुर्वन् वञ्जुलस्तिष्ठति तथा स्थितिं कुर्यादित्यर्थः । न च बलीयांसं प्रति प्रणामो दुर्बलस्य लाघवाय, प्रत्युत गौरवावहोऽपीत्यभिप्रायेणाह — **इन्द्रस्य हीत्यादि** ।

विशालाक्षमतमाह — **सर्वसन्दोहेनेत्यादि** । सर्वबलसमूहसाहित्येन युद्ध्वा जयमरणान्यतरप्राप्तिरेव क्षत्रियस्य स्वधर्मो न तु शत्रुपादपतनमित्यर्थः ।

मतद्वयमपि प्रतिषेधति — **नेतीति** । प्रणामवृत्तौ दोषमाह — **सर्वत्रानुप्रणत इत्यादि** । तथाभूतो हि, कुलमेष इव स्वयूथभ्रष्टस्त्रासाज्जीवितनिराशः कथञ्चिद् वसतीत्यर्थः । योधने दोषमाह — **युध्यमानश्चेत्यादि** । अप्लवः तरणसाधनरहितः । सीदति नश्यति । अतः किं कर्तव्यमित्याह — **तदिति** । तस्मात्, विशिष्टं तु राजानं शत्र्वपेक्षयाधिकबलमन्यं भूपतिं, दुर्ग

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रयोऽभियोक्तारो धर्मलोभासुरविजयिन इति। तेषामभ्यवपत्त्या धर्मविजयी तुष्यतिः तमभ्यवपद्येत परेषामपि भयात्। भूमिद्रव्यहरणेन लोभविजयी तुष्यतिः तमर्थेनाभ्यवपद्येत। भूमिद्रव्यपुत्रदारप्राणहरणेन असुरविजयीः तं भूमिद्रव्याभ्यामुपगृह्याग्राह्यः प्रतिकुर्वीत।

तेषामुत्तिष्ठमानं सन्धिना मन्त्रयुद्धेन कूटयुद्धेन वा प्रतिव्यूहेत। शत्रुपक्षमस्य सामदानाभ्यां; स्वपक्षं भेददण्डाभ्याम्। दुर्गं राष्ट्रं स्कन्धावारं वास्य गूढाः शस्त्ररसाग्निभिः साधयेयुः।

सर्वतः पार्ष्णिमस्य ग्राहयेत्; अटवीभिर्वा राज्यं घातयेत्; तत्कुलीनावरुद्धाभ्यां वा हारयेत्।

अविषह्यं वा धर्षयितुमशक्यं दुर्गं वा, आश्रितः, चेष्टेत व्याप्रियेत, अर्थादभियोक्तरि विषये।

चेष्टाभेदान् वक्तुं तद्विषयभूतानभियोक्तॄन् विभजते—त्रय इत्यादि। तेषामिति। त्रयाणां मध्ये, धर्मविजयी, अभ्यवपत्त्या तवाहमित्यात्मार्पणेन, तुष्यति। तं धर्मविजयिनम्, अभ्यवपद्येत, परेषामपि भयात् न केवलं धर्मविजयिभयात् किन्तु शत्वन्तरभयादपि। न केवलं स्वयं न बाधतेऽभ्यवपत्तारं धर्मविजयी, किन्तु शत्वन्तरभयादपि स रक्षतीत्यभिप्रायः। भूमिद्रव्यहरणेनेत्यादि। अर्थेन अभ्यवपद्येत धनादिदानेनावर्जयेत्। असुरविजयी भूमिद्रव्यपुत्रदारप्राणानां सर्वेषामप्यपहरणेन तुष्यति, अतस्तं भूमिद्रव्ययोर्दानेनावर्ज्य तद्धस्तगोचरमप्राप्त एव सन् सन्ध्यादिना प्रतिकुर्यादित्याह—भूमिद्रव्यपुत्रेत्यादि।

तेषामिति। धर्मविजयिलोभविजय्यसुरविजयिनाम्, अन्यतमम्, उत्तिष्ठमानम् अभियुञ्जानं, सन्धिना मन्त्रयुद्धेन कूटयुद्धेन वा वक्ष्यमाणप्रकारेण, प्रतिव्यूहेत अपकुर्वीत। तत्र मन्त्रयुद्धस्य प्रकारमाह—शत्रुपक्षमिति। अस्य प्रबलस्याभियोक्तुः, शत्रुपक्षं, सामदानाभ्यां, प्रतिव्यूहेत। स्वपक्षम् अमात्यादिप्रकृतिवर्गं, भेददण्डाभ्यां, प्रतिव्यूहेत। कूटयुद्धप्रकारमाह—दुर्गमिति। दुर्गं स्थानीयं, राष्ट्रं जनपदं, स्कन्धावारं वा सेनानिवेशं वा, अस्य, गूढाः गूढपुरुषाः, शस्त्ररसाग्निभिः आयुधप्रहारविषाग्निदाहैः, साधयेयुः।

सर्वत इति। पृष्ठतः पार्श्वतश्च, पार्ष्णिम्, अस्य अभियोक्तुः, ग्राहयेत्। अटवीभिर्वेति। आटविकैर्वा, राज्यं दुर्गजनपदादिकं, घातयेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपकारान्तेषु चास्य दूतं प्रेषयेत् । अनपकृत्य वा सन्धानम् । तथाप्यभिप्रयान्तं कोशदण्डयोः पादोत्तरमहोरात्रोत्तरं वा सन्धिं याचेत ।

स चेद् दण्डसन्धिं याचेत, कुण्ठमस्मै हस्त्यश्वं दद्याद्, उत्साहितं वा गरयुक्तम् ।

पुरुषसन्धिं याचेत, दूष्यामित्राटवीबलमस्मै दद्याद् योगपुरुषाधिष्ठितम् । तथा कुर्याद् यथोभयविनाशः स्यात् । तीक्ष्णबलं वास्मै दद्यात्, यदवमानितं विकुर्वीत । मौलमनुरक्तं वा, यदस्य व्यसनेऽपकुर्यात् ।

तत्कुलीनावरुद्धाभ्यामिति । अभियोक्तुः कुलीनो ज्ञातिः अवरुद्धः पुत्रादिः ताभ्यां वा, हारयेत्, राज्यम् ।

इत्थमपकारान् कृत्वा तदनन्तरं सन्धानार्थं दूतं प्रेषयेदित्याह — अपकारान्तेषु चेत्यादि । अपकारबाधिते हि शत्रौ सन्धिः प्रयुज्यमानः तप्तलोहन्यायेनावश्यं फलतीत्यभिप्रायः । सर्वथैवापकारकरणाशक्तौ त्वाह — अनपकृत्य वा सन्धानमिति । याचनीयमिति शेषः ।

तथाप्यभिप्रयान्तमिति । सुवर्णादिपणनेन दण्डपणनेन वा याचितेऽपि सन्धौ अभियानादनिवर्तमानं प्रबलं, कोशदण्डयोः पूर्वपणितसंख्यस्य धनस्य सैन्यस्य च, पादोत्तरं चतुर्थांशाधिकं, सन्धिं याचेत पूर्वपणितं सुवर्णलक्षसन्धिम् अश्वादिशतसन्धिं वानभ्युपगच्छति सन्धेये सुवर्णलक्षं पञ्चविंशतिसहस्राधिकं कृत्वा अश्वादिशतं पञ्चविंशत्यधिकं कृत्वा च भूयः सन्धिं याचेतेत्यभिप्रायः । अहोरात्रोत्तरं सन्धिं याचेतेत्यस्यायमर्थः — इयतो मासानिर्दं कर्तव्यमिति पूर्वपणितं माससन्धिमनुपगच्छति सन्धेये पुनस्तमधिकदिवसयुक्तं कृत्वा याचेतेति ।

पणितयोः कोशदण्डयोर्दानविधिमाह — स इति । अवलीयान्, दण्डसन्धिं सैन्यसन्धिं, याचेत चेत्, अस्मै सन्धेयाय, कुण्ठं कर्माशक्तं, हस्त्यश्वं, दद्यात् । वा अथवा, उत्साहितं शूरं, गरयुक्तं मासार्धमासाद्यभ्यन्तरकालमारकविषयुक्तं कृत्वा, दद्यात् ।

पुरुषसन्धिं याचेतेति । पदातिदानसन्धिं चेत् प्रार्थयेत, दूष्यामित्राटवीबलं दूष्यबलम् अमित्रबलम् आटविकबलं च, अस्मै सन्धेयाय, दद्यात्, कथम्भूतं, योगपुरुषाधिष्ठितं योगपुरुषैः विषधूमाम्बुदानादिना दूष्यादिबलमा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कोशसन्धिं याचेत, सारमस्मै दद्यात्, यस्य क्रेतारं नाधिगच्छेत्; कुप्यमयुद्धयोग्यं वा ।

भूमिसन्धिं याचेत, प्रत्यादेयां नित्यामित्रामनपाश्रयां महाक्षयव्ययनिवेशां वास्मै भूमिं दद्यात् ।

सर्वस्वेन वा राजधानीवर्जेन सन्धिं याचेत बलीयसः ॥

यत् प्रसह्य हरेदन्यस्तत् प्रयच्छेदुपायतः ।
रक्षेत् स्वदेहं न धनं का ह्यनित्ये धने दया ॥

इति कौटलीयार्थशास्त्रे आवलीयसे द्वादशेऽधिकरणे
प्रथमोऽध्यायः, दूतकर्माणि सन्धियाचनम् ।
आदितः षट्त्रिंशच्छततमः ॥

रणक्षमैर्गूढपुरुषैराधिष्ठितम् । तथा कुर्यादिति । तेन प्रकारेण संविधानं कुर्यात्, यथा येन प्रकारेण, उभयविनाशः दूष्यादिबलशत्रुबलयोरुभयोर्विनाशः, स्यात् । तीक्ष्णबलं वेत्यादि । विकुर्वीत कुपितं सद् अपकुर्यात् । व्यसने अपकुर्यात् अपकारस्थानं प्रतीक्ष्यापकारं कुर्यात् ।

कोशसन्धिं याचेतेति । तं चेत् प्रार्थयेत, सारं महार्घं रत्नादि, अस्मै सन्धेयाय, दद्यात् । सारं विशिनष्टि — यस्य सारस्य दत्तस्य, क्रेतारं तदनुरूपमूल्यदानशक्तं, नाधिगच्छेत् । कुप्यमिति । अयुद्धयोग्यं कुप्यं वा वस्त्रास्तरणादि वा, दद्यात् ।

भूमिसन्धिमित्यादि । नित्यामित्रां नित्यसन्निहितशत्रुकाम् । अनपाश्रयां दुर्गरहिताम् । महाक्षयव्ययनिवेशां महान्तौ क्षयव्ययौ युग्यपुरुषधान्यापचयौ यस्य स तथाभूतो निवेशो यस्यां तां तथाभूताम् ।

सर्वस्वेन वेत्यादि । राजधानीवर्जेन स्ववासार्थं राजधानीं वर्जयित्वा । बलीयसः बलवत्तरस्य सकाशादित्यर्थः ॥

यदित्यादि । प्रसह्य बलात्कारेण । अन्यः बलीयान् । उपायतः सन्धिव्याजेन । का ह्यनित्ये धने दयेति । सति देहे नष्टधनप्रत्यार्जनमपि सुकरमिति कृत्वा तस्मिन् दयावश्यं कर्तव्येत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् आवलीयसे द्वादशेऽधिकरणे
प्रथमोऽध्यायः, दूतकर्माणि सन्धियाचनम् ।
आदितः षट्त्रिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६३. प्रक. मन्त्रयुद्धम्।

स चेत् सन्धौ नावतिष्ठेत, ब्रूयादेनम् — "इमे षड्वर्गवशगा राजानो विनष्टाः तेषामनात्मवतां नार्हसि मार्गमनुगन्तुं; धर्ममर्थं चावेक्षस्व; मित्रमुखा ह्यमित्रास्ते ये त्वां साहसमधर्ममर्थातिक्रमं च ग्राहयन्ति; शूरैस्त्यक्तात्मभिः सह योद्धुं साहसं; जनक्षयमुभयतः कर्तुमधर्मः; दृष्टमर्थं मित्रमदुष्टं च त्यक्तुमर्थातिक्रमः; मित्रवांश्च स राजा भूयश्चैतेन अर्थेन मित्राण्युद्योजयिष्यति यानि त्वा सर्वतोऽभियास्यन्ति; न च मध्यमोदासीनयोर्मण्डलस्य वा परित्यक्तः; भवांस्तु परित्यक्तो ये त्वां समुद्युक्तमुपप्रेक्षन्ते — भूयः क्षयव्ययाभ्यां युज्यतां; मित्राच्च भिद्यतां; अथैनं परित्यक्तमूलं सुखेनोच्छेत्स्याम इति। स भवान् नार्हति मित्रमुखानामित्राणां श्रोतुं, मित्राण्युद्वेजयितुम्, अमित्रांश्च श्रेयसा योक्तुं, प्राणसंशयमनर्थं चोपगन्तुम्" इति। यच्छेत्।

तथापि प्रतिष्ठमानस्य प्रकृतिकोपमस्य कारयेद् यथा सङ्घट्टते

मन्त्रयुद्धमिति सूत्रम्। मन्त्रः प्रज्ञोत्कर्षः तेन युद्धं शत्रोर्मित्युत्पादनादिना वञ्चनं मन्त्रयुद्धं, तदभिधीयत इति सूत्रार्थः। सन्धिं याचितः शत्रुर्यदि नोपगच्छेत्, तदा किं कर्तव्यमित्येतदिहोपदिश्यते।

स चेत् सन्धौ नावतिष्ठेतेत्यादि। 'इमे' इत्यादिः 'प्राणसंशयमनर्थं चोपगन्तुम्' इत्यन्तो वचनप्रकारः। इमे नामग्रहणपूर्वं निदर्शिताः। मित्रमुखा अमित्राः मित्रभावं वाचा बहिर्नटयन्तः परमार्थतः शत्रव इत्यर्थः। त्यक्तात्मभिः उपेक्षितदेहैः। योद्धुं साहसं योधनमविचारितानुष्ठानमित्यर्थः। दृष्टमर्थं करगतं पणितमर्थं कोशादिम्। एतेनार्थेन त्वदभीक्षतेन सन्धिद्रव्येण। त्वा सर्वतोऽभियास्यन्ति त्वां परिवार्याभियोक्ष्यन्ते। न च परित्यक्तः अर्थात् सन्धियाचकोऽभियोज्यः। मध्यमोदासीनमण्डलास्तव सुखोच्छेदाय शक्तिक्षयं बहुभिः प्रकारैः प्रतीक्षमाणाः सन्तस्त्वामिदानीं कृताभियोगमुपेक्षन्ते इत्याह — ये त्वामित्यादिना। यत् त्वामिति पाठे उपेक्षणकर्तारो गम्याः। 'उच्छेत्स्यामहे' इति पाठे आत्मनेपदमार्षम्। श्रोतुम् अर्थादुपदेशान्। अनर्थम् अर्थहानिम्। यच्छेदिति। गृहीतयथोक्तोपदेशाय सन्ध्यर्थं दद्यादित्यर्थः।

तमप्युपदेशमनभ्युपगच्छति सन्धेये कर्तव्यमाह — तथापीत्यादि। एवमुपदेशे कृतेऽपि, प्रतिष्ठमानस्य अभियुञ्जानस्य, अस्य, प्रकृतिकोपम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ख्यातं, योगवामने च। तीक्ष्णरसदप्रयोगं च। यदुक्तमात्मरक्षितके रक्ष्यं, तत्र तीक्ष्णान् रसदांश्च प्रयुञ्जीत।

बन्धकीपोषकाः परमरूपयौवनाभिः स्त्रीभिः सेनामुख्यानुन्मादयेयुः। बहूनामेकस्यां द्वयोर्वा मुख्ययोः कामे जाते तीक्ष्णाः कलहानुत्पादयेयुः। कलहे पराजितपक्षं परत्रापगमने यात्रासाहाय्यदाने वा भर्तुर्योजयेयुः।

कामवशान् वा सिद्धव्यञ्जनाः सांवननिकीभिरोषधीभिरितिसन्धानाय मुख्येषु रसं दापयेयुः।

वैदेहकव्यञ्जनो वा राजमहिष्याः सुभगायाः प्रेष्यामासन्नां कामनिमित्तमर्थेन अभिवृष्य परित्यजेत्। तस्यैव परिचारकव्यञ्जनोपदिष्टः सिद्धव्यञ्जनः सांवननिकीमोषधीं दद्याद्— वैदेहकशरीरेऽव-

---

अमात्यादिभेदनं, कारयेत्। कथं, यथा येन प्रकारेण, सङ्गवृत्ते, व्याख्यातम् उपदिष्टम् अर्थाद् भेदनं, योगवामने च योगवामनप्रकरणे व्याख्यास्यते च। तथेति शेषः। घातनमाह— तीक्ष्णरसदप्रयोगं चेति। कारयेदिति वर्तते। उक्तमेव विवृणोति — यदुक्तमित्यादि। स्पष्टार्थम्।

सेनामुख्यवध इति सूत्रम्। वधो भेदनस्याप्युपलक्षणम्। सेनामुख्यानां भेदनघातने उच्येते इति सूत्रार्थः। तयोः पूर्वोक्तयोः सेनामुख्या अपि विषया इति प्रकरणारम्भः।

भेदनोपायमाह — बन्धकीपोषका इत्यादि। बहूनामित्यादि। बहूनां त्रिप्रभृतीनां मुख्यानाम्। कलहे इत्यादि। परत्रापगमने पूर्वाश्रितपक्षापहानेन विजिगीषुपक्षाश्रयणे। भर्तुः स्वामिनो विजिगीषोः। यात्रासाहाय्यदाने वा विजिगीषुयात्रासाह्यकरणे च

घातनोपायमाह— कामवशान् वेत्यादि। सेनामुख्येषु मध्ये ये कामवशगास्तान् सिद्धवेषाः स्त्रीसंवननप्रयोजनाभिरोषधीभिः सह विषम् अतिसन्धानार्थं तन्मित्रव्यञ्जनद्वारेण प्राशयेयुरित्यर्थः।

राज्ञो विषदानविधानमाह— वैदेहकव्यञ्जनो वेति। वणिग्व्यञ्जनः, राजमहिष्याः, सुभगायाः सुन्दर्याः, प्रेष्यामासन्नाम् अन्तरङ्गपरिचारिकां, कामनिमित्तं भोगार्थम्, अर्थेन अभिवृष्य प्रचुरधनवर्षणेन सम्भाव्य, परित्यजेत् पुननोपगच्छेत। तस्यैवेति। वैदेहकव्यञ्जनस्यैव, परिचारकव्यञ्जनोपदिष्टः परिचारकवेषेण पुरुषेण प्रेरितः, सिद्धव्यञ्जनः, सांवननिकीम् ओषधीं, दद्यात्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धातव्येति । सिद्धे सुभगाया अप्येनं योगमुपदिशेद् — राजशरीरेऽव-धातव्या इति । ततो रसेनातिसन्दध्यात् ।

कार्तान्तिकव्यञ्जनो वा महामात्रं राजलक्षणसम्पन्नं क्रमाभि-नीतं ब्रूयात् । भार्यामस्य भिक्षुकी —'राजपत्नी राजप्रसविनी वा भ-विष्यसि' इति ।

भार्याव्यञ्जना वा महामात्रं ब्रूयात् — 'राजा किल मामव-रोधयिष्यति; तवान्तिकाय पत्रलेख्यमाभरणं चेदं परिव्राजिकया-हृतम्' इति ।

सूदारालिकव्यञ्जनो वा रसप्रयोगार्थं राजवचनमस्य

किमित्युक्त्वा, वैदेहकशरीरे, अवधातव्या क्षेप्तव्या तद्वशीकरणार्थम्, इ-त्युक्त्वा । सिद्धे इति । तथाकरणेन वैदेहकवशीकरणे सिद्धे सति, वैदेहके तद्वश्यतामात्मनोऽभिनयति सतीति यावत्, सुभगाया अपि राजमहिष्या अपि, एनम् उक्तं, योगं सावननिकौषधिप्रयोगम्, उपदिशेत्, किमित्युक्त्वा, राज-शरीरे, अवधातव्या अर्थाद् ओषधिः, इत्युक्त्वा । **ततो रसेनातिसन्दध्या-**दिति । तस्मिन् योगे विषयोजनेन राजानं घातयेदित्यर्थः ।

महामात्रभेदनमाह — **कार्तान्तिकव्यञ्जनो वेति** । लक्षणादिना भ-विष्यदर्थादेष्टा कार्तान्तिकः तद्व्यञ्जनो गूढपुरुषो वा, महामात्रं, राजलक्षण-सम्पन्नं ब्रूयात् 'त्वं राजा भविष्यसी'ति वदेत् । कथम्भूतं, क्रमाभिनीतं बहु-कृत्वो निजादेशसंवादप्रदर्शनेनाभिमुखीकृतं विश्वासितमित्यर्थः । **भार्यामिति** । अस्य महामात्रस्य, भार्या, भिक्षुकी, ब्रूयादिति सम्बध्यते, किमिति, 'राजपत्नी राजप्रसविनी वा भविष्यसी'ति । इत्थं वचनेन महामात्रस्य राजत्वलोभोदयाद् राज्ञा सह विरोधो जायेतेत्यभिप्रायः ।

प्रकारान्तरमाह — **भार्याव्यञ्जना वेति** । निजरूपगुणाद् महामा-त्रस्य भार्यात्वं प्राप्य तदतिसन्धानावसरं प्रतीक्षमाणा बन्धकीत्यर्थः, महा-मात्रं ब्रूयात्, कथमिति, राजा किल माम् अवरोधयिष्यति स्वान्तःपुरं ने-ष्यति, तव अन्तिकाय इदं पत्रलेख्यम् आभरणं च, राजदत्तमिति शेषः, परि-व्राजिकया दूतीभूतया, आहृतम् इति । अनेन निमित्तेन महामात्रस्य राज्ञि द्वेषो जायेतेत्यभिप्रायः ।

प्रकारान्तरमाह — **सूदारालिकव्यञ्जनो वेति** । पाचकसूपकार-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोभनीयमभिनयेत् । तदस्य वैदेहकव्यञ्जनः प्रतिसन्दध्यात्; कार्यसिद्धिं च ब्रूयात् । एवमेकेन द्वाभ्यां त्रिभिरित्युपायैरेकैकमस्य महामात्रं विक्रमायापगमनाय वा योजयेदिति ।

दुर्गेषु चास्य शून्यपालासन्नाः सत्रिणः पौरजानपदेषु मैत्रीनिमित्तमावेदयेयुः "शून्यपालेनोक्ता योधाश्च अधिकरणस्थाश्च — 'कृच्छ्रगतो राजा जीवन्नागमिष्यति न वा; प्रसह्य वित्तमार्जयध्वममित्रांश्च हत" इति । बहुलीभूते तीक्ष्णाः पौरान् निशास्वाहारयेयुः, मुख्यांश्चाभिहन्युः — 'एवं क्रियन्ते, ये शून्यपालस्य न शुश्रूषन्ते' इति ।

व्यञ्जनो वा, रसप्रयोगार्थं पानपानीयादिषु विषयोजनार्थं, राजवचनं, राजवचनादिति पाठो न समञ्जसः । अर्थं च धनं च, अस्य रसप्रयोगस्य, लोभनीयं प्रभूतत्वेन हेतुना कामयितव्यम्, अभिनयेत् स्वस्मै राज्ञा दत्तं व्यपदिशेत् । तदस्येति । अस्य राज्ञः, तत् उक्तं कर्म, वैदेहकव्यञ्जनः विषविक्रेतृवेषो गूढपुरुषः, प्रतिसन्दध्यात् संवादयेत्, 'राजवचनाद् मया त्वत्सूदारालिकहस्ते विषं दत्तं, तत् किमर्थमिति तु न वेद्मि' इत्यादिकथनेन सूदारालिकवचने महामात्रस्य विश्वासं जनयेदित्यभिप्रायः । **कार्यसिद्धिं च ब्रूयादिति** । तेन विषेण सद्योमरणलक्षणं कार्यं सिध्येदिति च वदेदित्यर्थः । अनेन प्रकारेण सामाद्युपायैर्व्यस्तैः समस्तैर्यथासम्भवं मिलितैर्वा राज्ञ एकैकं महामात्रं राज्ञा सह विरोधितं कृत्वा योधनायापसरणाय वा सन्नाहयेदित्याह — **एवमेकेनेत्यादि** । इत्थं महामात्राणां राज्ञो भेदनमभिहितम् ।

अथ शून्यपालात् पौराणां भेदनमाह — **दुर्गेषु चेति** । स्थानीयेषु च, अस्य परस्य राज्ञः, शून्यपालासन्नाः शब्वभियोगप्रयाणवशाद् राज्ञा विरहितं स्थानीयं शून्यं तत्पालस्तद्रक्षकः तस्य आसन्नाः आसत्वाभिनयिनः सत्रिणः, पौरजानपदेषु, मैत्रीनिमित्तं शून्यपालविषयानुरागोत्पादनार्थम्, आवेदयेयुः प्रज्ञापयेयुः । **शून्यपालेनोक्ता** इत्यादिनावेदनीयार्थोपन्यासः । **कृच्छ्रगत** इत्यादिना च शून्यपालवचनोपन्यासः । प्रसह्य बलात्कारेण । अमित्रांश्च हत स्वस्वशत्रूंश्च व्यापादयत । बहुलीभूत इति । सर्वतः प्रसृते सति अर्थाच्छून्यपालाज्ञाप्रवादे, तीक्ष्णाः, पौरान्, निशासु रात्रिषु, आहारयेयुः बलादाहरतः प्रयोजयेयुः, मुख्यांश्च अभिहन्युः । एवं क्रियन्त इति । इत्थं बलादभिहन्यन्ते, के, ये शून्यपालस्य, न शुश्रूषन्ते आराधनं न कुर्वन्ति, इति अनेन प्रकारेण, अभिहननसमये वदन्त इति शेषः । एतच्च शून्यपाले परिवादसमा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यपालस्थानेषु च सशोणितानि शस्त्रवित्तबन्धनान्युत्सृजेयुः । ततः सत्रिणः—'शून्यपालो घातयति, विलोपयति च' इत्यावेदयेयुः ।

एवं जानपदान् समाहर्तुर्भेदयेयुः ।

समाहर्तृपुरुषांस्तु ग्राममध्येषु रात्रौ तीक्ष्णा हत्वा ब्रूयुः—'एवं क्रियन्ते, ये जनपदमधर्मेण बाधन्ते' इति ।

समुत्पन्ने दोषे शून्यपालं समाहर्तारं वा प्रकृतिकोपेन घातयेयुः । तत्कुलीनमवरुद्धं वा प्रतिपादयेयुः ॥

अन्तःपुरपुरद्वारद्रव्यधान्यपरिग्रहान् ।
दहेयुस्तांश्च हन्युर्वा ब्रूयुरस्यार्तवादिनः ॥

इति कौटलीयार्थशास्त्रे आवलीयसे द्वादशोऽधिकरणे द्वितीयोऽध्यायः
दूतकर्मणि वाक्ययुद्धं दूतकर्म समाप्तं मन्त्रयुद्धम्,
आदितः सप्तत्रिंशच्छततमः ॥

रोपार्थम् । हननस्य शून्यपालकारितत्वप्रतीतिजननार्थं कर्तव्यमाह—**शून्यपालस्थानेषु** चेति । शून्यपालवास्तुषु, सशोणितानि रुधिराङ्कितानि, शस्त्रवित्तबन्धनानि आयुधानि धनबन्धनरज्जूंश्च, उत्सृजेयुः । तत इति । इत्थं शून्यपालापराधसम्भावनानुकूलसंविधानकरणानन्तरं, सत्रिणः, आवेदयेयुः पौरान् बोधयेयुः, कथमिति, शून्यपालो घातयति, विलोपयति च धनमाहारयति च, इति ।

एवमिति । अनेन शून्यपालपौरभेदनन्यायेन, जानपदान्, समाहर्तुः समाहर्तृसकाशाद्, भेदयेयुः ।

अथ जानपदेभ्यः समाहर्तारं भेदयितुमुपायमाह—**समाहर्तृपुरुषांस्त्विति** । समाहर्तुरश्वश्वरान् पुरुषान्, ग्राममध्येषु, रात्रौ, तीक्ष्णाः हत्वा ब्रूयुः । वक्तव्यप्रकारमाह—**एवं क्रियन्ते** इत्यादि । एवं स्वीयपुरुषहननेन तदपत्यातिसृष्ट्या च जानपदेभ्यः समाहर्ता विरज्य भिद्येतेत्यभिप्रायः ।

इत्थं सत्र्यादिभिरारोपिते दोषे सर्वतः प्रथां प्राप्ते सति शून्यपालं समाहर्तारं वा प्रकृतिभिरेकलोष्टवधेन सत्रिणो घातयेयुः; परस्य ज्ञातिं तत्पुत्रं वावरुद्धं राज्ये निवेशयेयुश्चेत्याह—**समुत्पन्न** इत्यादि ॥

अध्यायप्रान्ते श्लोकमाह—**अन्तःपुरे**त्यादि । अस्य शत्रोः, अन्तःपुरपुरद्वारद्रव्यधान्यपरिग्रहान् अन्तःपुरं गोपुरं काष्ठादिद्रव्याणां शाल्यादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धान्यानां च संग्रहागाराणि च, दहेयुः । तांश्च अन्तःपुरादीन् अर्थात् तत्पालकांश्च, हन्युर्वा । आर्तवादिनः दाहहननाभ्यामन्यकृताभ्यामिवात्मानमार्तिमन्तमभिनयन्तः, अस्य पौरस्य जानपदस्य च ब्रूयुः स्वकृतं दाहादिकमकृत्यं पौरजानपदकृतमिति वदेयुरित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् आवलीयसे द्वादशेऽधिकरणे द्वितीयोऽध्यायः
दूतकर्मणि वाक्ययुद्धं दूतकर्म समाप्तं मन्त्रयुद्धम्,
आदितः सप्तत्रिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६४,१६५. प्रक. सेनामुख्यवधः मण्डलप्रोत्साहनं च।

राज्ञो राजवल्लभानां चासन्नाः सत्रिणः पत्त्यश्वरथद्विपमुख्यानां 'राजा क्रुद्धः' इति सुहृद्विश्वासेन मित्रस्थानीयेषु कथयेयुः। बहुलीभूते तीक्ष्णाः कृतरात्रिचारप्रतीकाराः गृहेषु 'स्वामिवचनेन आगम्यताम्' इति ब्रूयुः; तान् निर्गच्छत एवाभिहन्युः। 'स्वामिसन्देशः' इति चासन्नान् ब्रूयुः। ये च प्रवासितास्तान् सत्रिणो ब्रूयुः — 'एतत्तद् यदस्माभिः कथितं, जीवितुकामेन अपक्रान्तव्यम्' इति।

येभ्यश्च राजा याचितो न ददाति तान् सत्रिणो ब्रूयुः—"उक्तः शून्यपालो राज्ञा 'अयाच्यमर्थमसौ चासौ मा याचते; मया प्रत्याख्याताः शत्रुसंहिताः; तेषामुद्धरणे प्रयतस्व' इति"। ततः पूर्ववदाचरेत्।

सेनामुख्यवधप्रकरणस्यार्थशेषमाह — राज्ञ इति। तस्य, राजवल्लभानां च, आसन्नाः मित्रवेषाः, सत्रिणः, पत्त्यश्वरथद्विपमुख्यानां पत्त्यादिशब्दैस्तत्तदध्यक्षा गृह्यन्ते मुख्यशब्देन महामात्राः तेषां, मित्रस्थानीयेषु, सुहृद्विश्वासेन सौहार्दविस्रम्भेण, कथयेयुः, कथमिति, राजा क्रुद्ध इति पत्त्यध्यक्षादीन् प्रति राजा कुपित इति। बहुलीभूत इति। राजकोपप्रवादे सर्वतः प्रसृते सति, तीक्ष्णाः, कृतरात्रिचारप्रतीकाराः सज्जितरात्रिसंचारदोषप्रतिक्रियाः सन्तः, गृहेषु गत्वेति शेषः, स्वामिवचनेन आगम्यताम् अर्थात् स्वाम्यन्तिकम्, इति, ब्रूयुः। तान् पत्त्यध्यक्षादीन्, निर्गच्छत एव, अभिहन्युः, स्वामिसन्देश इति च स्वाम्याज्ञयेदमस्माभिः कृतमिति च, आसन्नान् मित्रवेषान् सत्रिणः, ब्रूयुः। तथोक्ताश्च सत्रिणः अनेन राजसकाशानपक्रान्तमुख्यादिगतिनिदर्शनेन तदपक्रान्तपूर्वान् प्रत्यात्मना पूर्वं कथितस्य राजदोषस्य प्रत्यक्षदृष्टतां बोधयेयुः शेषापक्रमणार्थमित्यभिप्रायकमाह — ये च प्रवासिता इत्यादि। इह अपक्रान्तव्यमित्यार्षम्, अपक्रमितव्यमिति हि भाव्यम्।

उपजापस्य प्रकारान्तरमाह — येभ्यश्च राजा याचितो न ददातीत्यादि। मा मां। प्रत्याख्याताः याचितार्थदानेन न सम्भाविताः, अर्थादयाच्ययाचितारः पुरुषविशेषाः। शत्रुसंहिताः अदाननिमित्तात् कोपाच्छत्रुणा सङ्गताः। इतिशब्दानन्तरमन्य इतिशब्दोऽध्याहर्तव्यः। ततः पूर्ववदाचरेदिति। पूर्ववदाचरणं तु तीक्ष्णैः कतिपयानां रात्रौ घातनम् अघातितानां तद्घातनिदर्शनेन राजसकाशादपक्रमणं च पूर्वोक्तं द्रष्टव्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येभ्यश्च राजा याचितो ददाति, तान् सत्रिणो ब्रूयुः— "उक्तः शून्यपालो राज्ञा—अयाच्यमर्थमसौ चासौ च मा याचते; तेभ्यो मया सोऽर्थो विश्वासार्थं दत्तः; शत्रुसंहिताः। तेषामुद्धरणे प्रयतस्व इति"। ततः पूर्ववदाचरेत्।

ये चैनं याच्यमर्थं न याचन्ते, तान् सत्रिणो ब्रूयुः — "उक्तः शून्यपालो राज्ञा—याच्यमर्थमसौ चासौ च मा न याचते; किमन्यत् स्वदोषशङ्कितत्वात्; तेषामुद्धरणे प्रयतस्व इति"। ततः पूर्ववदाचरेत्।

एतेन सर्वः कृत्यपक्षो व्याख्यातः।

प्रत्यासन्नो वा राजानं सत्री ग्राहयेत्— 'असौ चासौ च ते महामात्रः शत्रुपुरुषैः सम्भाषते' इति। प्रतिपन्ने दूष्यानस्य शासनहरान् दर्शयेत्— 'एतत्तत्' इति।

सेनामुख्यप्रकृतिपुरुषान् वा भूम्या हिरण्येन वा लोभयित्वा स्वेषु विक्रमयेदपवाहयेद् वा। योऽस्य पुत्रः समीपे दुर्गे वा प्रतिवसति,

---

याचितार्थदानसम्भावितविषयेऽप्युपजापमाह — येभ्यश्च राजा याचितो ददातीत्यादि। शत्रुसंहिताः शत्रुणा सङ्गताः, अर्थात् ते याचितारः।

याच्यार्थायाचितृविषयेऽप्युपजापमाह — ये चैनं याच्यमर्थं न याचन्त इत्यादि। किमन्यदिति। अयाचने निमित्तं स्वदोषशङ्कितत्वातिरिक्तं न किञ्चिद् भवितुमर्हतीत्यर्थः।

उक्तं मुख्यभेदनप्रकारं क्रुद्धलुब्धभीतवर्गेऽतिदिशति— एतेनेत्यादि। इत्थं महामात्रादीनां राजसकाशाद् भेदनमभिहितम्। इदानीं महामात्रादिसकाशाद् राज्ञो भेदनमाह — प्रत्यासन्नो वेति। आसच्छद्मा, सत्री, राजानं, ग्राहयेद् बोधयेत्। कथमित्याह — असौ चासौ चेत्यादि। प्रतिपन्न इति। सत्रिवचनेऽङ्गीकृते सति, अस्य दूष्यान् विजिगीषोर्दूषणीयत्वेन वध्यान्, शासनहरान् महामात्रं प्रति शासननेतॄन् पथि गृहीतान्, दर्शयेद् अर्थाद् राज्ञे, एतत् तदिति यन्मयोक्तं पूर्वं तत् प्रत्यक्षं जातमिति, कथयन्निति शेषः।

सेनामुख्यप्रकृतिपुरुषान् वेति। सेनामुख्याः बलाध्यक्षाः प्रकृतयः अमात्यादयः पुरुषाः भृतकाः एतान् वा, भूम्या हिरण्येन वा लोभयित्वा 'भूमिहिरण्ये वो दास्यामी'त्युपप्रलोभ्य, स्वेषु, विक्रमयेत् अभियोजयेत्, अप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं सत्रिणोपजापयेत् — 'आत्मसम्पन्नतरस्त्वं पुत्रः तथाप्यन्तर्हितः; तत् किमुपेक्षसे। विक्रम्य गृहाण; पुरा त्वा युवराजो विनाशयति' इति।

तत्कुलीनमवरुद्धं वा हिरण्येन प्रतिलोभ्य ब्रूयात् — 'अन्तर्बलं प्रत्यन्तस्कन्धमन्यं वास्य प्रमृद्नीहि' इति।

आटविकानर्थमानाभ्यामुपगृह्य राज्यमस्य घातयेत्।

पार्ष्णिग्राहं वास्य ब्रूयाद् — 'एष खलु राजा मामुच्छिद्य त्वामुच्छेत्स्यति; पार्ष्णिमस्य गृहाण; त्वयि निवृत्तस्याहं पार्ष्णिं ग्रहीष्यामि' इति। मित्राणि वास्य ब्रूयात् — 'अहं वः सेतुः; मयि विभिन्ने सर्वानेष वो राजाप्लावयिष्यति' इति। 'सम्भूय वास्य यात्रां

वाहयेद् वा स्वेभ्योऽपसारयेद् वा। प्रकारान्तरमाह — य इति। यः, अस्य राज्ञः, पुत्रः, समीपे राजधान्यां, दुर्गे वा अन्तपालदुर्गस्थाने वा, प्रतिवसति, तं, सत्रिणा, उपजापयेत्, कथमुक्त्वा, त्वम् आत्मसम्पन्नतरः पुत्रः युवराजभृतपुत्रापेक्षया अतिशयेनात्मसम्पद्युक्तः पुत्रः, तथापि, अन्तर्हितः नियन्त्रितोऽसि। तत् तस्मात्, किमुपेक्षसे, विक्रम्य गृहाण, अर्थाद् राज्यभागम्। युवराजः, त्वा त्वां, विनाशयति पुरा विनाशयिष्यति, अर्थादात्मसम्पदतिशययोगनिमित्तादमर्षात्। इति।

प्रकारमन्यमाह — तत्कुलीनमित्यादि। अन्तर्बलं मौलबलम्। प्रत्यन्तस्कन्धं स्कन्धः सैन्यं विषयान्तस्थितं सैन्यमित्यर्थः। अन्यं वा प्रत्यन्तस्कन्धातिरिक्तं स्कन्धं वा। अन्तमिति पाठश्चिन्त्यार्थः। प्रमृद्नीहि विध्वंसय।

प्रकारान्तरमाह — आटविकानित्यादि। अर्थमानाभ्यां धनेन पूजया च। उपगृह्य स्वायत्तीकृत्य। इत्थं सेनामुख्यवधशेषो व्याख्यातः।

मण्डलप्रोत्साहनमिति सूत्रम्। दशराजकं मण्डलं तस्य प्रोत्साहनं बलवत्तरमभियोक्तारं प्रति समुद्योजनम् उच्यत इति सूत्रार्थः।

तत्र पार्ष्णिग्राहप्रोत्साहनमाह — पार्ष्णिग्राहं वेत्यादि। त्वयि निवृत्तस्य त्वामभियुञ्जानस्य। मित्रप्रोत्साहनमाह — मित्राणि वास्येत्यादि। सेतुः पराभियोगनिरोधकः। आप्लावयिष्यति नाशयिष्यति। सामवायिकप्रोत्साहनमाह — सम्भूय वेति। संघीभूय वा, अस्य परस्य, यात्रां विहनाम

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विहनाम' इति । तत्संहतानामसंहतानां च प्रेषयेत् — 'एष खलु राजा मामुत्पाट्य भवत्सु कर्म करिष्यति । बुध्यध्वम्, अहं वः श्रेयानभ्यवपत्तुम्' इति ॥

मध्यमस्य प्रहिणुयादुदासीनस्य वा पुनः ।
यथासन्नस्य मोक्षार्थं सर्वस्वेन तदर्पणम् ॥

इति कौटलीयार्थशास्त्रे आवलीयसे द्वादशेऽधिकरणे तृतीयोऽध्यायः
सेनामुख्यवधः मण्डलप्रोत्साहनं च
आदितोऽष्टात्रिंशच्छततमः ॥

विहतां करवाम । तत्संहतानामिति । तेन परेण सह संहतानां सामवायिकानाम्, असंहतानां तदन्येषां च, प्रेषयेत्, अर्थात् सन्देशहरम् । सन्देशप्रकारमाह — एष खल्वित्यादि । कर्म उच्छेदनम् । अभ्यवपत्तुं श्रेयान् विपदि परित्रातुं योग्यतरः ॥

मध्यमस्येति । मध्यमस्य, उदासीनस्य वा, यथासन्नस्य आसत्तिमनतिवर्तमानस्य स्वप्रत्यासन्नस्येत्यर्थः । त्वदर्पणं 'तवाहमस्मि रक्षणीयः सर्वथे'त्येवंरूपमात्मार्पणं, तदर्पणमिति पाठे तस्मिन् आत्मनोऽर्पणमित्यर्थः । सर्वस्वेन सर्वस्वपणनेन, प्रहिणुयात् प्रेषयेत् अर्थादबलीयान् । किमर्थं, मोक्षार्थं बलीयसोऽभियुञ्जानात् स्वस्य मोचनार्थम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् आवलीयसे द्वादशेऽधिकरणे
तृतीयोऽध्यायः सेनामुख्यवधः मण्डलप्रोत्साहनं च,
आदितोऽष्टात्रिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६६, १६७. प्रक . शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधश्च ।

ये चास्य दुर्गेषु वैदेहकव्यञ्जनाः, ग्रामेषु गृहपतिकव्यञ्जनाः, जनपदसन्धिषु गोरक्षकतापसव्यञ्जनाः, ते सामन्ताटविकतत्कुलीनावरुद्धानां पण्यागारपूर्वं प्रेषयेयुः — 'अयं देशो हार्यं' इति । आगतांश्चैषां दुर्गे गूढपुरुषानर्थमानाभ्याम् अभिसत्कृत्य प्रकृतिच्छिद्राणि प्रदर्शयेयुः । तेषु तैः सह प्रहरेयुः ।

स्कन्धावारे वास्य शौण्डिकव्यञ्जनः पुत्रमभित्यक्तं स्थापयित्वा अवस्कन्दकाले रसेन प्रवासयित्वा 'नैषेचनिकम्' इति मदनरसयुक्तान् मद्यकुम्भाञ्छतशः प्रयच्छेत् । शुद्धं वा मद्यं पाद्यं वा मद्यं

शस्त्राग्निरसप्रणिधय इति सूत्रम् । शस्त्राग्निरसानां प्रणिधयः गूढप्रयोगा अभिधीयन्त इति सूत्रार्थः । प्रोत्साहितस्य मण्डलस्य परं प्रति अनुत्थाने उत्थानविलम्बे वा दृष्टे यद् विजिगीषुणा कर्तव्यं, तदिहोच्यते ।

तत्र शस्त्रप्रणिधिमाह — ये चेत्यादि । अस्य परस्य । दुर्गेषु स्थानीयेषु । जनपदसन्धिषु जनपदपरस्पराभ्यन्तरेषु । सामन्ताटविकतत्कुलीनावरुद्धानां परनिसर्गविरोधिनां सामान्तादीनाम् । पण्यागारपूर्वं मार्गापेक्षितपण्यागारसंविधानपुरस्सरम् । प्रेषयेयुः पुरुषान् प्रहिणुयुः । प्रेष्यमाणपुरुषार्पणीयं सन्देशमाह — अयं देशो हार्य इतीति । 'परस्यैष देशो बहुच्छिद्रत्वाद् युष्माभिर्हर्तुं शक्यः, तत् सद्य एवागच्छते'ति सन्दिश्येत्यर्थः । आगतांश्चेति । आगतान्, एषां सामन्ताटविकादीनां, गूढपुरुषान्, अर्थमानाभ्यां धनेन पूजया च, अभिसत्कृत्य उपचर्य, प्रकृतिच्छिद्राणि प्रकृतीनामन्योन्यक्रोधभयादीनि रन्ध्राणि, प्रदर्शयेयुः, तेभ्यः । तेषु दर्शितेषुच्छिद्रेषु तैः सह प्रहरेयुः ।

रसप्रणिधिमाह — स्कन्धावारे वेति । अस्य परस्य, स्कन्धावारे, शौण्डिकव्यञ्जनः सौरिकवेषः सत्री, सौरिकेति क्वचित् पाठः । अभित्यक्तं वध्यं कञ्चित्, पुत्रं स्थापयित्वा स्वपुत्रत्वेन व्यपदिश्य, अवस्कन्दकाले रात्रिविलोपादिकाले, रसेन विषेण, प्रवासयित्वा मारयित्वा, नैषेचनिकमिति मृतसन्तर्पणार्थमित्यपदेशेन, मदनरसयुक्तान् मदकविषमिश्रान्, मद्यकुम्भान्, शतशः, प्रयच्छेद् दद्यात् । विश्वासार्थं पक्षान्तरमाह — शुद्धं वा मद्यमित्यादि । शुद्धं विषसम्बन्धरहितम् । पाद्यं मारणापेक्षितायां विषमात्रायाश्चतु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दद्यादेकमहः, उत्तरं रससिद्धं प्रयच्छेत् । शुद्धं वा मद्यं दण्डमुख्येभ्यः प्रदाय मदकाले रससिद्धं प्रयच्छेत् ।

दण्डमुख्यव्यञ्जनो वा 'पुत्रमभित्यक्तम्' इति — समानम् ।

पक्वमांसिकौदनिकशौण्डिकापूपिकव्यञ्जना वा पण्यविशेषमवघोषयित्वा परस्परसङ्घर्षेण कालिकं समर्घतरमिति वा परानाहूय रसेन स्वपण्यान्यपचारयेयुः ।

सुराक्षीरदधिसर्पिस्तैलानि वा तद्व्यवहर्तृहस्तेषु गृहीत्वा स्त्रियो बालाश्च रसयुक्तेषु स्वभाजनेषु परिकिरेयुः; 'अनेनार्घेण विशिष्टं वा भूयो दीयताम्' इति तत्रैवावकिरेयुः ।

थाँशः पादः तावन्मात्रयुक्तम् । एकम् अहः प्रथमं दिवसम्, अत्यन्तसंयोगे द्वितीया । उत्तरं द्वितीयादिकम् अहः । रससिद्धं पर्याप्तविषयोगनिष्पन्नम् । सेनामुख्याः प्रथममन्यं पाययित्वा पश्चात् स्वयं पिबन्तीति समुदाचारः, तस्मात् तेभ्यः शुद्धं मद्यं प्रथमं दत्त्वा तत्पानमत्तत्वदशायां विषयोगनिष्पन्नं दद्यादित्याह — **शुद्धं वा मद्यं दण्डमुख्येभ्य** इत्यादि ।

दण्डमुख्यव्यञ्जनो भूत्वा वा सत्री शौण्डिकव्यञ्जनवत् पुंत्वमभित्यक्तं स्थापयित्वावस्कन्दकाले रसेन व्यापाद्य च नैषेचनिकापदेशेन मदनरसयुक्तान् मद्यकुम्भान् प्रयच्छेदित्याह — **दण्डमुख्येत्यादि** ।

पक्वमांसान्नसुरापूपान्यतमविक्रयिव्यञ्जना वा भूत्वा स्वस्वपण्यगतं गुणविशेषं प्रख्याप्य परस्परस्पर्धया कालान्तरदेयमूल्यं लघुतरार्घं चेत्युक्त्वा परानाहूय विषेण स्वपण्यानि मिश्रयित्वा प्रयच्छेयुरित्याह — **पक्वमांसिकौदनिकेत्यादि** । कालिकं कालान्तरदेयमूल्यम् । समर्घतरं सङ्गतमूल्यं समर्घं युक्ततरमूल्यं समर्घतरं लघुतरमूल्यमित्यर्थः ।

सुरेत्यादि । सुरादीनि पञ्च वा, तद्व्यवहर्तृहस्तेषु गृहीत्वा सुरादिविक्रयिहस्तेभ्य आदाय, स्त्रियो बालाश्च, रसयुक्तेषु विषयुक्तेषु, स्वभाजनेषु, परिकिरेयुः तदन्तर्गतविषसंमिश्रता यथा स्यात् तथा परिलुलितानि कुर्युः । अनेन अर्घेण पूर्वोक्तादन्येन मूल्येन, दीयतां, विशिष्टं वा भूयो दीयतां, पण्यम् इति वदन्त इति शेषः । तत्रैव विक्रेतृभाजनेष्वेव, अवकिरेयुः प्रत्यर्पयेयुः स्वापराधपरिहारार्थम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतान्येव वैदेहकव्यञ्जनाः पण्यविक्रयेणाहर्तारो वा हस्त्यश्वानां विधायवसेषु रसमासन्ना दद्युः ।

कर्मकरव्यञ्जना वा रसाक्तं यवसमुदकं वा विक्रीणीरन् । चिरसंसृष्टा वा गोवाणिजका गवामजावीनां वा यूथान्यवस्कन्दकालेषु परेषां मोहस्थानेषु प्रमुञ्चेयुः । अश्वखरोष्ट्रमहिषादीनां दुष्टांश्च तद्व्यञ्जना वा चुचुन्दरीशोणिताक्ताक्षान्; लुब्धकव्यञ्जना वा व्यालमृगान् पञ्जरेभ्यः प्रमुञ्चेयुः; सर्पग्राहा वा सर्पानुग्रविषान्; हस्तिजीविनो वा हस्तिनः ।

अग्निजीविनो वा अग्निमवसृजेयुः ।

गूढपुरुषा वा विमुखान् पत्त्यश्वरथद्विपमुख्यानभिहन्युः; आदीपयेयुर्वा मुख्यावासान् । दूष्यामित्राटविकव्यञ्जनाः प्रणिहिताः पृष्ठाभिघातमवस्कन्दप्रतिग्रहं वा कुर्युः । वनगूढा वा प्रत्यन्तस्कन्धमुपनिष्कृष्याभिहन्युः ।

एतान्येवेति । सुराक्षोरादीन्येव, वैदेहकव्यञ्जनाः, पण्यविक्रयेण सुरादिरूपपण्यविक्रयापदेशेन, आहर्तारो वा, हस्त्यश्वानां विधायवसेषु विधासु हस्त्यन्नेषु यवसेषु घासेषु च, रसं विषम्, आसन्नाः, ददुः ।

कर्मकरव्यञ्जना वेत्यादि । रसाक्तं विषामेश्रम् । चिरेत्यादि । चिरसंसृष्टाः चिरकृतसख्याः । मोहस्थानेषु इतिकर्तव्यतामौढ्यावसरेषु । प्रमुञ्चेयुः विसृजेयुः व्याकुलतातिशयार्थम् । अश्वखरोष्ट्रेत्यादि । तद्व्यञ्जनाः अश्वादिवाणिजकव्यञ्जनाः । चुचुन्दरीशोणिताक्ताक्षान् चुचुन्दरी उग्रविषो मूषिकजातिविशेषः तद्रुधिरयुक्तनयनान् । लुब्धकेत्यादि । लुब्धकव्यञ्जनाः व्याधवेषाः । हस्तिनः गजान्, प्रमुञ्चेयुरिति सम्बध्यते ।

अग्निप्रणिधानमाह — अग्निजीविनो वेत्यादि ।

गूढपुरुषा वेत्यादि । मुख्यावासान् मुख्यानां वासस्थानानि । दूष्यामित्रेत्यादि । प्रणिहिताः परेषु प्रयुक्ताः । पृष्ठाभिघातं पृष्ठतोऽनुगम्य हननम् । अवस्कन्दप्रतिग्रहम् अवस्कन्दं प्रतिग्रहं च, अवस्कन्दः सौत्रिकापहारः प्रतिग्रहः अभिगच्छत्परबलप्रत्यवस्थानम् । वनगूढा वेत्यादि । प्रत्यन्तस्कन्धं विषयान्ते रक्षार्थं निवेशितं सैन्यम् । उपनिष्कृष्य समीपे समाकृष्य ।

वीवधासारप्रसारवध इति सूत्रम् । स्फुटार्थम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकायने वीवधासारप्रसारान् वा।

ससङ्केतं वा रात्रियुद्धे भूरितूर्यमाहत्य ब्रूयुः—'अनुप्रविष्टाः स्मो लब्धं राज्यम्' इति। राजावासमनुप्रविष्टा वा सङ्कुलेषु राजानं हन्युः।

सर्वतो वा प्रयातमेनं म्लेच्छाटविकदण्डचारिणः सत्रापाश्रयाः स्तम्भवाटापाश्रया वा हन्युः।

लुब्धकव्यञ्जना वावस्कन्दसङ्कुलेषु गूढयुद्धहेतुभिरभिहन्युः।

एकायने वा शैलस्तम्भवाटखञ्जनान्तरुदके वा स्वभूमिवलेनाभिहन्युः। नदीसरस्तटाकसेतुबन्धभेदवेगेन वाप्लावयेयुः। धान्वनवननिम्नदुर्गस्थं वा योगाग्निधूमाभ्यां नाशयेयुः।

एकेत्यादि। एकायने एकैकक्रमगम्ये सङ्कुचितसङ्कटे मार्गे। वीवधासारप्रसारान् वीवधो धान्यादिप्राप्तिः आसारः सुहृद्बलागमः प्रसारस्तृणकाष्ठादिप्रवेशः एतान्। अभिहन्युरिति वर्तते।

ससङ्केतं वेत्यादि। 'भूरितूर्याघातपूर्वं स्वपक्षजयोद्घोषणं रात्रियुद्धे परबलभयोत्पादनार्थं कर्तव्यमि'त्येवंरूपः समयः सङ्केतः तद्युक्तं यथा भवति तथा। अनुप्रविष्टाः अर्थात् परस्य स्थानीयम्। सङ्कुलेषु तुमुलेषु।

सर्वतो वेत्यादि। एनं राजानम्। सत्रापाश्रयाः सत्रं 'धान्वनवनसङ्कटे'त्यादिना साङ्ग्रामिकतृतीयाध्याये लक्षितं मरुदुर्गादिकं तदाश्रयाः। स्तम्भवाटापाश्रयाः स्तम्भवाटः स्तम्भयुक्ता वृतिः तदाश्रयाः, अथवा स्तम्भापाश्रया वाटापाश्रयाश्च। स्तम्भवनापाश्रया इति क्वचित् पाठः।

लुब्धकेत्यादि। अवस्कन्दसङ्कुलेषु अवस्कन्दनिमित्तेषु तुमुलेषु। गूढयुद्धहेतुभिः कूटयुद्धविकल्पप्रकरणोक्तैः।

एकायने वेत्यादि। शैलस्तम्भवाटखञ्जनान्तरुदके शिलाप्राये स्तम्भवाटप्राये खञ्जनोदके अन्तरुदके च प्रदेशे। अभिहन्युः अर्थात् परबलम्। नद्यादिभेदनप्रवर्तितजलप्रवाहवेगेनाकृष्टं कृत्वा परं नाशयेयुरित्याह—नदीसरस्तटाकेत्यादि। धान्वनदुर्गस्थं वनदुर्गस्थं निम्नदुर्गस्थं च परं कपटोपायप्रयुक्तेनाग्निना धूमेन च नाशयेयुरित्याह—धान्वनेत्यादि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सङ्कटगतमग्निना, धान्वनगतं धूमेन, निधानगतं रसेन, तोयावगाढं दुष्टग्राहैरुदकचरणैर्वा तीक्ष्णाः साधयेयुः ।

आदीप्तावासात् निष्पतन्तं वा —

योगवामनयोगाभ्यां योगेनान्यतमेन वा ।
अमित्रमतिसन्दध्यात् सक्तमुक्तासु भूमिषु ॥

इति कौटलीयार्थशास्त्रे द्वादशेऽधिकरणे चतुर्थोऽध्यायः
शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधश्च,
आदित एकोनचत्वारिंशच्छततमः ॥

सङ्कटगतमिति । अशक्यप्रवेशनिर्गमो देशः सङ्कटः तद्गतम्, अग्निना, धान्वनगतं धन्वदुर्गस्थं, धूमेन, निधानगतं निधानं गूढकोशस्थानं तद्गतं, रसेन विषेण, तोयावगाढं जलमग्नं, दुष्टग्राहैः दुष्टनक्रैः, उदकचरणैर्वा दुर्गलम्भोपाये (१ अध्याये) वक्ष्यमाणैस्तोयसञ्चरणसाधनैर्वा, तीक्ष्णाः साधयेयुः निगृह्णीयुः ।

आदीप्तावासादित्यादि श्लोकान्वयि । योगवामनयोगाभ्यामिति । आदीप्तावासाद् निष्पतन्तम् अग्निदीपिताद् वासस्थानान्निष्क्रामन्तम्, उक्तासु भूमिषु धान्वनादिषु, सक्तं स्वरक्षार्थं कृतासङ्गम्, अमित्रं, योगवामनयोगाभ्यां योगवामनेन दुर्गलम्भोपाये वक्ष्यमाणेन योगेन च योगातिसन्धानाध्याये दर्शयिष्यमाणेन, अन्यतमेन योगेन वा परातिसन्धानोपायेषु पूर्वप्रदर्शितेष्वेकतमेन वा, अतिसन्दध्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् आवलीयसे द्वादशेऽधिकरणे चतुर्थोऽध्यायः
शस्त्राग्निरसप्रणिधयः वीवधासारप्रसारवधश्च,
आदित एकोनचत्वारिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६८—१७०. प्रक. योगातिसन्धानं, दण्डातिसन्धानम्, एकविजयश्च।

दैवतेज्यायां यात्रायाममित्रस्य बहूनि पूज्यागमस्थानानि भक्तितः। तत्रास्य योगमुब्जयेत्।

देवतागृहप्रविष्टस्योपरि यन्त्रमोक्षणेन गूढभित्तिं शिलां वा पातयेत्। शिलाशस्त्रवर्षमुत्तमागारात्, कवाटमवपातितं वा, भित्तिप्रणिहितमेकदेशबन्धं वा परिघं मोक्षयेत्। देवतादेहस्थप्रहरणानि वास्योपरिष्टात् पातयेत्। स्थानासनगमनभूमिषु वास्य गोमयप्रदेहेन गन्धोदकावसेकेन वा रसमतिचारयेत् पुष्पचूर्णोपहारेण वा। गन्धप्रतिच्छन्नं वास्य तीक्ष्णं धूममतिनयेत्। शूलकूपमवपातनं वा शयनासनस्याधस्ताद् यन्त्रबद्धतलमेनं कीलमोक्षणेन प्रवेशयेत्। प्रत्यासन्ने वामित्रे जनपदाज्जनमवरोधक्षममतिनयेत्। दुर्गाच्चानवरोधक्षममपनयेत्।

योगातिसन्धानमिति सूत्रम्। कपटोपायेन वञ्चनमुच्यत इति सूत्रार्थः।

उपायप्रयोगावसरं वक्तुमाह—**दैवतेज्यायामिति**। दैवतपूजायां, यात्रायां दैवतोत्सवयात्रायाम्, अमित्रस्य शत्रोः, पूज्यागमस्थानानि पूजार्हागमनप्रसङ्गाः, भक्तितः दैवतभक्तिवशात्, सम्भवन्तीति शेषः। तत्र, अस्य अमित्रस्य अमित्रमुद्दिश्येत्यर्थः, योगम् उपायम्, उब्जयेत् प्रसारयेत् प्रयुञ्जीतेत्यर्थः।

योगप्रकारानाह—**देवतागृहप्रविष्टस्येत्यादि**। यन्त्रमोक्षणेन यन्त्रस्य गूढभित्तिशिलयोर्धारकस्य बन्धमोचनेन। **शिलेत्यादि**। उत्तमागारात् शिरोगृहात्। अवपातितम् अवस्थानाधाराद् विश्लेषितम्। भित्तिप्रणिहितं भित्तौ गूढनिवेशितम्। एकदेशबन्धम् असमग्रबन्धम् अत एव लघुमोक्षणीयमित्यर्थः। परिघं दण्डम्। **देवतेत्यादि**। अस्य राज्ञः। **स्थानासनेत्यादि**। गोमयप्रदेहेन गोपुरीषलेपेन। रसं विषम्। अतिचारयेत् सम्मिश्रयेत्। पुष्पचूर्णोपहारेण देवतानिर्माल्यकुसुमकुङ्कुमक्षोदोपदया। **गन्धेत्यादि**। गन्धप्रतिच्छन्नं सुरभिद्रव्यगन्धाभिभूतविषगन्धयोगम्। तीक्ष्णं विषदुष्टम्। अतिनयेत् अतिशयेन ग्राहयेत्। शयनासनयोरधस्ताद् यन्त्ररचिततलमेनं शूलयुक्तकूपरूपे पातनगर्ते यन्त्रकीलमोक्षणेन प्रवेशयेदित्याह—**शूलेत्यादि**। अवपातनं पातनगर्तम्। शूलरूपमवपातनमिति क्वचित् पाठः। **प्रत्यासन्ने वामित्र**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यादेयमरिविषयं वा प्रेषयेत् । जनपदं चैकस्थं शैलवननदीदुर्गेष्वटवीव्यवहितेषु वा पुत्रभ्रातृपरिगृहीतं स्थापयेत् ।

उपरोधहेतवो दण्डोपनतवृत्ते व्याख्याताः ।

तृणकाष्ठम् आ योजनाद् दाहयेत् । उदकानि च दूषयेद्; अवास्रावयेच्च । कूटकूपावपातकण्टकिनीश्च बहिरुब्जयेत् ।

सुरुङ्गामभित्रस्थाने बहुमुखीं कृत्वा विचयमुख्यानभिहारयेद्, अमित्रं वा । परप्रयुक्तायां वा सुरुङ्गायां परिखामुदकान्तिकीं खानयेत्, कूपशालामनुसालं वा । अतोयकुम्भान् कांस्यभाण्डानि वा शङ्कास्थानेषु

इति । शत्रावन्तिकस्थे, जनपदात् तदीयाद्, जनम्, अवरोधक्षमम् अवरोधयोग्यम्, अतिनयेत् अतिशयेन नयेद् अवरोधार्थम् । दुर्गाच्च, अनवरोधक्षमम् अवरोधायोग्यं जनं, शत्रुणावरुद्धमित्यर्थः । अपनयेत् मोचयेदित्यर्थः । नीयमानो जनश्चेत् प्रत्यादेयस्तदा तं तच्छत्रुविषयं प्रेषयेदप्रत्यादानायेत्याह —प्रत्यादेयमित्यादि । जनपदमिति । तम्, एकस्थम् एकस्य राज्ञः शत्रुभूतस्य शासने स्थितं, शैलवननदीदुर्गेषु, अटवीव्यवहितेषु प्रदेशेषु वा, पुत्रभ्रातृपरिगृहीतं शत्रोः पुत्रैर्भ्रातृभिश्च स्वस्वायत्तीकृतं, स्थापयेत् कारयेत् ।

उक्तजातीयान् प्रबलपरोपरोधहेतून् अन्यानपि अधिकरणान्तरोक्तान् स्मारयति — उपरोधहेतव इत्यादि । दण्डोपनतवृत्ते षाड्गुण्याधिकरणस्य पञ्चदशाध्याये ।

भूयोऽपि योगानाह — तृणकाष्ठमिति । तृणानि काष्ठानि च, शत्रोरपेक्षितानि, आ योजनाद् योजनमितं प्रदेशमभिव्याप्य, दाहयेद् अमित्रस्य लभ्यानि मा भूवन्नित्येतदर्थम्, उदकानि च, दूषयेत् अर्थाद् विषेण । अवास्रावयेच्च कूलसेतुभेदनादिना निर्गालयेच्च । कूटेत्यादि । तत्र कूटकूपाः गूढा अन्धवः, अवपातास्तृणादिच्छन्ना गर्ताः, कण्टकिन्यः कण्टकयुक्ता आयसरज्जवः । बहिः प्राकारबाह्ये परबलागमनमार्गे । उब्जयेत् निर्मापयेत् ।

यत्रामित्रोऽवतिष्ठते तत्र भूविवरं बहुमुखं कारयित्वा तत्र विचयप्रधानान् अमित्रं च व्यासज्जयेदित्याह — सुरुङ्गामभित्रस्थान इत्यादि । अभिहारयेद् अभियोजयेत् । प्राकारान्तःप्रवेशार्थं परेण कृता चेत् सुरुङ्गा, तर्हि तत्प्रतिघातार्थमुदकदर्शनपर्यन्तावगाढं स्वयं खानयेदित्याह — परप्रयुक्तायां वेत्यादि । परिखाखननस्यासुकरतायां प्राकारायामानुसारिणीं कूप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थापयेत् खाताभिज्ञानार्थम् । ज्ञाते सुरङ्गापथे प्रतिसुरङ्गां कारयेत् । मध्ये भित्त्वा धूमोदकं वा प्रयच्छेत् ।

प्रतिविहितदुर्गो वा मूले दायादं कृत्वा प्रतिलोमामस्य दिशं गच्छेत् — यतो वा मित्रैर्बन्धुभिराटविकैर्वा संसृज्येत, परस्यामित्रैर्दूष्यैर्वा महद्भिः; यतो वा गतोऽस्य मित्रैर्वियोगं कुर्यात्, पार्ष्णिं वा गृह्णीयात्, राज्यं वास्य हारयेत्, वीवधासारप्रसारान् वा वारयेत्; यतो वा शक्नुयाद् आक्षिकवदपक्षेपेणास्य प्रहर्तुं; यतो वा स्वं राज्यं त्रायेत, मूलस्योपचयं वा कुर्यात् । यतः सन्धिमभिप्रेतं लभते, ततो वा गच्छेत् ।

सहप्रस्थायिनो वास्य प्रेषयेयुः — 'अयं ते शत्रुरस्माकं हस्त-

शालां निर्मापयेदित्याह — कूपेत्यादि । अनुसालं सालः प्राकारः तद्दैर्घ्यानुसारेण । 'यस्य चायामः' इत्यव्ययीभावः । सुरङ्गामार्गशङ्काविषयेषु स्थलेषु खाताभिज्ञापकचिह्नतया निर्जलघटान् कांस्यस्तूपान् वा स्थापयेदित्याह — अतोयकुम्भानित्यादि । सुरङ्गामार्गे परकीये ज्ञाते प्रतिसुरङ्गां कारयेत्, सुरङ्गापथमध्ये च रन्ध्रं कृत्वा तदन्तर्विषधूमं विषोदकं वा दद्यादित्याह — ज्ञात इत्यादि ।

यावच्छक्तिकृतदुर्गरक्षाविधानो वा दुर्बलः स्थानीये पुत्रं स्थापयित्वा स्वयम् आत्मानमभियुञ्जानस्य शत्रोरनिष्टोत्पादनानुकूलां दिशं गच्छेदित्येवं पक्षान्तरमाह — प्रतिविहितदुर्गो वेत्यादि । दायादं पुत्रम् । प्रातिलोमां शत्रुप्रतिकूलाम् । प्रातिलोम्यप्रकारान् दर्शयति — यतो वा मित्रैरित्यादि । यां दिशं गतः स्वमित्रबान्धवाटविकैः सह संसर्गं शत्रूपकारार्थं लभेत, शत्रोरमित्रैस्तदुपकरणशक्तैर्दूष्यैर्वा संसृष्टो भवेत्; यां गतः शत्रोस्तन्मित्रयोगं विघटयेत्, पृष्ठं वा गृह्णीयात्, राज्यं वा शत्रोरुपहरेत्, शत्रोर्वीवधासारप्रसारान् वा निरुन्ध्यात्, यां गतः कपटाक्षपातनेनेवाक्षदेर्वा कपटप्रयोगेण शत्रुं प्रहर्तुं शक्तो भवेत्, यां गतः स्वं राज्यं वा रक्षेत्, मूलं वोपचिनुयादित्यर्थः । यां दिशं गतः स्वाभिमतप्रकारं सन्धिं लभेत, तां दिशं गच्छेदित्याह — यतः सन्धिमित्यादि ।

योगान्तरमाह — सहप्रस्थायिनो वेति । प्रातिलोमदिग्गतस्य सहयायिनो गूढपुरुषाः, अस्य शत्रोः, प्रेषयेयुः, अर्थात् सन्देशम् । सन्देशप्रकार-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गतः; पण्यं विप्रकारं वापदिश्य हिरण्यमन्तस्सारबलं प्रेषयस्व, एनमर्पयेम बद्धं प्रवासितं वा' इति। प्रतिपन्ने हिरण्यं सारबलं चाददीत।

अन्तपालो वा दुर्गसम्प्रदानेन बलैकदेशमतिनीय विश्वस्तं घातयेत्।

जनपदमेकस्थं वा घातयितुममित्रानीकमावाहयेत्; तदवरुद्धदेशमतिनीय विश्वस्तं घातयेत्।

मित्रव्यञ्जनो वा बाह्यस्य प्रेषयेत् — 'क्षीणमस्मिन् दुर्गे धान्यं स्नेहाः क्षारो लवणं वा; तदमुष्मिन् देशे काले च प्रवेक्ष्यति; तदुपगृहाण' इति। ततो रसविद्धं धान्यं स्नेहं क्षीरं लवणं वा दूष्यामित्राटविकाः प्रवेशयेयुः; अन्ये वा अभित्यक्ताः।

तेन सर्वभाण्डवीवधग्रहणं व्याख्यातम्।

माह — अयं ते शत्रुरित्यादि। पण्यमपदिश्य हिरण्यं प्रेषयस्व, विप्रकारमपदिश्य अन्तस्सारबलं प्रेषयस्वेति सम्बन्धः। एनं त्वच्छत्रुम्। अर्पयेम अर्थात् तुभ्यम्। प्रवासितं मारितम्। सन्देशमभ्युपेत्य हिरण्ये सारबले च प्रेषिते तदुभयं स्वयं गृह्णीयादित्याह — प्रतिपन्न इत्यादि।

पक्षान्तरमाह — अन्तपालो वेति। स वा, दुर्गसम्प्रदानेन स्वाधिष्ठितदुर्गप्रदानेन, बलैकदेशं शत्रुसैन्यस्यैकदेशम्, अतिनीय अतिशयेन नीत्वा अशक्यापयानं देशं प्रापय्येत्यर्थः, विश्वस्तं घातयेत्।

प्रकारान्तरमाह — जनपदमिति। तम्, एकस्थम् एकीभूय स्वाविधेयतया स्थितं, घातयितुं निग्रहीतुम्, अमित्रानीकम्, आवाहयेत् आनाययेत्। तद्, अवरुद्धदेशं दुष्करनिर्गमनं देशम्, अतिनीय, विश्वस्तं, घातयेत्।

अन्यं पक्षमाह — मित्रव्यञ्जनो वेति। स वा, बाह्यस्य शत्रोः, प्रेषयेत्, अर्थात् सन्देशम्। तत्स्वरूपमाह — क्षीणमस्मिन्नित्यादि। तद् धान्यादि। उपगृहाण त्वमपहृत्य स्वीकुरुष्व। एवं सन्देशप्रेषणानन्तरं विषयोगदूषितं धान्यादिकं दूष्यामित्राटविकाः विजिगीषुसम्बन्धिनः इतरे वा अभित्यक्ताः यथानिर्दिष्टे देशे काले च प्रवेशयेयुरित्याह — ततो रसविद्धमित्यादि।

अनेनैव प्रकारेण सर्वान् भाण्डवीवधान् रसविद्धान् कृत्वा शत्रुणा आहर्येदित्याह — तेन सर्वेत्यादि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्धिं वा कृत्वा हिरण्यैकदेशमस्मै दद्यात्। विलम्बमानः शेषम्। ततो रक्षाविधानान्यवस्रावयेत्; अग्निरसशस्त्रैर्वा प्रहरेत्; हिरण्यप्रतिग्राहिणो वास्य वल्लभाननुगृह्णीयात्।

परिक्षीणो वास्मै दुर्गं दत्त्वा निर्गच्छेत् सुरुङ्गया। कुक्षिप्रदरेण वा प्राकारभेदेन निर्गच्छेत्।

रात्राववस्कन्दं दत्त्वा सिद्धस्तिष्ठेत्; असिद्धः पार्श्वेनापगच्छेत्; पाषण्डच्छद्मना मन्दपरिवारो निर्गच्छेत्; प्रेतव्यञ्जनो वा गूढैर्निर्ह्रियेत; स्त्रीवेषधारी वा प्रेतमनुगच्छेत्।

दैवतोपहारश्राद्धप्रहवणेषु वा रसविद्धमन्नपानमवसृज्य कृतोपजापो दूष्यव्यञ्जनैर्निष्पत्य गूढसैन्योऽभिहन्यात्।

प्रकारान्तरमाह — सन्धिं वेत्यादि। हिरण्यैकदेशं हिरण्यस्य पणितस्य कमपि भागम्। शेषदानविलम्बसाध्यमाह — तत इति। ततः शेषदानविलम्बनवशादित्यर्थः, रक्षाविधानानि शत्रुकरणीयानि अवस्रावयेत् 'अभियोज्यः संहितः' इति विश्वासोत्पादद्वारेण उपेक्षयेदित्यर्थः। अग्निरसशस्त्रैर्वा प्रहरेत् अर्थादवस्रावितरक्षाविधानं शत्रुम्। हिरण्यप्रतिग्राहिणः उत्कोचग्रहणशीलान्, अस्य शत्रोः, वल्लभान् वा, अनुगृह्णीयात् उत्कोचदानेनावर्जयेत् तत्प्रहारार्थम्।

परिक्षीणो वेति। सर्वथा शत्रुनिवारणाशक्तः, अस्मै शत्रवे, दुर्गं दत्त्वा, सुरुङ्गया भूविवरेण, निर्गच्छेत्। **कुक्षिप्रदरेण वा प्राकारभेदेन निर्गच्छेदिति**। प्राकारस्य कुक्षौ यतः प्रदरोऽस्ति ततो भित्त्वा वा निस्सरेत्।

प्रकारान्तरमाह — **रात्रावि**ति। तदा, अवस्कन्दं सौधिकापहारं, दत्त्वा उत्पाद्य, सिद्धस्तिष्ठेत् लब्धार्थश्चेत् तिष्ठेत्। असिद्धः, पार्श्वेन वक्रोपायेन, अपगच्छेत् न तु तिष्ठेत् प्राणापायभयात्। पार्श्वं प्रपञ्चयति — **पाषण्डच्छद्मने**ति। पाषण्डवेषेण, मन्दपरिवारः अल्पपरिजनः, निर्गच्छेत्। प्रेतव्यञ्जनो वा, गूढैः गूढपुरुषैः, निर्ह्रियेत आसन्दीबद्धो नगराद् बहिर्नीयेत, स्त्रीवेषधारी वा प्रेतभार्याच्छद्मा वा, प्रेतं निर्ह्रियमाणम्, अनुगच्छेत्।

दैवतेत्यादि। देवबलिषु श्राद्धेषु उद्यानभोजनेषु च, रसविद्धं विषमिश्रम्, अन्नपानम्, अवसृज्य दत्त्वा, दूष्यव्यञ्जनैः दूष्यवेषैः, निष्पत्य स्वपक्षात् परपक्षं प्रविश्य, कृतोपजापः, गूढसैन्यः गूढैः स्वसैन्यैरुपेतः, अभिहन्यात्॥ अथ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं गृहीतदुर्गो वा प्राश्यप्राशं चैत्यमुपस्थाप्य दैवतप्रतिमाच्छिद्रं प्रविश्यासीत; गूढभित्तिं वा दैवतप्रतिमायुक्तं भूमिगृहम्। विस्मृते सुरुङ्गया रात्रौ राजावासमनुप्रविश्य सुप्तमामित्रं हन्यात्। यन्त्रविश्लेषणं वा विश्लेष्याधस्तादवपातयेत्। रसाग्नियोगेनावलिप्तं गृहं जतुगृहं वाधिशयानममित्रमादीपयेत्।

प्रमदवनविहाराणामन्यतमे वा विहारस्थाने प्रमत्तं भूमिगृहसुरुङ्गागूढभित्तिप्रविष्टास्तीक्ष्णा हन्युः, गूढप्रणिहिता वा रसेन। स्वपतो वा निरुद्धे देशे गूढाः स्त्रियः सर्परसाग्निधूमानुपरि मुञ्चेयुः।

प्रत्युत्पन्ने वा कारणे यद्यदुपपद्येत तत्तदमित्रेऽन्तःपुरगते गूढसञ्चारः प्रयुञ्जीत, ततो गूढमेवापगच्छेत्, स्वजनसंज्ञां च प्ररूपयेत्॥

एकविजय इति सूत्रम्। एकेन सैन्यसाहाय्यरहितेन विजिगीषुणा शत्रोरभिभव इति सूत्रार्थः।

परापहृतदुर्गस्य कर्तव्यमाह — एवमिति। अनेन प्रकारेण गृहीतदुर्गो वा, प्राश्यप्राशं प्राशनीयप्रभूताशनं, चैत्यं देवालयम्, उपस्थाप्य आत्मानं प्रापय्य, दैवतप्रतिमाच्छिद्रं प्रविश्य, आसीत। गूढभित्तिं वा गूढवासयोग्यरन्ध्रवतीं भित्तिं वा, दैवतप्रतिमायुक्तं भूमिगृहं वा, प्रविश्य, आसीत। विस्मृते इत्यादि। विस्मृते शत्रुणा विस्मृते स्ववृत्तान्ते शत्रौ परभयविस्मरणविस्रब्धावस्थिते सतीत्यर्थः। यन्त्रविश्लेषणं यन्त्रं विश्लेष्यते यस्मात् तद् यन्त्रविश्लेषणाधारमित्यर्थः। विश्लेष्य यन्त्राद् वियोज्य। रसाग्नियोगेन अग्निप्रज्वालनानुकूलेन योगेन औपनिषदिकप्रलम्भनप्रकरणे वक्ष्यमाणेन। अवलिप्तम् उपदिग्धम्।

प्रमदवनविहाराणामित्यादि। विहारस्थाने क्रीडाविषये प्रसक्तमिति शेषः। प्रमत्तं क्रीडाव्यासङ्गात् कार्यान्तरानवहितम्। गूढप्रणिहिता वा रसेनेति। गूढपुरुषा वा सूदारालिकव्यञ्जना अन्नपानादौ विषयोजनेन हन्युरित्यर्थः। स्वपतो वेत्यादि। निरुद्धे निवारितजनप्रवेशे। सर्परसाग्निधूमान् सर्पविषाग्निधूमान् औपनिषदिके वक्ष्यमाणान्।

प्रत्युत्पद्यमानं निमित्तमवेक्ष्य यद् यद् वधपरिक्लेशाद्यौपयिकं, तत्तद् अन्तःपुरगते शत्रौ गूढसञ्चारो भूत्वा विजिगीषुः प्रयुञ्जीत, प्रयुज्य चान्तःपुराद् गूढमेवापसरेत्, अपसृत्य च स्वजनेभ्यो गूढप्रणिहितचरेभ्य आह्वानसंकेतं दद्यादित्याह — प्रत्युत्पन्ने वेत्यादि॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वाःस्थान् वर्षवरांश्चान्यान् निगूढोपहितान् परे ।
तूर्यसंज्ञाभिराहूय द्विषच्छेषाणि घातयेत् ॥

इति कौटलीयार्थशास्त्रे आवलीयसे द्वादशाधिकरणे पञ्चमोऽध्यायः
योगातिसन्धानं दण्डातिसन्धानम् एकविजयश्च ।
आदितश्चत्वारिंशच्छततमः ॥
एतावता कौटलीयस्यार्थशास्त्रस्य आवलीयसं
द्वादशमधिकरणं समाप्तम् ॥

के ते स्वजनाः का तदाह्वानसंज्ञा किं चाहूतैः कर्तव्यमित्याकाङ्क्षायामाह—**द्वाःस्थानिति**। द्वारपालव्यञ्जनान्, वर्षवरान् षण्डान् अन्तःपुरचरान्, अन्यांश्च सैनिकादिव्यञ्जनानितरांश्च, परे शत्रौ, निगूढोपहितान् गूढप्रणिहितान्, तूर्यसंज्ञाभिः तूर्यघोषविशेषरूपाभिः संज्ञाभिः, आहूय, द्विषच्छेषाणि द्विषतः शत्रोरात्मना सैन्यनिरपेक्षेण गूढं निहतस्य शेषाणि परिवारान्, घातयेद्, विजिगीषुः । कारयेदिति पाठे हिंस्यादित्यर्थः ॥

प्रकरणत्रयमित्थमस्मिन्नध्याये संकीर्णार्थं वर्णितम् ॥

व्याख्यायामर्थशास्त्रस्य **श्रीमूलाख्यानभाजने** ।
अपूर्यताधिकरणमाबलीयससंज्ञितम् ॥

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्त्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बा**श्री**रामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु **कौटलीयार्थशास्त्र**व्याख्यायां **श्रीमूलाख्यायाम्** आवलीयसे द्वादशेऽधिकरणे
पञ्चमोऽध्यायः योगातिसन्धानं, दण्डातिसन्धानम्, एकविजयः, आदितश्चत्वारिंशच्छततमः ॥
आबलीयसं द्वादशमधिकरणं समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुर्गलम्भोपायः— त्रयोदशमधिकरणम् ।

१७१. प्रक. उपजापः ।

विजिगीषुः परग्राममवाप्तुकामः सर्वज्ञदैवतसंयोगख्यापनाभ्यां स्वपक्षमुद्धर्षयेत्; परपक्षं चोद्वेजयेत् ।

सर्वज्ञख्यापनं तु — गूढपुरुषप्रवृत्तिज्ञानेन प्रत्यादेशो मुख्यानां; कण्टकशोधनापसर्पागमेन प्रकाशनं राजद्विष्टकारिणां; विज्ञाप्योपायनख्यापनमदृष्टसंसर्गविद्यासंज्ञादिभिः; विदेशप्रवृत्तिज्ञानं तदहरेव गृहकपोतेन मुद्रासंयुक्तेन ।

दैवतसंयोगख्यापनं तु—सुरुङ्गामुखेनाग्निचैत्यदैवतप्रतिमाच्छिद्रानुप्रविष्टैरग्निचैत्यदैवतव्यञ्जनैः सम्भाषणं पूजनं च; उदकादुत्थि-

---

अथ दुर्गलम्भोपायो नाम त्रयोदशमधिकरणं प्रस्तूयते । दुर्गस्य परकीयस्य प्राप्त्युपायोऽत्रोपदिश्यते । षट् चात्र सूत्राणि । तत्र प्रथमं सूत्रम्—

उपजाप इति । उपजापो भेद उच्यते इति सूत्रार्थः ।

विजिगीषुरिति । सः, परग्रामं शत्रोर्ग्रामनगरादिकं, अवाप्तुकामः, सर्वज्ञदैवतसंयोगख्यापनाभ्यां राज्ञः सर्वज्ञत्वख्यापनेन दैवतसाक्षात्कारख्यापनेन च, स्वपक्षम्, उद्धर्षयेद् उत्साहयेत् । परपक्षं च उद्वेजयेत् सन्त्रासयेत् ।

सर्वज्ञत्वख्यापनप्रकारमाह—सर्वज्ञख्यापनं त्विति । सर्वज्ञत्वख्यातिनिमित्तं तु, वक्ष्यत इति शेषः । गूढपुरुषप्रवृत्तिज्ञानेनेत्यादि । तदीयगूढगतं रहस्यमसाधुवृत्तं गूढपुरुषद्वारेण विदित्वा प्रत्याख्यानमित्यर्थः । कण्टकेत्यादि । कण्टकशोधनाधिकरणपञ्चमाध्यायोक्तरीत्यापसर्पोपदेशेन राजद्विष्टाचरितॄन् गूढं विदित्वा तेषां प्रत्यापनमित्यर्थः । विज्ञाप्योपायनख्यापनमिति । राज्ञे निवेदनीयं यदुपायनं सेवार्थमन्यैरुपनीतं तस्य ख्यापनम् इदमीदृशमागमिष्यतीति प्रागेवाख्यानं, कैरुपायैः, अदृष्टसंसर्गविद्यासंज्ञादिभिः अदृष्टा अन्याविदिताः याः संसर्गविद्यासंज्ञाः नृत्तगीतवाद्यविद्यासूचनाः तदादिभिः, आदिपदाच्चारोपदेशादिग्रहणम् । विदेशप्रवृत्तिज्ञानमिति । दूरदेशवृत्तान्तज्ञानं, तदहरेव यस्मिन् दिने प्रवृत्तिसम्भवस्तस्मिन्नेव दिने, गृहकपोतेन गृह्यकेण पारावतेन, मुद्रासंयुक्तेन तदहर्वृत्तान्तशंसि लेख्यं मुद्रा तत्संयुक्तेन तद्धारकेण, तदहरेव गृहकपोतेनीतेन विदेशवृत्तान्तलेख्येनेत्यर्थः ।

दैवतसंयोगमधिकृत्याह—दैवतसंयोगख्यापनं त्विति । दैवतसंयो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तैर्वा नागवरुणव्यञ्जनैः सम्भाषा पूजनं च; रात्रावन्तरुदके समुद्रवालुकाकोशं प्रणिधायाग्निमालादर्शनम्; शिलाशिक्यावगृहीते प्लवके स्थानम्; उदकवस्तिना जरायुणा वा शिरोवगूढनासः पृषतान्त्रकुलीरनक्रशिंशुमारोद्रवसाभिर्वा शतपाक्यं तैलं नस्तःप्रयोगः तेन रात्रिगणशश्चरति इत्युदकचरणानि; तैर्वरुणनागकन्यावाक्यक्रिया सम्भाषणं च; कोपस्थानेषु मुखादग्निधूमोत्सर्गः।

तदस्य स्वविषये कार्तान्तिकनैमित्तिकमौहूर्तिकपौराणिकैक्षणिकगूढपुरुषाः साचिव्यकरास्तद्दर्शनञ्च प्रकाशयेयुः। परस्य विषये दैवतदर्शनं दिव्यकोशदण्डोत्पत्तिं च अस्य ब्रूयुः। दैवतप्रश्ननिमित्तवाय-

---

गस्यातिनिमित्तं तु, वक्ष्यत इति शेषः। मुरुङ्गामुखेनेत्यादि। अग्निचैत्यदैवतप्रतिमाछिद्रानुप्रविष्टैः अग्निचैत्यम् अग्निशरणं तस्मिन् या दैवतप्रतिमाः तच्छिद्रानुप्रविष्टैः। उदकादित्यादि। नागवरुणव्यञ्जनैः सर्पदववेषैर्वरुणवेषैश्च। रात्रावित्यादि। अन्तरुदके तटाकादिजलमध्ये, समुद्रवालुकाकोशं समुद्रं वालुकानामनिर्गमाय शणसूत्रसीवनादिना मुद्रितमुखं वालुकाकोशं सिकतापेशीम्। शिलाशिक्येत्यादि। शिलाशिक्यावगृहीते शिलाबन्धवता शिक्येनाधस्ताद् धारिते। प्लवके उडुपादौ। स्थानं स्रोतोवेगानाकृष्यमाणतया स्थितिः। उदकेत्यादि। उदकवस्तिना जलप्रवेशनिरोधकेन वस्त्रान्तेन, जरायुणा वा गर्भपेश्या वा, शिरोवगूढनासः शिरसा सहावच्छादिता नासा यस्य स तथाभूतः पुरुषः, पृषतान्त्रकुलीरनक्रशिंशुमारोद्रवसाभिर्वा बिन्दुमतः शम्बरमृगस्यान्त्रैः कुलीरकुम्भीरजलकपिजलमार्जाराणां वसाभिश्च सह शतपाक्यं तैलं शतकृत्वः पचनेन संस्कृतं तैलं, नस्तःप्रयोगः नासिकायां प्रयुज्यते निषिच्यते इत्यर्थः, तेन तथाविधतैलनस्तःप्रयोगेण युक्त इति शेषः, रात्रिगणशश्चरति रात्रिगणान् जले सञ्चरति। इत्युदकचरणानि एवम्प्रकारा उदकसञ्चाराः। तैः उदकचरणैः, वरुणनागकन्यावाक्यक्रिया वरुणनागकन्यानां वाक्यक्रिया, सम्भाषणं च अन्योन्यभाषणं च। कोपस्थानेष्वित्यादि। कोपकारणेषु, मुखाद्, अग्निधूमोत्सर्गः औषधयोगमायया अग्निधूमयोर्वमनम्।

तदित्यादि। सर्वज्ञत्वदैवतसंयोगगम्यातेर्यन्निमित्तजातमुक्तं, तत्। कार्तान्तिकेत्यादिपदे ईक्षणिको विप्रश्निकः। दैवतेत्यादि। दैवतप्रश्नः शुभाशुभकर्मप्रश्नः निमित्तं शकुनं वायसः काकवाशितम् अञ्जविद्या अञ्जस्पर्शेन शुभाशुभ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साङ्गविद्यास्वप्नमृगपक्षिव्याहारेषु चास्य विजयं ब्रूयुः, विपरीतमस्मित्रस्य सदुन्दुभिम् । उल्कां च परस्य नक्षत्रे दर्शयेयुः ।

परस्य मुख्यान् मित्रत्वेनापदिशन्तो दूतव्यञ्जनाः स्वामिसत्कारं ब्रूयुः । स्वपक्षबलाधानं परपक्षप्रतिघातं च तुल्ययोगक्षेममामात्यानामायुधीयानां च कथयेयुः । तेषु व्यसनाभ्युदयावेक्षणमपत्यपूजनं च प्रयुञ्जीत ।

तेन परपक्षमुत्साहयेद् यथोक्तं पुरस्तात् । भूयश्च वक्ष्यामः — साधारणगर्दभेन दक्षान्; लकुटशाखाहननाभ्यां दण्डचारिणः; कुलैलकेन चोद्विग्नान्; अशनिवर्षेण विमानितान्; विदुलेनावकेशिना

ज्ञापकविद्या स्वप्नः प्रसिद्धः मृगपक्षिव्याहाराः मृगाणां पक्षिणां च रुतानि तेषु । अस्य विजिगीषोः । विपरीतं पराजयं भाविनम् । सदुन्दुभिम् आघोषणभेरीसहितम् । उल्काम् औपनिषदिकस्य द्वितीयाध्याये वक्ष्यमाणाम् ।

परस्येत्यादि । स्वामिसत्कारं ब्रूयुः स्वामिना विजिगीषुणा कृतमात्मसत्कारं प्रपञ्चयेयुः, अर्थान्मुख्यानामपि स्वामिसत्कारलोभोत्पादनार्थम् । **स्वपक्षेत्यादि** । तुल्ययोगक्षेमं योगः स्वपक्षबलाधानपरपक्षप्रतिघाताभ्यां जनितो लाभः क्षेमः स्थितपालनं तदुभयं तुल्यं राज्ञा समानं तत्सहभोग्यत्वाद् यस्य तत् तथाभूतम् । तेष्विति । अमात्येषु आयुधीयेषु च, व्यसनाभ्युदयावेक्षणं व्यसने अभ्यवपत्यादिकरणम् अभ्युदये अभिनन्दनादिकरणं च, अपत्यपूजनं च मृतेष्वपि तेषु तदपत्यानां सत्करणं च, प्रयुञ्जीत ।

यथोक्तेन प्रकारेण परपक्ष्यान् परस्माद् भेदयेदित्याह — **तेन परपक्षमित्यादि** । भूयश्च वक्ष्याम इति । भेदनप्रकारमिति शेषः । तमेवाह— **साधारणेत्यादि** । दक्षान् येऽनलसकर्मकरणशीलास्तान्, साधारणगर्दभेन यथा हि सामान्यगर्दभः कर्म नित्यं तत्फलस्यानभिज्ञः करोति तथा यूयं परार्थे कर्म तत्फलानभिज्ञाः कुरुथेत्येवं गर्दभनिदर्शनेनेत्यर्थः, उत्साहयेदिति वर्तते । **लकुटेत्यादि** । दण्डचारिणः सैनिकान्, लकुटशाखाहननाभ्याम् उत्साहयेत्, लकुटो वेत्रयष्टिः शाखाहननं कुठारादि ताभ्यामुपमानीकृताभ्यां दीपयेत्, वेत्रकुठारवत् यूयं स्वकर्म परस्मिंस्तत्फलमनुभवति स्वयमननुभवन्त एव कुर्वन्तोऽचेतनसधर्माण इत्युपालम्भेन भेदयेदित्यभिप्रायः । **कुलैत्यादि** । उद्विग्नान् परस्माद् भीतान्, कुलैलकेन स्वयूथभ्रष्टेन जीवितनिराशेन मेषेण, तदुपमानी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वायसपिण्डेन कैतवजमेघेनेति विहताशान्; दुर्भगालङ्कारेण द्वेषिणेति पूजाफलान्; व्याघ्रचर्मणा मृत्युकूटेन चोपहितान्; पीलुविखादनेन करकयोष्ट्र्या गर्दभीक्षीराभिमन्थनेनेति ध्रुवापकारिणः इति।

प्रतिपन्नान् अर्थमानाभ्यां योजयेत्। द्रव्यभक्तच्छिद्रेषु चैनान् द्रव्यभक्तदानैरनुगृह्णीयात्। अप्रतिगृह्णतां स्त्रीकुमारालङ्कारानभिहरेयुः।

करणेनेत्यर्थः, उत्साहयेत्। अशनिवर्षेण विमानितानिति। ये परेण विमानितास्तान्, अशनिपाततुल्या विमानना युष्माभिर्बहुमानाचिरार्थिभिः परस्मात् प्राप्तेति कथनेनोत्साहयेदित्यर्थः। विदुलेनेति। वञ्चुलेन, अवकेशिना अफलेन, वाशब्दः पक्षान्तरे, आयसपिण्डेन अयोमयेन भक्षणानर्हेण भक्तपिण्डेन, कैतवजमेघेन मिथ्यासृष्टेनानुदकदायिना मेघेन, इतिशब्दः प्रकारे। एवञ्जातीयेन वस्तुना परमुपमायेति शेषः, विहताशान् परभग्नमनोरथान्, उत्साहयेत्। ये कटकाङ्गुलीयकादिदानेन क्रियमाणां पूजां स्वकर्मणः फलं मन्यन्ते तान् परदत्तालङ्कारदुर्भगत्वकथनेन 'कृते कर्मणि अप्रीतः पर' इति कथनेन भेदकप्रकारान्तरकथनेन च भेदयेदित्याह — दुर्भगालङ्कारेणेत्यादि। व्याघ्रचर्मणेति। उपहितान् ये उपहिताः परप्रयुक्तयोपधया प्रतारिताः तान्, व्याघ्रचर्मणेति व्याघ्रस्येव चर्मास्य व्याघ्रचर्मा तेन, — 'परो निर्दोषसदोषीकरणव्यसनितया हिंस्रत्वाद् व्याघ्रस्वभावः' इति परस्य व्याघ्रौपम्यकथनेनेत्यर्थः। व्यालचर्मणेति पाठे व्यालो हिंस्रसत्त्वः। व्याघ्रच्छद्मनेति वा पाठः कृतकव्याघ्रः पर इति कथनेनेति तदार्थः। मृत्युकूटेन च पर उक्तादेव दोषात् कपटमृत्युरिति कथनेन चेत्यर्थः, उत्साहयेत्। पीलुवित्यादि। ध्रुवापकारिणः ये परस्य नित्यापकर्तारस्तान्, पीलुविखादनेन पीलु वृक्षविशेषफलं तिक्तरसं तस्य विखादनेन भक्षणेन — यथा पीलुभक्षणं तिक्तरसत्वादुद्वेजकं तद्वत् परसेवनमिति कथनेनेत्यर्थः, करकया तिक्तरसः शाकभेदः करका तया, उष्ट्र्या तिक्तरस ओषधिभेद उष्ट्री तया ताभ्यां सह परमुद्वेजकत्वेन धर्मेणोपमायेत्यर्थः, गर्दभीक्षीराभिमन्थनेन परोपसर्पणस्य तत्समानत्वकथनेनेत्यर्थः, इतिशब्दः प्रकारान्तरार्थः, उत्साहयेत्। अनिष्पत्य परस्यापकुर्वतां तस्मान्निष्पतनार्थमयमुपदेशः। इतिशब्दः प्रकारवर्णनसमाप्तौ।

प्रतिपन्नानिति। उत्साहनाभ्युपगन्तॄन्, अर्थमानाभ्यां योजयेत्। धनान्नसंकटेषु चैषां तदानीरुपकुर्यादित्याह — द्रव्यभक्तेत्यादि। दीयमानं द्रव्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुर्भिक्षस्तेनाटव्युपघातेषु च पौरजानपदानुत्साहयन्तः सन्त्रिणो ब्रूयुः—'राजानमनुग्रहं याचामहे; निरनुग्रहाः परत्र गच्छामः' इति।

तथेति प्रतिपन्नेषु द्रव्यधान्यपरिग्रहैः।
साचिव्यं कार्यमित्येतदुपजापाद्भुतं महत्॥

इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशेऽधिकरणे प्रथमोऽध्यायः उपजापः,
आदित एकचत्वारिंशच्छततमः॥

भक्तं गौरवभङ्गभयादप्रतिगृह्णतां स्त्रीधार्याणि कुमारधार्याणि च भूषणानि सत्कारपूर्वं दद्युरित्याह—अप्रतिगृह्णतामित्यादि।

दुर्भिक्षेत्यादि। उत्साहयन्तो ब्रूयुः भेदनार्थं कथयेयुः।

तथेतिप्रतिपन्नेष्विति। तथा कुर्म इति कृतयथोक्तवचनाङ्गीकारेषु अर्थात् पौरजानपदेषु स्वामिसकाशादलब्धानुग्रहेषु सत्सु, द्रव्यधान्यपरिग्रहैः धनधान्यवासस्थलानां दानैः, साचिव्यं कार्यम् अनुग्रहः कर्तव्यो विजिगीषुणा। इत्येतत् महत् प्रशस्तम्, उपजापाद्भुतम् उपजापवैचित्र्यम्॥

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे प्रथमोऽध्यायः उपजापः,
आदित एकचत्वारिंशच्छततमः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७२. प्रक. योगवामनम् ।

मुण्डो जटिलो वा पर्वतगुहावासी चतुर्वर्षशतायुः ब्रुवाणः प्रभूतजटिलान्तेवासी नगराभ्याशे तिष्ठेत् । शिष्याश्चास्य मूलफलोपगमनैरात्मानं राजानं च भगवद्दर्शनाय योजयेयुः । समागतश्च राज्ञा पूर्वराजदेशाभिज्ञानानि कथयेत् 'शते शते च वर्षाणां पूर्णेऽहमग्निं प्रविश्य पुनर्बालो भवामि; तदिह भवत्समीपे चतुर्थमग्निं प्रवेक्ष्यामि; अवश्यं मे भवान् मानयितव्यः; त्रीन् वरान् वृणीष्व इति । प्रतिपन्नं ब्रूयात् — सप्तरात्रमिह सपुत्रदारेण प्रेक्षाप्रहवणपूर्वं वस्तव्यम् इति । वसन्तमवस्कन्देत ।

मुण्डो वा जटिलो वा स्थानिकव्यञ्जनः प्रभूतजटिलान्तेवासी वस्तशोणितदिग्धां वेणुशलाकां सुवर्णचूर्णेनावलिप्य वल्मीके निदध्याद् उपजिह्विकानुसरणार्थं, स्वर्णनालिकां वा । ततः सत्री राज्ञः कथयेत् — असौ सिद्धः पुष्पितं निधिं जानाति' इति । स राज्ञा पृष्टः 'तथा' इति ब्रूयात् । तच्चाभिज्ञानं दर्शयेत् । भूयो वा हिरण्य-

---

योगवामनमिति सूत्रम् । योगेन कपटोपायेन वामनं परस्य तद्दुर्गान्निष्क्रामणमुच्यत इति सूत्रार्थः ।

मुण्डो जटिलो वेत्यादि । चतुर्वर्षशतायुः ब्रुवाणः चत्वारि वर्षशतान्यात्मनो वयांसि गतानीति कथयन् । प्रभूतजटिलान्तेवासी प्रचुराश्च जटाधराश्च शिष्या यस्य स तथाभूतः । शिष्याश्चेत्यादि । मूलफलोपगमनैः मूलानां फलानां चाभ्यवहारार्थमुपहृतैः । समागतश्चेत्यादि । पूर्वराजदेशाभिज्ञानानि पूर्वेषां राज्ञां देशानां च चिह्नानि । शते शते चेत्यादि । मानयितव्यः वरदानेन सम्भावयितव्यः । इति कथयेदिति सम्बन्धः । प्रतिपन्नमित्यादि । कृतयथोक्ताभ्युपगमम् । इह मदन्तिके । प्रेक्षाप्रहवणपूर्वं प्रेक्षा रूपकाभिनयादिदर्शनं प्रहवणं तुष्टिभोजनादि तत्पुरस्सरम् । अवस्कन्देत हन्यात् ।

मुण्डो वेत्यादि । स्थानिकव्यञ्जनः स्थानविशेषाध्यक्षः स्थानिकः तद्व्यञ्जनः । वस्तशोणितदिग्धां छागरुधिरलिप्ताम् । उपजिह्विकानुसरणार्थम् उपजिह्विका वम्री तदनुसरणार्थं तच्चाकृत्रिमत्वप्रतीत्यर्थम् । स्वर्णनालिकां सुवर्णयुक्तं वेणुभाजनं वा । ततः सत्रीत्यादि । पुष्पितं फलितावस्थापूर्वरूपभूतां पुष्पितावस्थां प्राप्तम् । तच्चाभिज्ञानं पूर्वोक्तं सुवर्णदिग्धवेणुशलाकादिरूपं चिह्नम् । भूयो वेत्यादि । भूयो बहुतरम् । अन्तः वल्मीकस्यान्तर्भागे । प्राणिपातसाध्य,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्तराधाय ब्रूयाच्चैनं—'नागरक्षितोऽयं निधिः प्रणिपातसाध्यः इति। प्रतिपन्नं ब्रूयात् — सप्तरात्रम्' इति समानम्।

स्थानिकव्यञ्जनं वा रात्रौ तेजनाग्नियुक्तमेकान्ते तिष्ठन्तं सत्रिणः क्रमाभिनीतं राज्ञः कथयेयुः—'असौ सिद्धः सामेधिकः' इति। तं राजा यमर्थं याचेत, तमस्य करिष्यमाणः, 'सप्तरात्रम्' — इति समानम्।

सिद्धव्यञ्जनो वा राजानं जम्भकविद्याभिः प्रलोभयेत्। 'तं राजा' इति समानम्।

सिद्धव्यञ्जनो वा देशदेवतामभ्यर्हितामाश्रित्य प्रहवणैरभीक्ष्णं प्रकृतिमुख्यानभिसंवास्य क्रमेण राजानमतिसन्दध्यात्।

जटिलव्यञ्जनमन्तरुदकवासिनं वा सर्वश्वेतं तटसुरङ्गाभूमिगृहापसरणं वरुणं नागराजं वा सत्रिणः क्रमाभिनीतं राज्ञः कथयेयुः। 'तं राजा' इति समानम्।

नागाराधनसाधनीयः। सप्तरात्रमिति समानमिति। "सप्तरात्रमिह सपुत्रदारेण प्रेक्षाप्रहवणपूर्वं वस्तव्यमिति ब्रूयाद्, वसन्तं चावस्कन्देते"ति यत् पूर्वमभिहितं तदिहापि योज्यमित्यर्थः।

स्थानिकव्यञ्जनं वेत्यादि। तेजनाग्नियुक्तम् औपनिषदिकद्वितीयाध्यायोक्तेन तेजनयोगेन स्वगात्राभिप्रज्वलनाद्भुतप्रदर्शकमित्यर्थः। तेजनेत्यादिविशेषणद्वयं तापसत्वविश्वासार्थम्। सामेधिकः आविसमृद्धीक्षणिकः।

सिद्धव्यञ्जनो वा राजानमित्यादि। जम्भकविद्याभिः मायाविद्याभिः। तं राजेति समानमिति। "तं राजा यमर्थं याचेत, तमस्य करिष्यमाणः सप्तरात्रमिह सपुत्रदारेण प्रेक्षाप्रहवणपूर्वं वस्तव्यमिति ब्रूयाद्, वसन्तं चावस्कन्देते"ति प्रागुक्तमिहापि योज्यमित्यर्थः।

सिद्धव्यञ्जनो वा देशदेवतामित्यादि। अभ्यर्हितां देवतासु मध्ये विशिष्टाम्। प्रकृतिमुख्यान् अमात्यादीन्। अभिसंवास्य संस्तवेनाभिमुखीकृत्य। क्रमेण प्रकृतिमुख्यद्वारेणेत्यर्थः। अतिसन्दध्याद् अभिसंवास्य वञ्चयेत्।

जटिलव्यञ्जनमित्यादि। अन्तरुदकवासिनम् उदकचरणविद्ययोदकान्तर्वासशीलम्। सर्वश्वेतं सर्वात्मना श्वेतं, सर्वेषां श्वेततरं वा, 'गुणात् तरेण तरलोपश्चे'ति समासः। सर्वश्वेतत्वं च देवतावर्णविश्वासार्थम्। तटसुरङ्गा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जनपदान्तेवासी सिद्धव्यञ्जनो वा राजानं शत्रुदर्शनाय योजयेत् । प्रतिपन्नं बिम्बं कृत्वा शत्रुमावाहयित्वा निरुद्धे देशे घातयेत् ।

अश्वपण्योपयाता वैदेहकव्यञ्जनाः पण्योपायननिमित्तमाहूय राजानं पण्यपरीक्षायामासक्तमश्वव्यतिकीर्णं वा हन्युः, अश्वैश्च प्रहरेयुः ।

नगराभ्याशे वा चैत्यमारुह्य रात्रौ तीक्ष्णाः कुम्भेषु नालीन् वा विदलानि धमन्तः — 'स्वामिनो मुख्यानां वा मांसानि भक्षयिष्यामः पूजा नो वर्तताम्' इत्यव्यक्तं ब्रूयुः । तदेषां नैमित्तिकमौहूर्तिकव्यञ्जनाः ख्यापयेयुः ।

मङ्गल्ये वा ह्रदे तटाकमध्ये वा रात्रौ तैजनतैलाभ्यक्ता नागरूपिणः शक्तिमुसलान्ययोमयानि निष्पेषयन्तस्तथैव ब्रूयुः । ऋक्षचर्म-

---

भूमिगृहापसरणं तटान्तर्विवरेण वा भूमिगृहेण वा अपसरणं निर्गमनं यस्य तं तथाभूतम् । क्रमाभिनीतं क्रमेणाभिमुख्यं नीतम् । तं राजेति समानमिति । 'तं राजा यमर्थं याचेत तमस्य कारेष्यमाण' इत्यादिना 'वसन्तमवस्कन्देत' इत्येतदन्तेनोक्तमिह योज्यमित्यर्थः ।

जनपदेत्यादि । जनपदान्तेवासी जनपदान्तो जनपदसीमा शत्रुविजिगीषुजनपदयोः सन्धिः तत्र वास्तव्यः । योजयेद् घटनां कुर्यात् । प्रतिपन्नमिति । अङ्गीकृतशत्रुदर्शनं राजानं, बिम्बं कृत्वा पूर्वसङ्केतितमाह्वानार्थं चिह्नं ध्वनिविशेषादिरूपं कृत्वा, शत्रुम्, आवाहयित्वा आनाय्य, निरुद्धे सर्वतः प्रतिरुद्धगतौ देशे, घातयेत्, अर्थाच्छत्रुणा ।

अश्वेत्यादि । वैदेहकव्यञ्जनाः अश्वविक्रेतृवेषाः । पण्योपायननिमित्तम् अश्वरूपाणां पण्योपायनानां दर्शनार्थम् । आसक्तं तत्परम् । अश्वव्यतिकीर्णं वा अश्वसम्बाधगतं वा ।

नगराभ्याशे वेत्यादि । चैत्यम् उद्देशद्रुमम् । नालीन् धान्यकाण्डान् । विदलानि पाटितदारुशकलानि । धमन्तः धूपयन्तः । अव्यक्तं मानुषीयत्वव्यक्तिर्यथा न भवेत् तथा । तदेषामित्यादि । तद् वचनम् ।

मङ्गल्ये वेत्यादि । मङ्गल्ये मङ्गलनिमित्ते । ह्रदे अगाधे जलाशये । तैजनतैलाभ्यक्ताः शरतैलाभ्यक्ताः । तथैव 'स्वामिनो मुख्यानां मांसानि भक्षयिष्यामः' इत्युक्तेन प्रकारेणैव । ऋक्षेत्यादि । ऋक्षचर्मकञ्चुकिनः भल्लूकत्वङ्-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कञ्चुकिनो वा अग्नेधूमोत्सर्गयुक्ता रक्षोरूपं वहन्तस्त्रिरपसव्यं नगरं कुर्वाणाः श्वसृगालवाशितान्तरेषु तथैव ब्रूयुः। चैत्यदैवतप्रतिमां वा तेजनतैलेनाभ्रपटलच्छन्नेनाग्निना वा रात्रौ प्रज्वाल्य तथैव ब्रूयुः। तदन्ये ख्यापयेयुः।

दैवतप्रतिमानामभ्यर्हितानां वा शोणितेन प्रस्रावमतिमात्रं कुर्युः। तदन्ये दैवरुधिरसंस्रावे सङ्ग्रामे पराजयं ब्रूयुः।

सन्धिरात्रिषु श्मशानप्रमुखे वा चैत्यमूर्ध्वभक्षितैर्मनुष्यैः प्ररूपयेयुः। ततो रक्षोरूपी मनुष्यकं याचेत। यश्चात्र शूरवादिकोऽन्यतमो वा द्रष्टुमागच्छेत् तमन्ये लोहमुसलैर्हन्युः, यथा रक्षोभिर्हत इति ज्ञायेत। तदद्भुतं राज्ञः तद्दर्शिनः सत्रिणश्च कथयेयुः। ततो नैमित्तिकमौहूर्तिकव्यञ्जनाः शान्तिं प्रायश्चित्तं ब्रूयुः — 'अन्यथा महदकुशलं राज्ञो देशस्य च' इति। प्रतिपन्नम् 'एतेषु सप्तरात्रमेकैकमन्त्रबलिहोमं स्वयं राज्ञा कर्तव्यम्' इति ब्रूयुः। ततः समानम्।

निर्मितकञ्चुकधारिणः। अपसव्यं कुर्वाणाः अप्रदक्षिणं परिगच्छन्तः। श्वसृगालवाशितान्तरेषु कुक्कुरजम्बुकविरावमध्येषु। शिवासृगालेत्यपपाठः। तथैव पूर्वोक्तप्रकारेणैव। चैत्यदैवतप्रतिमां वेत्यादि। अभ्रपटलच्छन्नेन अभ्रकधातुमये छदिषि अदृश्यतया स्थितेन। तथैव 'स्वामिनो मुख्यानां वेत्यादिरीत्या। तत् तथावचनम्। अन्ये सत्रिणः।

दैवतप्रतिमानामित्यादि। शोणितेन मेषादिरक्तेन। प्रस्रावं प्रस्रुतिम्। कुर्युः भावयेयुः। तदित्यादि। तदन्ये प्रस्रावोत्पादकातिरिक्ताः सत्रिणः।

सन्धीत्यादि। सन्धिरात्रिषु पर्वनिशासु। चैत्यं चिताङ्गम्। ऊर्ध्वभक्षितैः पूर्वकायभक्षितैः। मनुष्यैः उपलक्षितानीति शेषः। प्ररूपयेयुः दर्शयेयुः। तत इत्यादि। याचेत भक्षणार्थम्। 'मनुष्ययाचिनं राक्षसमहं हनिष्यामी'ति यदि यः कश्चित् शूरवादेनोपगच्छेत्, तमन्ये सत्रिणो लोहमुसलैः स्वयं हन्युः, 'रक्षोभिः स हत' इति च ज्ञापयेयुरित्याह — यश्चात्रेत्यादि। तदित्यादि। तद् अद्भुतं शूरपुरुषघातनाश्चर्यम्। ततो नैमित्तिकेत्यादि। प्रतिपन्नं अभ्युपगतशान्तिप्रायश्चित्तानुष्ठानम्। एतेषु पूर्वोक्तेषु दुर्निमित्तेषु विषये। एकैकबलिमन्त्रहोमम् एकैकस्य दुर्निमित्तस्यैकैकं बलिमन्त्रहोमं, बलिरुपहारः मन्त्रो मन्त्रजपः होमोऽग्नावाहुतिः एषां समाहारो बलिमन्त्रहोमम्। ततः समानमिति। 'तत्र वसन्तमवस्कन्देते'त्ययमर्थः प्राग्वद् द्रष्टव्य इत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतान् वा योगानात्मनि दर्शयित्वा प्रतिकुर्वीत परेषामुपदेशार्थम्। ततः प्रयोजयेद् योगान्। योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यात्।

हस्तिकामं वा नागवनपाला हस्तिना लक्षण्येन प्रलोभयेयुः, प्रतिपन्नं गहनमेकायनं वातिनीय घातयेयुः, बद्ध्वा वापहरेयुः।

तेन मृगयाकामो व्याख्यातः।

द्रव्यस्त्रीलोलुपमाढ्यविधवाभिर्वा परमरूपयौवनाभिः स्त्रीभिर्दायादनिक्षेपार्थमुपनीताभिः सत्रिणः प्रलोभयेयुः। प्रतिपन्नं रात्रौ सत्रिच्छन्नाः समागमे शस्त्ररसाभ्यां घातयेयुः।

य एते योगा अभिहिताः तान् स्वसहायानामुपदेशार्थम् आत्मनि शुष्केष्टिन्यायेन प्रथमं दर्शयित्वा प्रतिविदध्यात्, पश्चात् तु उपदिष्टस्वीयपुरुषसहायः शत्रौ प्रयोजयेदित्याह — **एतान् वा योगानित्यादि। योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यादिति।** इदं वाक्यं कोशाभिसंहरणप्रकरणपठितं व्याख्यातचरम्। अस्येह पाठस्तु — योगानां प्रयोगप्रतिविधानयोः कोशाभिसंवर्धनाभ्युपायतां पूर्वोक्तां स्मारयितुम्।

हस्तिकामं वेति। गजलोलुपं शत्रुं, नागवनपालाः विजिगीषुपक्ष्याः, **हस्तिना** लक्षण्येन प्रशस्तलक्षणवता, प्रलोभयेयुः, तथाविधहस्तिग्रहणाभिलाषं तस्य जनयेयुरित्यर्थः। प्रतिपन्नम् अभ्युपगतप्रलोभनं तं, गहनं दुष्प्रवेशं वनम्, एकायनं वा एकमात्रगम्यतया सङ्कटं मार्गं वा, अतिनीय अतिसन्धानेन नीत्वा, घातयेयुः, बद्ध्वा वापहरेयुः अघातनपक्षे रज्जुभिर्बद्धं कृत्वा विजिगीषोरन्तिकं नयेयुः, यथा — प्रतिज्ञायौगन्धरायणे वत्सराजं सालङ्कायनादयः प्रद्योतभृत्याः स्वस्वाम्यन्तिकमिति भावः।

हस्तिकामविषयोक्तं मृगयाकामेऽतिदिशति — **तेनेत्यादि।**

द्रव्यस्त्रीलोलुपामिति। धनकामं स्त्रीकामुकं वा, आढ्यविधवाभिः, वैधव्यं प्राप्ताभिर्धनिकाभिः, परमरूपयौवनाभिः स्त्रीभिः अविधवानाढ्याभिर्वनिताभिः, दायादनिक्षेपार्थम् उपनीताभिः दायादापहृतनिक्षेपप्रतिलम्भार्थव्यवहारवशादन्तिकं प्रापिताभिरित्यर्थः, सत्रिणः प्रलोभयेयुः। प्रतिपन्नम् अभ्युपगतप्रलोभनं, रात्रौ, सत्रिच्छन्नाः सत्रिसम्बन्धिनो गूढपुरुषाः, समागमप्रसङ्गे, शस्त्ररसाभ्याम् आयुधप्रहारविषप्राशनाभ्यां, घातयेयुः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिद्धप्रव्रजितचैत्यस्तूपदैवतप्रतिमानामभीक्ष्णाभिगमनेषु वा भूमिगृहसुरङ्गागूढभित्तिप्रविष्टास्तीक्ष्णाः परमभिहन्युः ।

येषु देशेषु याः प्रेक्षाः प्रेक्षते पार्थिवः स्वयम् ।
यात्राविहारे रमते यत्र क्रीडति वाम्भसि ॥
चाटूक्त्यादिषु कृत्येषु यज्ञप्रहवणेषु वा ।
सूतिकाप्रेतरोगेषु प्रीतिशोकभयेषु वा ॥
प्रमादं याति यस्मिन् वा विश्वासात् स्वजनोत्सवे ।
यत्रास्यारक्षिसञ्चारो दुर्दिने सङ्कुलेषु वा ॥
विप्रस्थाने प्रदीप्ते वा प्रविष्टे निर्जनेऽपि वा ।
वस्त्राभरणमाल्यानां फेलाभिः शयनासनैः ॥
मद्यभोजनफेलाभिस्तूर्यैर्वाभिहतैः सह ।
प्रहरेयुररींस्तीक्ष्णाः पूर्वप्रणिहितैः सह ॥

सिद्धेत्यादि । सिद्धानां साधूनां प्रव्रजितानां भिक्षूणां चैत्यस्तूपदैवतप्रतिमानां च चैत्येषु देवालयेषु स्तूपेषु तद्विम्बेषु च वर्तमानानां देवताप्रतिमानां च, अभीक्ष्णाभिगमनेषु वा पौनःपुनिकेषु सेवार्थगमनेषु वा, भूमिगृहसुरङ्गागूढभित्तिप्रवेष्टाः, तीक्ष्णाः, परं शत्रुम्, अभिहन्युः ॥

विधिशेषं पञ्चभिः श्लोकैरेकान्वयेनाह — येष्वित्यादि । पार्थिवः, येषु देशेषु, याः प्रेक्षाः नृत्तानि, स्वयं प्रेक्षते, तेषु तासु चेति शेषः । यत्र यात्राविहारे, रमते व्यासज्जते तत्रेति शेषः । यत्र वा अम्भसि क्रीडति रमते, तत्रेति शेषः । चाटूक्त्यादिष्विति पाठः चाटूक्तिः स्तुतिवादस्तदादिषु, धिगुक्त्यादिष्वित्यपि पाठः । कृत्येषु एतत्स्थाने सर्वेष्विति क्वचित् पाठः । यज्ञप्रहवणेषु वा यज्ञेषु तुष्टिभोजनेषु च, सूतिकाप्रेतरोगेषु प्रीतिशोकभयेषु वा प्रसवमरणरोगनिमित्तासु हर्षदुःखभीतिषु वा, यस्मिन् वा स्वजनोत्सवे, विश्वासात् प्रमादं याति, तस्मिन्निति शेषः । यत्र, अस्य राज्ञः, अरक्षिसञ्चारः रक्षिपुरुषरहितः सञ्चारो भवति, तत्रेति शेषः । दुर्दिने अतिवर्षे, संकुलेषु वा आकीर्णेषु वा, विप्रस्थाने विमार्गतः प्रस्थाने, प्रदीप्ते वा नगरादावग्निसन्दीपने वा, प्रविष्ट निर्जनेऽपि वा विजनदेशप्रवेशे वा, तीक्ष्णाः, अरीन् शत्रून् प्रहरेयुः, कथम्भूताः, वस्त्राभरणमाल्यानां फेलाभिः उपभुक्तशेषैः, शयनासनैः, मद्यभोजनफेलाभिः मद्यभोजनोच्छिष्टैश्च, प्रीता इति शेषः, पुनः कीदृशाः, अभि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथैव प्रविशेयुश्च द्विषतः सत्रहेतुभिः ।
तथैव चापगच्छेयुरित्युक्तं योगवामनम् ॥

इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशाधिकरणे द्वितीयोऽध्यायः योगवामनम्,
आदितो द्विचत्वारिंशच्छततमः ॥

हतैः तूर्यैः सह आह्वानार्थं शब्दापितैः संज्ञातूर्यैः सहिताः, पुनः कथम्भूताः, पूर्वप्रणिहितैः सह पूर्वनियुक्तैर्गूढपुरुषैः संज्ञातूर्यशब्दाहूतैर्दत्तसाहाय्या इत्यर्थः ॥

यथैवेति । येनैव प्रकारेण महाप्रणिधानदानलक्षणेन, सत्रहेतुभिः छद्मनिमित्तैरुपलब्धैः, द्विषतः शत्रून्, प्राविशेयुः अर्थात् सत्रिणः, तथैव तेनैव प्रकारेण, अपगच्छेयुः द्विषद्भ्योऽपसरेयुः, अन्यथा हि द्विषद्भिर्गृहीताः स्युरिति भावः । इति योगवामनम् उक्तम् उपदिष्टम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे द्वितीयोऽध्यायः योगवामनम्,
आदितो द्विचत्वारिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७३. प्रक. अपसर्पप्रणिधिः ।

श्रेणीमुख्यमात्तं निष्पातयेत् । स परमाश्रित्य पक्षापदेशेन स्वविषयात् साचिव्यकरणसहायोपादानं कुर्वीत । कृतापसर्पोपचयो वा परमनुमान्य स्वामिनो दूष्यग्रामं वीतहस्त्यश्वं दूष्यामात्यं दण्डमाक्रन्दं वा हत्वा परस्य प्रेषयेत् । जनपदैकदेशं श्रेणीमटवीं वा सहायोपादानार्थं संश्रयेत । विश्वासमुपगतः स्वामिनः प्रेषयेत् । ततः स्वामी हस्तिबन्धनमटवीघातं वापदिश्य गूढमेव ग्रहेत् ।

एतेनामात्याटविका व्याख्याताः ।

शत्रुणा मैत्रीं कृत्वा अमात्यानवक्षिपेत् । ते तच्छत्रोः प्रेष-

---

अपसर्पप्रणिधिरिति सूत्रम् । अपसर्पो गूढपुरुषः तस्य प्रणिधानं परविषये निवासनमुच्यत इति सूत्रार्थः ।

श्रेणीमुख्यमिति । तम्, आप्तं प्रत्ययितं, निष्पातयेद् द्वेषहेत्वपदेशेनात्मसकाशान्निष्पतितं कुर्यात्, अर्थाद् विजिगीषुः । **स इति** । मिथ्यानिष्पातितः श्रेणीमुख्यः, परं शत्रुम्, आश्रित्य, पक्षापदेशेन परपक्षार्थत्वापदेशेन, स्वविषयाद् विजिगीषुदेशात्, साचिव्यकरणसहायोपादानं साहाय्यकरणार्थानां सहायानां संग्रहणं, कुर्वीत । **कृतापसर्पोपचयो वेति** । एवं सम्पादितबहूपसर्पसहायः, परम् अनुमान्य शत्रवनुमतिग्रहणपूर्वं, स्वामिनो विजिगीषोः, दूष्यग्रामं दूष्यवर्गं, वीतहस्त्यश्वम् असारहस्त्यश्वं, दूष्यामात्यं दूष्यैरमात्यैर्युक्तं, दण्डं सैन्यम्, आक्रन्दं वा पृष्ठमित्रं वा, हत्वा जित्वा, परस्य प्रेषयेत् । **जनपदैकदेशमिति** । जनपदस्यैकदेशम् अर्थात् परकीयं, श्रेणीम्, अटवीं वा आटविकान् वा, सहायोपादानार्थं स्वामिसहायत्वेन स्वीकरणार्थं, संश्रयेत गूढमनुवर्तेत । तथा सहायतयोपात्तेषु तेषु आत्मनो विश्वासे जाते तान् स्वामिनोऽन्तिके साध्यार्थं प्रेषयेदित्याह — **विश्वासमुपगत इत्यादि** । ईदृशसहायलाभानन्तरं स्वामी निजवनहस्तिबन्धनं वननाशनं वा निमित्तमपदिश्य परं तदविदितात्मसत्वाह एव सन् ग्रहेदित्याह — **ततः स्वामीत्यादि** ।

अनया दिशामात्याटविकानामपि अपसर्पतया परविषये प्रणिधानमूहनीयमित्याह — **एतेनेत्यादि** ।

अपसर्पप्रणिधानस्य प्रकारान्तरमाह — **शत्रुणेति** । स्वशत्रुणा सह, मैत्रीं कृत्वा मित्रभावमभिनीय, अमात्यान् स्वीयान्, अवक्षिपेत् विक्रुर्याद्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh